आज़ादी का अमृत महोत्सव

आजादी का अमृत महोत्सव अनुवादप्रकल्प ग्रंथावली – २

पंडितरुद्रमणिविरचित -

प्रश्नशिरोमणिः

अनुवादक:

आशिष जे.

प्रधान संपादक:

कुलगुरू,

क.का.सं.वि., रामटेक

संपादक:

प्रो. कृष्णकुमार पाण्डेय

संचालक, संशोधन-प्रकाशनविभाग:

राष्ट्रहिताय संस्कृतम्

कविकुलगुरू कालिदास संस्कृत विश्वविद्यालय, रामटेक

राष्ट्रीय मूल्यांकन व प्रत्यायन परिषदद्वारा (NAAC) A+ श्रेणी प्राप्त

२०२५

शीर्षक - **पंडितरुद्रमणिविरचित**

प्रश्नशिरोमणिः

अनुवादक: - **आशिष जे**

प्रधान संपादक: - **कुलगुरू, क.का.सं.वि., रामटेक**

संपादक: - **प्रो. कृष्णकुमार पाण्डेय**
संचालक, संशोधन-प्रकाशनविभाग:

आजादी का अमृत महोत्सव अनुवाद प्रकल्प समिती

1. डॉ. मधुसूदन पेन्ना - अध्यक्ष
2. प्रा. नंदा पुरी - सदस्य
3. प्रा. कृष्णकुमार पाण्डेय - सदस्य
4. प्रा. ललिता चंद्रात्रे - सदस्य
5. प्रा. हरेकृष्ण अगस्ती - सदस्य
6. प्रा. कविता होले - सदस्य
7. प्रा. प्रसाद गोखले - सदस्य
8. प्रा. पराग जोशी - सदस्य

© (Copyright with Publisher)

प्रकाशक	-	कुलसचिव, क.का.सं.वि., रामटेक ४४११०६
प्रकाशन वर्ष	-	२०२५
आवृत्ती	-	प्रथम
आय.एस.बी.एन.	-	९७८-८१-१९२२७-७२-३
मूल्य	-	३९०.००
मुखपृष्ठ	-	श्री. उमेश पाटील
मुद्रक	-	मे. लाभ प्रिंट अँड पब्लिकेशन, नागपूर

The Kavikulaguru Kalidas University does not hold any responsibility regarding the content, language, originality, plagiarism or views expressed by the author of this book. The respective author is solely responsible.

प्रश्नशिरोमणिस्थविषयानुक्रमणिका

विषयाः	पृष्ठांकाः
मंगलाचरणम्	1
संक्षेपाध्यायः	
कार्यासिद्धिकथनम्	1
युगपद्बहुप्रश्ने विचारः	4
इदानीं किं लग्नमिति प्रश्ने विचारः	5
सामान्यप्रश्ने विचारः	5
प्रष्टा कीदृश इति प्रश्ने विचारः	6
भूतं भवद्भविष्यं सौख्यं न वेति प्रश्ने विचारः	6
स्थिरादिफलम्	7
विशेषाध्यायः	
धनलाभप्रश्ने विचारः	8
सन्ततिप्रश्ने विचारः	10
प्रष्टुः किमायुः शिष्टं वा गतमिति प्रश्न विचारः	12
अर्कावियहगुणादिवर्णनम्	13
प्रथमद्रेष्काणांगविभागः	14
द्वितीयद्वेष्काणांगविभागः	15
तृतीयद्वेष्कांणागविभागः	15
गर्भे किमिति प्रश्ने विचारः	20
गर्मभ्रांतिप्रश्ने विचारः	22
गर्भक्षेमप्रश्ने विचारः	23
बालानां जीवितप्रश्न विचारः	24
गर्भः कस्येति प्रश्ने विचारः	24
प्रसवप्रश्ने विचारः	25

मम भ्रात्रादयः स्वस्था न वेति प्रश्ने विचारः 25
विवाहप्रश्ने विचार: 26
स्त्री सती न वेति प्रश्ने विचारः 28
कन्याशुद्धत्वप्रश्ने विचार: 29
वरप्राप्तिप्रश्ने विचार: 30
वधूः कीदृशीति प्रश्ने विचारः 30
तुष्टा स्त्री मामेष्यतीति प्रश्ने विचार: 31
स्त्रीपुंसयोः प्रीतिप्रश्ने विचारः 32
विषकन्याप्रश्ने विचार: 32
आगमनप्रश्ने विचार: 32
पाथश्चलितो न वेति प्रश्न विचार: 34
किमध्वा पाथेनातिवाहित इति प्रश्ने विचार: 35
यदसौ गृहं नागतो हतो बद्धो न वेति प्रश्ने विचार: 35
कदैष्यतीति प्रश्न विचारः 35
स्वस्थोऽयं प्रवासी गृहमागतो न वेति प्रश्ने विचार: 36
दूरस्थजीविप्रश्ने विचार: 37
यात्राप्रश्ने विचारः 38
कदा चलिष्यतीति प्रश्ने विचार: 41
विश्रामप्रश्ने विचार: 41
गन्तुरभिमुखं कः करिष्यतीति प्रश्ने विचार: 42
कस्य समीपे यातीति प्रश्न विचारः 43
गंता पुनः कदैष्यतीति प्रश्ने विचारः 43
मार्गफलम् 43
पुरप्रवेशावकस्मात्फलमस्ति न वेति प्रश्ने विचार: 46
इदं स्थानं कीदृगिति प्रश्ने विचारः 47

अमुकपार्श्वे यामि स मिलति न वेति प्रश्न विचारः	47
राज्यलाभप्रश्ने विचार:	47
नृपमंत्रिप्रीतिप्रश्ने विचार:	49
राज्यं चरं स्थिरं वेति प्रश्ने विचारः	50
मम राजदर्शनं भविष्यति न वेति प्रश्ने विचार:	50
जयपराजयप्रश्ने विचार:	51
चारप्रश्ने विचार:	56
दिग्विजयप्रश्ने विचार:	56
यायिनां शुभाशुभ प्रश्ने विचार:	61
यातुर्निवृत्तिप्रश्ने विचारः	61
शत्रोरागमने श्रुते आगमनं भविष्यति न वेति प्रश्ने विचार:	63
संघट्टचक्रम्	63
राशिसंघट्टचक्रम्	65
नक्षत्रसंघट्टचक्रम्	65
कोटचक्रम्	70
सर्वतोभद्रचक्रम्	73
तुरंगराहुविचार:	82
सेनापतेः शुभाशुभज्ञानम्	84
कस्यांगस्य घात इति प्रश्ने विचार:	85
दुर्गभंगप्रश्ने विचार:	87
वादप्रश्ने विचार:	92
रोगप्रश्न विचार:	93
संततबाधादिषु देवादिदोषज्ञानम्	97
मित्रेण प्रीतिर्वा संगमो भविष्यति न वेति प्रश्ने विचार:	97
गुप्तकार्यप्रश्ने विचार:	98

व्ययप्रश्ने विचार: 98
स्वामिभृत्यप्रश्ने विचारः 98
प्रभोः कीदृशं चित्तमिति प्रश्ने विचार: 99
अयमन्यो वा प्रभुर्भव्य इति प्रश्ने विचार: 99
स्वपतिः शुभो वाऽन्यपतिरिति प्रश्ने विचार: 99
पदगृहवाहनादिप्रश्ने विचारणीयाः 100
भूभाटकप्रश्ने विचार: 101
भृत्यचतुष्पदप्रश्ने विचारः 101
बन्धमोक्षप्रश्ने विचार: 102
बद्धमोक्षचक्रम् 105
सभायां नृपेण गुप्तदत्तो लेखः कीदृश इति प्रश्न विचार: 105
राज्ञो ग्रामादिमुद्रालिखितप्राप्तप्रश्ने विचार: 106
यस्मै लेखों दत्तः संप्राप्तस्तेन मानितो नवेति प्रश्ने विचार: 106
पत्रोत्तरप्रश्ने विचार: 107
लेखग्राही कदैष्यतीति प्रश्न विचारः 107
वार्तेयं सत्या मिथ्या वेति प्रश्ने विचार: 107
उत्पातभयनाशो भविष्यति न वेति प्रश्ने विचार: 108
जिघांसया व्रजतो मे किं भविष्यतीति प्रश्ने विचार: 109
बहुषु कार्येषु कस्य सिद्धिरिति प्रश्न विचारः 109
निधिवस्तुसिंहादिसंशयप्रश्ने विचार: 109
नौकागमनप्रश्ने विचार: 111
उत्पातप्रश्ने विचार: 112
सत्यजातकम् 118
प्रतिवर्षशुभांशुभज्ञानम् 120
मृगयाप्रश्ने विचार: 120

राशिजातयः 123
नक्षत्रजातयः 124
कुत्रांगे घात इति प्रश्ने विचारः 124
शत्रुरस्ति न वेति प्रश्ने विचार: 125
धातुवादप्रश्ने विचार: 125
मूकमुष्टिप्रश्ने विचार: 126
सुगमोपायः 127
द्रव्यबहुत्वे चित्यम् 129
राशिसंज्ञाचक्रम् 139
ग्रहसंज्ञाचक्रम् 140
चिंताप्रश्ने विचार: 145
यद्वेन्दुनन्दांशतः फलम् 150
तत्कालेन्दुः 151
तात्कालिकर्क्षचरणानयनम 155
नवांशस्पष्टसाधनम् 157
किं करोतीति प्रश्ने विचार: 160
चौर्याय यामीति प्रश्ने विचार: 161
किमाप्यमिति प्रश्ने विचार 161
चौर्यवनचौर्ययोः स्थानाविलाभप्रश्ने विचार: 162
नामबन्धः 174
नवांशवर्णाः 175
विशेषः 176
मात्रानिश्चयः 177
चौरमोक्षप्रश्ने विचार: 178
विस्मृतिप्रश्ने विचार: 178

अमुकं कार्यं कर्तुं यामि न वेति प्रश्ने विचार: 179
नष्टधनप्रश्ने विचारः 179
पतितधनप्रश्न विचारः 181
धनभ्रांतिप्रश्ने विचार: 182
नष्टभृत्यप्रश्ने विचार: 182
विभागप्रश्ने विचारः 183
कुत्र गत इति प्रश्ने विचार: 184
क्रयविक्रयप्रश्ने विचार: 184
समर्घमहर्घप्रश्ने विचार: 185
वर्षाप्रश्ने विचार: 186
सप्तनाडीचक्रम् 191
वृष्टियोगाः 193
शुक्रोदयफलम् 196
हुताशनीफलम् 196
भोजनप्रश्ने विचार: 196
भुक्तं भोक्तव्यं वेति प्रश्ने विचारः 200
स्ववैरिणा निमंत्रितोऽहं शुभमशुभं वा भविष्यतीति प्रश्ने विचारः 2
स्वप्नप्रश्ने तथा सुरतप्रश्ने विचार: 201

प्रश्नशिरोमणिः

प्रणम्य भक्त्याच्युतविच्युतापदं सदासदानन्दपदं शिवापदम्।।
त्रिपाठिवाल्मीकजरुद्रपण्डितस्तनोति सत्प्रश्नशिरोमणिं मणिम्।।१।।

भगवान् विष्णुः सर्वप्रकारकेषु आपद्समयेषु संरक्षकः, पार्वत्याः चरणयुगलम् अखण्डानन्दप्रदायकं च भवति। एतौ भक्त्या प्रणम्य वाल्मीकिवंशोद्भवः त्रिपाठिरुद्रमणिपण्डितः सत्पश्नशिरोमणिरूप मणिं तनोति।

संक्षेपाध्यायः

कार्यासिद्धिकथनम्

वपुषि रूपवयोगुणजातिसाहससुखच्युतिलक्ष्म विचिन्तयेत्।।
कनकरत्नधनक्रयविक्रयप्रचयकोशकथाश्च धने तथा।।२।।

प्रथमगृहे शरीरस्य रूप – अवस्था – गुण – जाति – साहससुखच्युति – चिह्नविषये चिन्तनं करणीयम्। द्वितीयगृहे सुवर्ण रत्न धनक्रयविक्रयप्रचयकार्यं, कोशविचारश्च करणीयम्।

यदुपजीविपराक्रमकिङ्करोद्यमसहोत्थमतं त्रितये तथा।।
पुरगृहेशचतुष्पदवाटिकाविवरवेशधरौषधमम्बिकाम्।।३।।

तृतीयगृहे उपजीविकानां, सेवकानां, उद्यमस्य सोदरीसोदरयोः विचारः करणीयः। ग्राम – गह – यजमानि – चतुष्पद – वाटिका – विवरप्रवेश – गृहप्रवेश – भूमिः – औषधः – माता –

सदनमागतमेव च वप्रकं सुहृदि वृद्धिखलौ च विचन्तयेत्।।
मतिविबन्धनयात्मजदोहदाध्ययनमंत्रकलाः सुतभे तथा।।४।।

गृहमुपागतजन – वप्रक – वृद्धि – धान्यचूर्णप्रदेश – एतेषां विचारः चतुर्थगृहे करणीयः। बुद्धि – प्रबन्ध – नीति – पुत्र – गर्भ – विद्याभ्यासः – मन्त्रण – चतुषष्ठिकला इन्यादीनां विचारः पञ्चमे गृहे करणीयः।

महिषरुग्रिपुदाहनमातुलोष्ट्रभयशंकितगा रिपुभे तथा।।

शयनवादगमागमविक्रयक्रयवधूविनिवृत्तिरताः स्त्रियाम्।।५।।

गो – रोग – वैरि – ज्वलनकर्म – मातुल – उष्ट्र – भय – शङ्कादीनां विचारः षष्टमगृहे करणीयः। शयन – वादविवाद – गमनागमन – क्रयविक्रय – वधू – पुनरागमन – रति – स्त्री इत्यादीनां विचारः सप्तमे गृहे करणीयः।

विषमदुर्गनदीतरणाध्वशस्त्रगतदष्टमृताश्च रणक्रियाम्।।

सहजवैरिवधूरिपुवादरन्ध्रमुखरादि मृतौ परिचिन्तयेत्।।६।।

विषम – दुर्ग – जलस्थलादिना दुष्प्रवेशः – नदीतरण – कलहकरण – मार्गकुशलता – शस्त्राज्जायमान व्रण – शुनकसर्पादिभिः दंशन – मृतक – युद्धकरणं – भातृविरोधि – वधू – वैरि – व्याधि – वाद – छिद्र – शाकिनीडाकिनिकृत दोष – वाचाल – मृत्युरित्यादीनां विचारः अष्टमगृहे करणीयः।

सुकृतभाग्यसुशीलतटाककूपसुरतीर्थगतीर्गुरुदेवरौ।।

श्वशुरजं सहजं श्वशुरं तथा नवमभेऽप्यभिषेकमथोऽङ्कभात्।।७।।

धर्म – भाग्य – सुन्दरशील – तटाग – कूप – देवयात्रा – तीर्थयात्रा – गुरु – देवर – श्याल – भ्राता – श्वशुर – राज्याभिषेकेत्यादीनां विचारः नवमगृहे करणीयः।

गगनवृत्तनृपास्पदमुद्रिकाजनकवृष्टिमनस्विनृपान् खभे।।

कनकसस्यनृयानगजाम्बराश्वमणिलाभकचश्वशुरान् भवे।।

व्ययगृहे व्ययदण्डविबन्धहानिपशुदानपितृव्यकमातुलीः।।८।।

आकाशवृत्तान्त – राजास्पद – राजमुद्रा – पिता – वृष्टि – शूरवीर – राजा इत्यादीनां विचारः दशमगृहे करणीयः। सुवर्ण – धान्य – नृयान – गज –

वस्त्र – अश्व – मणिलाभ – बाल – श्वरुरादीनां विचारः एकादशगृहे करणीयः। व्यय – दण्ड – बन्धन – हानि – पशु – दान – पितृव्य – मातुलादीनां विचारः द्वादशगृहे करणीयः।

यदि वपुःकृतिपौ गृहसंगतौ त्रिलवमेकमितौ कृतिसिद्धिदौ।।९।।

यदि लग्नेशस्तथा कार्येशः लग्ने स्थितौ चेत् एको योगः अथवा कार्यगृहे स्थितौ द्वितीयो योगः अथवा एक एव द्रेष्काणे स्थितश्चेत् तृतीयो योगः कार्यसिद्धिं करोति।

अथ कार्यसिद्धिकथनम्

तनुपस्तनुकार्यकार्यनाथान् कृतिपः कार्यवपुर्वपुःपतींश्च।।

सुविधुस्तनुकार्यपौ च पश्येद्यदि नूनं सकलार्थकार्यसिद्धि।।१०।।

यदि लग्नेशः लग्नकार्यकार्येशान् कार्येशः कार्यलग्नलग्नेशान् पश्येत्तर्हि कार्यसिद्धिः सम्पद्यते। एवमैव पापगतहरहितः पूर्णचन्द्रः लग्नेशकार्येशौ पश्येत्तर्हि निश्चयेन सर्वप्रयोजनसिद्धिः, सर्वकार्यसिद्धिश्च जायते।

तनुकार्यपचंद्रतः कबूलं यदि सर्वार्थकरं ततश्च दृष्टिः।।

मिथ इष्टफलार्द्धयदेष्टं निजनाथेक्षितमुग्रहष्टिहीनम्।।११।।

यदि लग्नेशकार्येशौ चन्द्रेण सह कंबूलयोगे स्थितौ चेत् सर्वकामसिद्धिर्भविष्यति तथैव परस्परदृष्टिः अथवा स्वस्वामिकारकेन दृष्टश्चेत् पापग्रहदृष्टिरहितश्चेत् इष्टकार्य-सिद्धिर्भवेत्।

सचतुःशुभदृक्समग्रसिद्धिर्यदि तद्वित्रिशुभस्वनाथदृष्टम्।।

स्वपदोनफलप्रदं यदेष्टं सशुभस्वेशदृशार्द्धसत्फलं स्यात्।।१२।।

यदि लग्ने वा कार्ये वा शुभग्रहचतुर्णां दृष्टिः चेत् समग्रकार्यसिद्धिः सम्पद्यते अथवा ग्रहद्वयं वा त्रयं वा शुभग्रहाः निजनाथेन दृष्टाश्चेत् पादोनकार्यं सिद्धं भवेत् तथैव लग्नकार्येशौ यदि एकेन शुभग्रहेण वा निजस्वामिना दृष्टौ तर्हि अर्द्धकार्यं सिद्ध्येत्।

यदि सौम्ययुगिष्टमंगनाथे क्षणवत्पादफलप्रदं प्रदिष्टम्।।

प्रबलावुदितौ च लग्नकार्याधिपती तत्फलदौ न चास्तनष्टौ।।१३।।

लग्नकार्यौ यदि शुभग्रहेण युक्तौ तथैव लग्नेशेन दृष्टौ चेत् चतुर्थभागकार्यसिद्धिः सम्भाव्यते तथैव लग्नेशकार्याधिपती बलसहितौ उदयप्राप्तौ, अस्तविनष्टं न भेवत्तर्हि कार्यसिद्धिः जायते।

युगपद्बहुप्रश्ने विचारः

प्रथमे तनुभं द्वितीय इन्दोस्तरणेर्भं त्रितयं गुरोश्चतुर्थे।।

अनुयोगगते वदेच्च नीचास्तगताद्वक्रविवर्जिताद्गुरोर्नो।।१४।।

प्रथमप्रश्ने लग्नात्, द्वितीये चन्द्रमात् तृतीये सूर्यात्, चतुर्थे बृहस्पतितः विचार करणीयः परन्तु यदि बृहस्पतिः अस्ते अथवा नीचस्तथा वक्रग्रहे न भवति अर्थात् चतुर्थप्रश्ने वृहस्पतिस्थ भावमेव लग्नमिति विचिन्त्य प्रश्नः करणीयः। यदि बृहस्पतिः नीचे वा अस्तंगतश्चेत् तत्रस्थ वक्रग्रहस्य भावमेव लग्नः इति चिन्तनीयः। यदि बृहस्पतिरेव वक्री चेत् तस्य भावमेव लग्नमिति प्रश्नः निर्मातव्यः। तत्र अस्तत्वनीचत्वप्रसंगो न स्यात्।

भृगुभौमविदां च पंचमे भं सबलस्यैव न चान्यखेचरस्य।।

अथ कायचतुर्मदांबरस्वैः क्रमतो वात्र वदेत्तनुं मनीषी।।१५।।

पञ्चमे प्रश्ने शुक्रभौमबुधेषु यो ग्रहः अधिकबलवान् भवेत् तस्य भावमेव लग्नमिति चिन्तनीयम्। तथैव षष्ठप्रश्ने पूर्वोक्ताधिकबलसहितग्रहान् किञ्चित् न्यूनबलग्रहभावं लग्नमिति चिन्तनीयम्। सप्तमे प्रश्ने अस्य पूर्वोक्त न्यूनबलसहितग्रहादपि यो हीनबलग्रहः भवति तस्य भावमेव लग्नमिति विचिन्त्य पृच्छकस्य प्रयोजनं वाक्तव्यं। अत्र भावार्थावगमनमेवमवगन्तव्यम् यत् शुक्रभौमबुधग्रहाणां सर्वाधिकबलवान् शुक्रः, तस्मात् किञ्चित् न्यूनबली भौमस्तथा तस्मादपि हीनबली बुधश्चेत् पञ्चमप्रश्ने शुक्रयुक्तभावमेव लग्नमिति विचिन्त्य प्रष्टुः प्रयोजनं वक्तव्यम्। षष्ठप्रश्ने मङ्गलयुक्तभावं तथा सप्तमप्रश्ने बुधयुक्तभावं लग्नमिति सम्भाव्य प्रश्नभाववर्णनं करणीयम्। तथैव अन्यग्रहस्य भावमेव लग्नमिति स्वीकृत्य पञ्चमादि प्रश्नान् न करणीयम्। एतदनन्तरं लग्नं चतुर्थ

– सप्त – द्वितीय – दशमभावेषु लग्नमिति परिगृह्य क्रमात् पञ्चपञ्चाः बुद्धिमता पण्डितेन प्रष्टव्याः।

इदानीं किं लग्नमिति प्रश्ने विचारः

प्रश्नाद्यक्षरवर्गेशो लग्नेशस्तत्समाक्षरैः।।

समं लग्नं च विषमैस्तैरेवं विषमं वदेत्।।१६।।

प्रश्नस्य आद्यक्षराणां वर्गेशलग्नेशयोः अक्षराणां संख्या समसंख्या समलग्नमिति विषमसंख्या चेत् विषमलग्नमिति उच्यते।

प्रारम्भे सर्वकार्याणां गणयेल्लग्नभावधि।।

सूर्यभादेः क्रमात्संपद्विपच्चेति फलं वदेत्।।१७।।

सर्वकार्यारम्भे सूर्यस्य राशितः लग्नस्य राशिपर्यन्तं गणयित्वा क्रमात् सम्पद्विपत्तिफलं वदेत्।

अथ सामान्यप्रश्ने विचारः

पृच्छकस्तनुपतिः कृतिनाथः प्रश्नपः खलु तयोः क्रमशश्च।।

जातिरूपगुणवर्णवयांसि प्रोचरेत्तदनु तत्फलमिष्टम्।।१८।।

पृच्छकः लग्नेशः, प्रश्नपतिः कार्येशः चेत् क्रमशः जाति – रूप – गुण – वर्ण – अवस्थावर्णनं कृत्वा तत्पश्चात् तस्य इष्टफलम् प्रोचरेत्।

तनुकार्यपती स्वभावयातौ यदि वा कार्यपतिस्तनौ च लग्नेट्।।

कृतिभागवतोऽथवांगकार्याधिपती लग्नगतौ हि वाकृतिस्थौ।।१९।।

लग्नेशकार्येशौ स्वस्वभावे स्थितौ अथवा कार्येशः लग्ने, लग्नेशः कार्यभावे स्थिते अथवा लग्नेशकार्येशौ लग्ने स्थितौ वा यदि कार्यभावे स्थितौ तर्हि वाञ्छितकार्यसिद्धिर्जायते।

यदि वाञ्छितसिद्धिरत्र योगे विधुदृष्टिः खचरद्वयेऽतिसाध्वी।।

यदि नेंदुनिरीक्षणं हि सौम्यग्रहदृष्टिस्तदिहान्यकार्यसिद्धिः।।२०।।

यदि अस्मिन्नेव खचरद्वये योगे कार्येशलग्नेशयोः उपरि चन्द्रस्य दृष्टिश्चेत् उत्तमकार्यसिद्धिर्जायते। यदि चन्द्रेण न दृष्टौ तथा अन्य कस्यापि शुभग्रहदृष्टिश्चेत् कस्याप्यन्यकार्यस्य सिद्धिः सम्भवेत्। अर्थात् इष्टकार्यस्य सिद्धिः न निश्चय एव।

प्रष्टा कीदृश इति प्रश्ने विचारः

तनौ विधौ कंटकगेऽर्कसूनौ बुधेऽर्कलुप्ते च कुजेन्दुजाभ्याम्।।
समेक्षणेनेक्षितशीतभानौ प्रष्टा भवेद्वै कुटिलस्तदानीम।।२१।।

लग्ने चन्द्रः केन्द्रस्थाने (१/४/७/१०) शनिः, बुधः, अर्कलुप्ते, चन्द्रः मङ्गलबुधाभ्यां पूर्णदृष्ट्या दृष्टश्चेत् पृच्छकः कुटिल इति तत्समये वक्तव्यम्।

लग्ने शुभेस्यात्सरलोऽन्यथा नहि यदींदुजीवौ हितदृष्टिवीक्षकौ।।
तनुस्त्रियोः स्यात्सरलो यदाऽस्तपे हिमेज्ययौरेकतमस्य वैरिदृक्।।
तदास्तिवक्रो यदि चंद्रगीष्पाती किलैकभस्थौ सरलौ नरो भवेत्।।२२।।

लग्ने शुभग्रहो भवेत्तर्हि सरलः नास्ति चेत् न सरल एव। यदि चन्द्रः बृहस्पतिलग्ने सप्तमस्थानं मित्रदृष्ट्या वीक्ष्यते तर्हि प्रष्टा सरलः भवेत्। तथैव तस्मिन् समये सप्तमेशे चन्द्रः बृहस्पतितःकस्यापि वैरदृष्टिः प्रसार्यते चेत् वक्र एव। यदि चन्द्रबृहस्पतौ एकराशौ स्थितौ चेत् सरलः भवत्येव।

भूतं भवद् भविष्यं सौख्यं न वेति प्रश्ने विचारः

तदित्थसाले तनुपेऽस्ति सौख्यं भविष्यति स्यात्परथात्र कष्टम्।।२३।।

यदि एतौ चन्द्रः बृहस्पतेः इत्थसालयोग सप्तमेशेन सह भवेत्तर्हि वर्तमानसमयं सौख्यं, तथैव अग्रेऽपि भविष्यति। अन्यप्रकारेण भवेत्तर्हि तत्समये कष्टं सम्पद्यते अग्रेऽपि तथैव भविष्यत्येव।

तनुकार्यपमुत्थशिलावसरस्य दिने कृतिपस्तनुमेत्युदितः।।
तनुकार्यपती परिपश्यति चेत्कृतिसिद्धिरिहैव दिने नियता।।२४।।

लग्नेशकार्येशयोः यस्मिन् दिने इत्थसालः सम्भवेत् तथैव कार्येशः उदितः सन् लग्नं प्राप्यते तथा कार्येशलग्नेशयोः परस्परवीक्षणेन तस्मिन् दिने नियतपूर्वककार्यं सिद्धेत्।

अथ स्थिरादिफलम्

लग्नेंदुस्थिरभे मृतं न निहतं बद्धो न नैवागतो
न स्थानाच्चलितो न वै रिपुभयं नो रोगशांतिश्च नो।।
कष्टं केवलमेव च स्थिरतरं कर्मादि तत्तच्चरे
वैलोम्याद्वितनौ विमिश्रितफलं सद्वीक्षितं चेच्छुभम्।।२५।।

लग्नः चन्द्रस्य स्थिरराशौ तिष्ठेत् तर्हि न मरणं, न वधं, न बद्धं, नैवागमनं, न शत्रुभयं, न रोगशान्तिः, न कष्टं सम्भाव्यते सर्वं सम्यक् सञ्जायते। लग्नः चन्द्रस्य स्थिरराशौ स्थितश्चेत् तत्तत्स्थिरकर्माणां सिद्धिर्जायते। तथैव लग्नः चन्द्रस्य चरराशौ तर्हि विलोमः ज्ञातव्यः अर्थात् प्रवासाद्यागमनं, चरकार्यसिद्धिः तथैव चन्द्रः लग्नस्य द्विस्वभावराशौ स्थितः तर्हि विमिश्रितफलप्राप्तिः, शुभग्रहेण दृष्टस्तर्हि शुभफलं वक्तव्यम्।

पापैर्दृष्टमसत्फलं यदि शुभाः केंद्रत्रिकोणायगाः।।
संसिद्ध्यैव खलास्त्रिगाः शुभकरास्ते केवलं कीर्त्तिताः।।२६।।

यदि पापग्रहेण दृष्टश्चेत् अशुभफलं सिद्ध्येत् यदि शुभग्रहाः केन्द्रे (१/४/७/१०) त्रिकोणे (९/५) भवन्ति चेत् सर्वकार्यसिद्धिः, पापग्रहाः केवलं स्थानत्रयेषु (३/६/११) स्थिताश्चेत् शुभकारकमित्येव वक्तव्यम्।

इति श्रीमत्पण्डितवेणीरामात्मज पण्डितरामदयालुकृत प्रश्नशिरोमणिभाषाटीकायां

संक्षेपाध्यायः समाप्तः

विशेषाध्यायः

धनलाभप्रश्ने विचारः -

धनपीतर्विभुना तनुपेन वा स्वभवनोच्चगतः शुभवीक्षितः।।

द्रुततरं धनदो यदि वित्तलग्नपहिमा नवपञ्चधनाङ्गगाः।।१।।

धनेशः यदि चन्द्रेण वा लग्नेशेन वा स्वस्थाने उच्चस्थितौ, शुभग्रहेण दृष्टश्चेत् शीघ्रमेव धनप्राप्तिः सम्भाव्यते। यदि धनेशलग्नेशचन्द्रमाः नवमपञ्चमद्वितीयस्थाने लग्ने स्थित्वा।

प्रचलिता मिथईक्षितसंयुता बहुधनाय यदा बलिनः शभाः।।

तनयकण्टकपुण्यधनोपगाः सपदि लाभकरा न खलोपगाः।।२।।

परस्परं प्रचलिताः युक्ताः, ईक्षिताश्चेत् अधिकधनप्राप्तिर्जायते तथैव यो बलवान् शुभग्रहः पञ्चमे केन्द्रे, नवमे, द्वितीयस्थाने स्थितश्चेत् शीघ्रमेव धनलाभः भविष्यति परन्तु पापग्रहेण नैव सम्भाव्यते।

तनौ शुभः सुतगैः स्वतुंगखेटैर्भवगृहगोच्चभृगौ पुरादिलाभः।।

स्वगृहेतनुपतिस्तनौ स्वपत्या परिदृष्टो नृपतेः स्वलाभदश्चेत्।।३।।

लग्ने शुभग्रहः, पञ्चमे उच्चग्रहः, एकादशभवेन उच्चशुक्रश्चेत् पुरं, निवासादीनां लाभः सम्भविष्यति। लग्नेशः स्वगृहे स्थित्वा लग्ने स्वस्वामिना दृष्टश्चेन् राज्ञः धनप्राप्तिः जायते।

इह सौम्यदृशा विपापदृष्टाः शुभयुक् चेद्रव्यपस्तनौ सुखांगेट्।।

धनदो यदि लग्नपस्तनौ ग्लौर्भवगो लाभपयुक् सुखार्थलाभः।।४।।

यदि लग्ने धनेशचतुर्थेशौ शुभग्रहयुक्तौ शुभग्रहेण दृष्टौ, प्रापग्रहेण अदृष्टौ चेत् धनप्राप्तिः भविष्यति। यदि लग्नेशः लग्ने तथा चन्द्रः लाभेशयुक्तः एकादशस्थाने स्थितश्चेत् सुखपूर्वकं धनलाभं भवेत्।

लग्नेशवित्ताधिपयोश्च नक्तयोगेऽन्यमर्त्याद्धनमेति पृच्छकः।।

वित्तं च विन्देद्यमयाख्ययोगे द्वयोश्च पापार्दितयोर्न वित्तम्।।५।।

लग्नेशधनेशौ नक्तयोगे स्थितौ तर्हि पृच्छकः धनमाप्नोति। तथैव यमयायोगे सत्यपि द्रव्यलाभः भविष्यति। यदि लग्नेशधनेशौ पापग्रहैः पीडितौ तर्हि धनलाभः नैव साध्यते।

स्वभोच्चचंद्रः सकलो विहीनः पापैर्दृशा पार्थगतः शुभैश्च।।

युतेक्षितो भूमिगृहार्थदः स्याद्यदा सितेज्येंदुभवा हि कश्चित्।।६।।

पूर्णचन्द्रः पुष्टत्वेन स्वोच्चशशौ स्थितः पापग्रहदृष्टिरहितः शुभग्रहसहितः अथवा तैः दृष्टश्चेत् भूमिः, धनप्राप्तिश्च भवेत्। शुक्रबृहस्पतिबुधेषु यः कोऽपि

तनुत्रिकोणार्थगतोंबरे वा स्वभोच्चगः शीघ्रमवाप्तिदः स्यात्।।

बली स्वभोच्चे सुतनुः सुरेज्यः शुक्रो बुधो वायगचंदृष्टः।।७।।

लगने, नवमे, पञ्चमे द्वितीये स्थिते अथवा चतुर्थे उच्चः चेत् शीघ्रमेव धनलाभः सम्पद्यते। बृहस्पतिर्वा, शुक्रो वा बुधो वा बली पुष्टरूपेण एकादशस्थ चन्द्रेण दृष्टश्चेत्

बह्वर्थलाभो यदि पूर्णवीर्याः केंद्रेषु सौम्या द्रुतमर्थदाः स्युः।।

केंद्रत्रिकोणायगताश्च पापा विनाधिकारं धनहानिदाः स्युः।।८।।

बहुद्रव्यलाभः भविष्यति। यदि पूर्णबलवान् शुभग्रहः केन्द्रे स्थितश्चेत् शीघ्रमेव धनप्राप्तिर्जायते। केन्द्रे (१/४/७/१०), त्रिकोणे (९/५), आयभागे (११) पापग्रहस्थितश्चेत् विना अधिकारेण धनहानिर्जायते।

शुभदृष्टियुतं नवमं प्रबलं निजनाथदृशालभचिंतितदम्।।

धनयोगमुपेत्य वपुःपतिना कृतमुत्थशिलः शुभदृष्टियुतः।।९।।

नवमभावः शुभग्रहेण दृष्टः वा युक्तश्चेत् तथैव निजनाथेनापि दृष्टश्चेत् चिन्तितवस्तुलाभो भवेत्। यदि शुभग्रहैः दृष्टो वा युक्तः लाभेशः धनस्थाने स्थित्वा लग्नेशेन सह इत्थसालयोगे भवेत्तर्हि।

सकलाप्तिकरो यदि लाभपतिर्भवगोंऽगममुत्थशिली नृपतेः।।

धनमानहयांबरदः सुहृदः सुखकृच्च विनष्टधनानुगदः।।१०।।

सर्वप्रकारकप्राप्तिः साध्यते। तथैव लाभेशः लाभभावस्थाने स्थित्वा लग्नेशेन सह इत्यसालयोगे भवेत्तर्हि राज्ञः धनलाभः, मानप्राप्तिः, अश्व, यात्रा, वस्त्र, मित्रसुखं, विनष्टधनप्राप्ति, सेवकादीनां लाभः भविष्यति।

यस्मिन् भावेऽगस्वनाथेत्थसालः सद्दृष्टस्तद्वा ततोऽर्थस्य लाभः।।
मृत्यौ युद्धादाहवाद्वंधनाद्वा लाभे मित्रात्स्याद्व्ययाद्वादशे च।।११।।

शुभग्रहैः दृष्टः लाभेशः यस्मिन् कस्मिन् भावे स्थित्वा लग्नेशः धनेशेने सह इत्थसालं करोति चेत् तादृशे भावे स्थितानां मनुष्याणां धनलाभो भवेत् यथा माता – पिता – भ्राता – स्त्री एतेषां भावे स्थितश्चेत् तद्वारा लाभो भवेत्। तथैव अष्टमभावे युद्धं, विवादः बन्धनं, एकादशभावे मित्रात्, द्वादशभावे व्ययार्थं द्रव्यलाभो जायते।

अथ संततिप्रश्ने विचारः

त्रिकोणकेंद्रगो गुरुस्तदाशु संततिप्रदो यदा सितः सुतेशयुक् तनौ भवेऽथवा सुते।।
प्रजाप्रदो यदा खलस्तनौ गुरुः सुखार्थगः सदन्वितैश्च कंटकैर्विलंबतो हि संततिः।।१।।

यदि बृहस्पतिः नवमे पञ्चमे स्थितश्चेत् शीघ्रमेव सन्तानञ्जायते। यदि पञ्चमेशयुक्तशुक्रः लग्ने एकादशे पञ्चमे स्थितश्चेत् सन्तानप्राप्तिर्जायते। तथैव पापग्रहः लग्ने, बृहस्पतिः चतुर्थे, द्वितीयस्थाने स्थिते केन्द्रे शुभग्रहो भवेत्तर्हि विलम्बेन सन्तानं सिद्धेत्।

यदा तनोर्विधोस्तु वा सुतेऽलिगो हरिस्त्रियोऽल्पसंततिर्यदा सुतः खलैर्युतोऽथवेक्षितः।।
स्वभाष्टगौ यमोष्णगू स्त्रियं च वन्ध्यकां वदेद्यदेंदुचंद्रजौ मृतौ सदोषकाकवंध्यिकाम्।।२।।

यदि लग्नेशः चन्द्रात् पञ्चमे गृहे वृश्चिक – वृष – सिंह – कन्याराशिगतश्चेत् किञ्चिद्विलम्बेन सन्तानप्राप्तिः तथैव पञ्चमगृहं पापग्रहैः युक्तो वा दृष्टश्चेत् शनिसूर्यौ स्वराशेः अष्टमे गृहे स्थितौ तर्हि स्त्रियं वध्या इति वक्तव्या, यदि चन्द्रबुधौ अष्टमस्थाने स्थितौ तर्हि दोषसहिता काकवन्ध्या इति वक्तव्या।

यदेज्यभार्गवौ मृतौ मृतप्रजां यदा कुजो हि दोहदस्रुतिप्रसुंयदाष्टगोऽष्टपो बली।।
विपुष्पिणीं यदा खला धनान्त्यमृत्युसंस्थिताः पुरोद्भवप्रजाक्षयस्तनः परं न संततिः।।३।।

यदि बृहस्पतिशुक्रौ अष्टमभावे स्थितौ चेत् स्त्रीणां सन्तानप्राप्त्यनंतरं पुत्रः म्रियते तथैव मङ्गलमयेन स्त्रीणां गर्भस्रावो जायते। यदि बलवान् अष्टमेशः अष्टमे स्थिते विपुष्णिणी अर्थात् स्त्रीणां रजोधर्मो नैव जायते। तथैव यो पापग्रहः द्वितीयद्वादशाष्टमस्थानेषु स्थितश्चेत् प्रथमापत्यस्य हानिः तथैव पुनः न सन्तानप्राप्तिः सम्भाष्यते।

सुतपतिर्निजनाथनिरीक्षितः सशुभदृष्टयुतः सदपत्त्यदः।।

द्वितनुगा विधुसौम्यसिताः पुरा ददति संततिमेव यदा त्विमे।।४।।

पञ्चमेशः यदि स्वस्वामिना दृष्टो वा शुभग्रहैः युक्तो वा दृष्टो वा चेत् सन्तानं सिद्ध्येत्। यदि चन्द्रमाबुधशुक्राः द्विस्वभावराशौ स्थिताश्चेत् प्रथमसन्तानं प्राप्येत्। तथैव एते

धनुषिगा न कदाप्यथ पञ्चमेक्षकनृनार्यभिधप्रमितैः क्रमात्।।

सुतसुताश्च भवन्ति सतां दृशो द्विगुणदास्त्वसतां परथाऽफलाः।।५।।

धनुराशौ स्थितश्चेत् कदापि सन्तानं नैव सिद्ध्येत्। पञ्चमे स्थाने यावन्तः पुरुषग्रहाणां दृष्टिश्चेत् तावन्तः पुत्राः, स्त्रीग्रहाणां दृष्टिश्चेत् तावन्त्यः कन्याः जन्म लभन्ते। यदि शुभग्रहाणां दृष्टिश्चेत् द्विगुणसन्तानं, अशुभग्रहाणां दृष्टिश्चेत् तत्सन्तानस्य हानिः अथवा निष्फलमित्युच्यते।

उभयथा यदि मिश्रफलप्रदा यदि सुते गुरुभं सुतसौख्यत्दृत्।।

सुतग्रहांकसमापि च संततिर्भवति वाथ नवांशसमापि वा।।६।।

यदि शुभाशुभग्रहयोः द्विप्रकारकदृष्टिश्चेत् मिश्रफलप्राप्तिरेव जायते अर्थात् सन्तानहानिः प्राप्तिश्च सम्भाव्यते। यदि पञ्चमस्थाने बृहस्पतेः राशिश्चेत् पुत्रसुखस्य हानिः, पञ्चमभावस्य अंकस्य अथवा नवांशस्य सदृश समानसंख्या कथ्यते।

सितलवे च सुते सितवीक्षिते बहुलसंततिरेवमपीन्दुतः।।

सुतपनंदलवोन्मितसंततिर्भवति दास्युदराच्च धृतोदरात्।।७।।

यदि पञ्चमभावे शुक्रस्य नवांशः शुक्रेण दृष्टश्चेत् दासीगर्भाद्वा, सितवीक्षितस्त्रीगर्भाद्वा अधिकसन्तानोद्भवः जायते। एवं प्रकारेण चन्द्रात् ज्ञातव्यः

अर्थात् चन्द्रस्य नवांशः पञ्चमे चन्द्रेण दृष्टश्चेदपि तस्याः स्त्रियः अधिकसन्तानं जायते अथवा सुतेशस्य नवमांशसहशा सन्तानसंख्या भवेत्।

यदि सुते शनिभं विधुवीक्षितं सशनिलब्धसुतो विधुवद्बुधात्।।

शनिगणो यदि चेन्दुगणः सुते तरणिकाव्यदृशा च पुनर्भवः।।८।।

यदि पञ्चमे शनेः राशिः चन्द्रेण दृष्टश्चेत् अथवा युक्तश्चेत् अन्यात् सुतप्राप्तिः नाम लब्धसुतः सम्पद्यते। एवं चन्द्रसदृश बुधादपि एवमेव ज्ञातव्यं नाम शनिः बुधेन दृष्टश्चेदपि पूर्वोक्तफलमेव जायते। यदि शनिर्वा चन्द्रो वा पञ्चमभावे सूर्यः शनिना दृष्टश्चेत् द्वितीयपन्त्याः पुत्रलाभो सम्भाव्यते।

तनयदो यदि मंदगणः सुते सबुधदृक् विकुजार्कनिरीक्षितः।।

भवति विप्रसुतोऽस्य तथा विदोऽपि च गणे रविजने निरीक्षितो।।९।।

यदि पञ्चमस्थाने शनिवर्गः बुधेन दृष्टस्तथा सूर्यः कुजेन अदृष्टस्तर्हि, पञ्चमे बुधवर्गः शनिना दृष्टः तथा कुजः बुधेन अदृष्टश्चेत् तस्य मनुष्यस्य विप्रसुतलाभो जायते।

नवलवः सुतगश्च यदुन्मितैः खलखगैरवलोकितसंयुतः।।

भवति तन्मितगर्भनिपातनं यदि शुभग्रहदृष्टिविवर्जितः।।१०।।

पञ्चमग्रहस्य नवांशः यावान् पापग्रहैः दृष्टो वा युक्तश्चेत् तावान् गर्भनिपातनं भविष्यति। परन्तु तत्र शुभग्रहदृष्टिविवर्जितः स्यात्।

सुतलवेण्मृतिगश्च यदुन्मितग्रहयुतो हि तदुन्मितपुत्रहा।।

यदि सुतेद्भुजराहुयुतोऽथवागुकुजमध्यगतः सुतनाशनः।।११।।

यदि सुतेशः कुजग्रेहण अथवा तन्मध्ये भवेत्तर्हि पुत्राणां नाशः जायते। यदि पञ्चमेशः अष्टमगृहे यावद्भिः ग्रहैस्सह स्थितः तावान्तः पुत्राः हानिमधिगच्छेयुः।

प्रष्टुः किमायुः शिष्टं वागतमिति प्रश्नविचारः

यावल्लवेर्लग्नप एति चंद्रं तावत्समादायमितेर्हि शिष्टा।।

यावल्लवैरत्त्यजदिंदुमंगेट् तावत्समादायमितेर्गताः स्युः।।१।।

लग्नेशः यावद्भिः अंशैः चन्द्रं प्राप्येत् तावन्ति वर्षाणि आयुषः परिमितिः विज्ञायते, लगेशः यावद्भिः अंशै चन्द्रं त्यज्येत् तावन्ति वर्षाणि आयुर्व्यतीतः इति ज्ञेयः।

अथार्कादिग्रहगुणादि वर्णनम्

अथार्कादिग्रहाणां हि गुणवर्णविनिर्णयः।।

आकारोऽपि शरीरस्य प्रोच्यते मुनिसंमितः।।२।।

अथ सूर्यादि ग्रहाणां गुणवर्णशरीराकाराणां मुनिव्यिरङ्गीकृत मार्गेण वर्ण्यते।

चतुरशूरगभीरसुरूपकः प्रकृतिपैत्तिकवृत्ततनुर्नृपः।।

मितकचोऽस्थ्यधिको मधुपिंगदृक् कटुतरः स्थविरः पुरुषो रविः।।३।।

चतुरः, शूरः, गम्भीरः, सुरूपः, पित्तप्रकृतिकः, वृत्तशरीरः, मितकयः, स्वल्पकेशी, मधुपिङ्गलनेत्रवान्, अतिकटुः, वृद्धः, पुरुषः, सूर्यः भवति।

विमलधीः सुतनुर्मृदुवाग्धरो रुधिरसारसुनेत्रकफानिलः।।

प्रकृतिकुंचितकेशधरो धृणी शुभगगौरपृथुः स्वधिपो विधुः।।४।।

निर्मलबुद्धिः, सुन्दरशरीरम्, मृदुवाणी, रुधिरसारः, सुन्दरनेत्रौ, कफवातप्रकृतिः, कुञ्चितकेशाः, दयालुः, सुन्दरगौरवर्णशरीरम् इत्यादिलक्षणयुक्तः स्त्रीणामधिपतिः चन्द्रः भवति।

अरुणगौर उदारतमोगुणी कटुनरश्चफलः पशुपालकः।।

तरुणपैत्तिकपिंगदृगुग्रधीर्गतदयो बहुगर्व इलासुतः।।५।।

रक्तगौरवर्णी, उदारचित्तः, तमोगुणी, कटुस्वभावी, पुरुषः, चपलः पशुपालकः युवा, पित्तप्रकृतिकः, पिङ्गलनेत्रवान्, उग्रबुद्धिमान्, निर्दयी, गर्वी च भवति कुजः।

करुणदृक् मृदुवाक् त्रिमलाधिकस्त्वमितमध्यशिरालतनुः सुखी।।

त्वचि सुपुष्टतरोऽतिकुतूहली बहुकलिश्चतुरोऽल्पतनुर्बुधः।।६।।

करुणनेत्रवान्, मृदुवाणी, वातपित्तकफप्रकृतिकः, श्यामकटियुक्तः, नाडीव्याप्तशरीरी, सुखी, अतिपुष्टत्वक्, अतिकुतूहलः, कलहवान्, सूक्षशरीरि भवति बुधः।

रुचिरपर्वसुवर्णमहातनुर्बहुवसाकफिपिंगकवेक्षणः।।

गुरुरथेभगतिः कफवातुलो जलदनीलरुचिर्बहुशुक्रतः।।७।।

सुन्दरपर्वयुक्तः, सुन्दरवर्णी, महाशरीरी, गर्वी, कफप्रकृतिकः, नेत्रवान्, रथगजगमनः, वफवातप्रकृतिकः नीलमेघवर्णी भवति बृहस्पतिः।

कुवलयाक्षिकचो भृगुजोऽस्त्यथो मलिनकृष्णशिरालकृशो जटी।।

पुरुषरोमकचः कपिलेक्षणः सपवनः खल उच्चनखः शनिः।।८।।

कमलनेत्रवान्, सुन्दरकेशवाञ्च भवति शुक्रः। मलिनः, श्यामशरीरवान्, जटाधारी, कठोररोमवान्, कपिलनेत्रवान्, वातप्रकृतिकः, दृष्टस्वभावी, उच्चनखः भवति शनिः।

तनुनवांशपतेर्बलिनोऽथवा वपुरथेन्दुनवांशपतेः प्रभा।।

भवति सत्वमिनेज्यहिमा रजो बुधभृगू तम आरशनी मतौ।।९।।

लग्नस्य नवांशपतिः अथवा बलवता ग्रहेण जीवस्य शरीरवर्णनं करणीयम् तथैव चन्द्रस्य नवांशपतिग्रहेण वर्णं वक्तव्यम्। सूर्यचन्द्रबृहस्पतीनां सत्त्वगुणं, बुधशुक्रयोः रजोगुणं, कुजशनिग्रहयोः तमोगुणञ्च वक्तव्यम्।

रविखराममितांशपतेर्गुणो यदिति जीवसितौ च तमोंऽगगौ।।

अथ शिरोऽक्षिककर्णनसाकपोलहनुवक्रमिति त्रिलवादिमे।।१०।।

सूर्यस्य त्रिशांशपतेः ग्रहस्य यो गुणः स जीवस्य गुण इति वक्तव्यः तथैव यदि बृहस्पतिशुक्रौ लग्ने स्थितौ चेत् तमोगुणं वक्तव्यम्। एतदनन्तरं शिर – नेत्र – कर्ण – नासिका – हनू – कपोल – मुखानि प्रथमद्रेष्काणस्य अङ्गविभाग एव।

प्रथमद्रेष्काणाङ्गविभागः



गलांसमुजद्वयकुक्ष्युरोजठरनाभय आत्रिलवद्वये।।

तदनु बस्तिरुपस्थगुदे तथा वृषण ऊरुकजानुपदः क्रमात्।।११।।

कण्ठ – स्कन्ध – द्वौ भुजौ – पार्श्वे – वक्षः स्थलम् – उदर – नाभिः एते द्वितीयद्रेष्काणस्य अङ्गानि भवन्ति। एतदनन्तरं वस्ति – लिंग – गुदा – वृषण – ऊरु - जङ्घा – पादौ क्रमेण।

द्वितीयद्रेष्काणाङ्गविभागः



तृतीयद्रेष्काणाङ्गविभागः



त्रिलवकत्रितयेऽथ तनोः पुरापरदलेऽगमदक्षिणदक्षिणाम्।।
इह खलैर्व्रणदृष्टयुतेक्षिते मशकपूर्वकलक्षणमादिशेत्।।१२।।

तृतीयद्रेष्काणस्य अङ्गविभागे अन्तर्भवन्ति। लग्नस्य पूर्वपरे दले वामदक्षिणाङ्गवर्णनं क्रियते। यो अङ्गः पापग्रहेण युक्तो वा दृष्टश्चेत् मशकचिह्नमिति वक्तव्यम्।

स्वभलवस्थिरगे सहजोऽन्यथा त्रयगताश्च रवौ खलु काष्ठजः।
शशिनि शृंगिजलोत्थभवः कुजे नलविषायुधजः शनितोऽश्मजः।।१३।।

स्वराशिनवांशे अथवा स्थिरराशौ शुभग्रहो वा पापग्रहो वा स्थितौ चेत् स्वाभाविकजन्मतः पूर्वोक्तचिह्नानि उच्यन्ते। यदि स्वनवांशे अथवा द्विस्वभावराश्यां स्थितश्चेत् अन्यथा उच्यते अर्थात् पश्चात् ज्ञातव्यम्। यदि एतेषामङ्गराशीनामुपरि सूर्यश्चेत् काष्ठात्, चन्द्रश्चेत् श्रृङ्गी अथवा जलचरजीवात् बुधश्चेत् अग्निविषशस्त्रेभ्यः अग्निश्चेत् काष्ठात्

पवनजश्च शुभेः शुभजोऽथ यत्पदगतास्त्रिखलाश्च बुधान्विताः।।
भनियमाद्व्रणचिह्नकरा यदा रिपुखलो व्रणकृत्थ च दृष्टयुक्।।१४।।

अथवा पवनादुत्पन्नं चिह्नं वक्तव्यम्। शुभग्रहैः युक्तः दृष्टश्चेत् तस्मिन्नेव अङ्गे शुभवस्तुनः चिह्नं वक्तव्यम्। बुधग्रहः पापत्रयग्रहेण सह यस्यां अङ्गराशौ स्थितः तां राशिमनुसृत्य अङ्गे व्रणस्य चिह्नं करोति। षष्ठस्थाने स्थितः पापग्रहो व्रणचिह्नं करोति। यदि स एव शुभग्रहैः दृष्टो वा युक्तश्चेत् तिलचिह्नमुच्यते।

शुभखगैस्तिलकृच्च तथा वदेल्लघुभगेंऽगमणुत्वपरे परम्।।

तनुपतिः स खलोष्टषडन्त्यगस्तनुसुखं न षडन्त्यमृतीट् स्वभे।।१५।।

केचिदाह – यदि पापग्रहः लघुसंज्ञकराशौ स्थितश्चेत् अङ्गं अत्यन्तसूक्ष्मं भवेत्। लग्नेशः पापग्रहैस्सह अष्टमे, षष्ठे, एकाशदशस्थानेषु स्थितश्चेत् जीवस्य शरीरे सुखं न भवेत्। तथैव षष्ठे, द्वादशे, अष्टमस्थानेषु अधिपतिग्रहः स्वराशिवान् चेदपि

तनुसुखं न यदा विबलोंऽगपो वपुषि पापखगे त्वधिरुग्यदा।।

तनुपतिः स्वगृहे बुधजीवयुक् भृगुयुतश्च चतुष्टयगोऽथवा।।१६।।

शरीरसुखं न भवत्येव। यो लग्नेशः निर्बलः तथा पापग्रहो लग्ने स्थिते अधिकरोगः सम्भाव्यते यदि लग्नेशः बुधबृहस्पतिभ्यां युक्तः अथवा शुक्रेण सह केन्द्रस्थाने

भवति तुंगगृहे शुभभेऽथवा हितदृशा सुखराज्ययशोऽर्थभाक्।।

सुरुचिरः सुकृती श्रुतसत्यवान् यदि विधुः क्रियभे कलशे शनिः।।१७।।

अथवा उच्चस्थाने वा शुभग्रहराशौ मित्रदृष्ट्या दृष्टश्चेत् सो मानवः सुखी – राज्यभोगी – धनी – यशस्वी – सुन्दरशरीरी – पुण्यवान् – सत्यवान् च भवेत्। यदि चन्द्रः मेषराशौ, शनिः कुम्भराशौ।

धनुषि भानुरदेवगुरुर्मृगे निजभुजार्जितवित्तयशास्तदा।।

यदि समस्तचतुष्टयगाः खला धनगताश्च शुभाः कुलहृत्सुहृत्।।१८।।

सूर्यः धनुराशौ, शुक्रो मकरराशौ स्थिताश्चेत् स्वभुजबलेन यशः प्रापकः भवेत्। यदि चतुर्षु केन्द्रेषु समस्तपापग्रहास्तथा द्वितीयगृहे शुभग्रहो स्थितश्चेत् सो मानवः कुलहृत् तथा वस्तुहारको भवेत्।

तनुगतो यदि वा सुतगो गुरुर्दशविधुर्नृपतिः सुमतिर्दमी।।

क्रियगतो भृगुजो यदि वांगना तुलगुरुश्च बुधः शुभवीक्षितः।।१९।।

यदि बृहस्पतिः लग्नः च पञ्चमे, चन्द्रस्य दशमे चेत् सो मनुष्यो राजा, सुबुद्धिमान्, जितेन्द्रियो भवेत्। शुक्रः मेषराशौ, कन्या तुलायां, बृहस्पतिः वृश्चिकराशौ, बुधः शुभग्रहैर्वा दृष्टश्चेत्

अलिगतः प्रभटश्चतुरः सुधीः कुलपतिर्मुदितः समुदारदः।।

यदि रविर्मदने च मृतौ शनिः सुरगुरुश्च धने भृतको भवेत्।।२०।।

सो मनुष्यः पराक्रमी, शूरवीरः, चतुरः, बुद्धिमान्, कुलपतिः, सन्तोषदायकः, उदारचित्तो भवेत्। यदि सूर्यः सप्तमे, शनिरष्टमे, बृहस्पतिः द्वितीये स्थिते तर्हि सेवको भवेत्।

रविविधू नवमे व्ययगे त्वगौ नृपसमीपचरः सततं भवेत्।।

गुरुरवी मृतिभेरविजः खभे खशिखिवर्षमितौ च नृपार्थभाक्।।२१।।

सूर्यचन्द्रौ नवमस्थाने, राहुः द्वादशस्थाने स्थिताश्चेत् सर्वदा राजसमीपचरो भवेत्। बृहस्पतिसूर्यौ अष्टमे, शनैश्चरः दशमे स्थिते त्रिंशद्वर्षाभ्यन्तरे राज्ञः धनभागी अर्थात् सेवको भवेत्।

कुजरवी रिपुभे कुटिले शनौ हिमकरे च सुखे नृपदर्शनी।।

धनशनौ शशिभे गुरुचंद्रयोर्यदि नरः स भवेत्क्रयविक्रयी।।२२।।

कुजसूर्यौ षष्ठमस्थाने, वक्री शनैश्चरः चन्द्रमा च चतुर्थस्थाने स्थितौ तर्हि राजदर्शको भवेत्। यदि धनस्थाने शनिः, कर्कराशौ बृहस्पतिचन्द्रौ भवतः चेत् सः पुरुषः वस्तुक्रयविक्रेता नाम वर्णिक् भवेत्।

निजगृहोच्चसुरद्विषि केंद्रषड्त्रयनवात्मजगे बहुधा सुखी।।

शशिनि सप्तमकोशगतेऽर्कजे वपुषि शूरतरो बहुपुत्रवान्।।२३।।

यदि शुक्रः स्वगृहे उच्चस्थाने केन्द्रे (१/४/७/१०) ६/१२/९/५ स्थाने स्थितश्चेत् बहुसुखप्राप्तिः भवेत्। चन्द्रः ७/२ स्थाने तथा शनिः लग्ने स्थितश्चेत् अतिशूखीरः, बहुपुत्रवान् च भवेत्।

गुरुररिव्ययगो यदि पूजितः परभटश्च कुजः कुलरंध्रकृत्।।

अगुगुरू भवमे शनिरष्टमे यदि भवेत्सुभटो बहुयुद्धवित्।।२४।।

यदि बृहस्पतिः ६/१२ स्थाने स्थितश्चेत् परभटः पूजितः, कुजः ६/१२ स्थाने स्थितश्चेत् कुलदोषकारको भवेत्। यदि राहुबृहस्पती एकादशस्थाने शनिः अष्टमस्थाने स्थितश्चेत् पराक्रमी, योद्धा च भेवत्

यदि गुरुर्मदनव्ययगो रविर्नवमगः कुसुतो मृतिगः सुधीः।

यदि च भानुगुरू सुतधामगौ भवति शास्त्रपटुर्धनधान्यवान्।।२५।।

यदि बृहस्पतिः ७/१२ स्थाने सूर्यः नवमे, कुजः अष्टमे स्थाने भवेत्तर्हि बुद्धिमान् तथा यो सूर्यः बृहस्पतिश्च पञ्चमस्थाने स्थितौ तर्हि शास्त्रपण्डितः, धनधान्यवान् च भवेत्।

यदि चतुष्टयगौ भृगुमंत्रिणौ विदपि वा सधनः श्रुतिपारगः।।

मदनगे हिमगौ च सुते गुरौ दशमधर्मगते विदि लेखकः।।२६।।

यदि शुक्रबृहस्पतिबुधाः केन्द्रस्थाने (१/४/७/१०) स्थिताश्चेत् धनवान्, वेदपारगः, तथैव चन्द्रः सप्तमस्थाने, बृहस्पतिः पञ्चमस्थाने, बुधः १०/९ गृहे स्थिताश्चेत् लेखको भवेत्।

विधुविदोः शनिभास्करयोस्तथेज्यसितयोर्व्यधजो बहुलो भवान्।।

यदि विधुः सखलो गुरुवीक्षितो भवति पातकृकृत्कुलदूषणः।।२७।।

चन्द्रबुधशनिसूर्यबृहस्पतीनां शुक्रेण सह परस्परवेधादुत्पन्नः पुरुषः अतिलोभी भवेत्। पापग्रहैस्सह चन्द्रो यदि बृहस्पतिना दृष्टश्चेत् पातककारकः, कुलदूषणश्च भवेत्।

यदि शनिर्मदनेऽवनिजस्त्वगुर्मृतिनवांत्यसुखे गुरुतल्पगः।।

विधुभतो द्वितये तपनस्ततः शनिरतोऽवनिजो यदि तस्करः।।२८।।

यदि शनिः सप्तमस्थाने, कुजराहू ८/९/१२/४ स्थाने स्थितौ चेत् गुरुतल्पगो भवेत्। यदि चन्द्रस्य राशितः द्वितीये सूर्यः, सूर्यात् द्वितीये शनिः, शनितः द्वितीयस्थाने कुजः भवेत्तर्हि सो मनुष्यः चोरः भवेत्।

बुधकुजौ सबलौ रिपुभावगौ यदि निकृत्तकरः किल तस्करः।।

मृगकुजश्च कुलीरशनिस्तनौ भवति दस्युविधैरसिखण्डित।।२९।।

यदि बुधकुजौ सबलौ भूत्वा षष्ठमगृहे स्थितौ तर्हि स तस्करः चौरकर्मणा निवृत्तकरः भवेत्। मृगकृजौ कर्कस्य शनैश्चरलग्ने स्थितौ तर्हि सो मनुष्यः चौरकर्मणा खण्डितशिरो भवेत्।

मिथुनमीनधनुष्कलशे खला अशनितो मरणाय कुचेष्टितैः।।

वपुषि वित्तिलवे च चतुष्टयेंदुदृशिते नृपजोऽप्यतिनीचकृत्।।३०।।

मिथुनमीनधनुकुम्भराशिषु पापग्रहाः स्थिताः तर्हि दुष्कर्मकरणवशात् वज्रात् मृत्युर्जायते। तथैव यस्मिन् लग्ने बुधस्य द्रेष्काणः केन्द्रस्थस्य चन्द्रेण दृष्टश्चेत् राजकुले सञ्जातोऽपि अतिनीचकर्मणा जीवेत्।

मदकुजः खविधुर्द्वितये रवेर्यदि शनिश्च तदोनतनुर्नरः।।

यदि परस्परनंदलवोपगौ रविविधू मिलितौ च दरिद्रितः।।३१।।

यदि सप्तमस्थाने कुजः, दशमे चन्द्रः, सूर्यात् द्वितीयस्थाने शनैश्चरः भवेत्तर्हि सो पुरुषः हीनशरीरी नाम दुर्बलो भवेत्। सूर्यचन्द्रौ परस्परमेको अन्यस्य नवांशे एकस्मिन्नेव गृहे स्थितौ चेत् दरिद्रो भवेत्।

यदि खलान्तरगो विधुरर्कजः स्मरगतो विकलात्मनरो भवेत्।।

उदरगुल्मकफक्षयरोगतः प्रकथितो मुनिभिर्निजबोधतः।।३२।।

यदि चन्द्रः पापग्रहमध्ये तथा शनैश्चरः सप्तमस्थाने स्थितश्चेत् सो मनुष्यः उदरगुल्मकफ – क्षयादि रोगैः विकलशरीरी भवेत्। योगोऽयं मनुयः स्वज्ञानेन कथिताः आसन्।

गर्भे किमिति प्रश्ने विचारः

तिथिप्रहरवारर्क्षयोग एकोनितो हृतः।।

सप्तभिर्विषमे शेषे पुत्रः पुत्री समे भवेत्।।१।।

तिथि – प्रहर – वार – नक्षत्राणां संयोजने एकं न्यूनं कृत्वा सप्तभिः विषमे शेषे पुत्रः, समे शेषे पुत्री च सञ्जायते।

यदि तनुतनयेशौ पुंभगावोजभांशे नरविषमपदेवार्किः सुतोंऽगार्कजीवाः।।
विषमभ इह पुत्रस्त्वन्यथा स्त्री यदार्को नरभवनगतो वै लग्नगश्चेत्सुतः स्यात्।।२।।

यदि लग्नस्तथा लग्नेशो वा पुरुषराशौ (१/३/५/७/९/११) अथवा विषमराशिगत नवांशे स्थिते तथा पुरुषो वा विषमराशौ शनैश्चरस्थितश्चेत् पुत्रः जायते। लग्नसूर्यबृहस्पतयः विषमराशौ स्थिताश्चेदपि पुत्रः प्रसूयते। अन्यप्रकारेण तु कन्या जायते अर्थात् समे तथा स्त्रीसंज्ञके लग्न – लग्नेश – शनैश्चरादयः भवन्ति चेत् कन्या भवेत्। यदि सूर्यः नरराशिगते लग्ने स्थितश्चेत् पुत्रः सञ्जायते।

सुतलवेष्णरि पूर्णबलः पुमान् सुशुभदृक् सुतजन्मकरः स्मृतः।।
यदि सुतेट् कुजराहुयुतोऽथवागुकुजमध्यगतोऽस्तगतोऽपि वा।।
भवति दोहदहृद्यदि पञ्चमे शुभखगो द्वितनुस्तनुगस्तथा।।३।।

यदि पञ्चमग्रहस्थ नवाधिपतिः पूर्णबलीभूत्वा पुरुषराशौ स्थितोऽथवा शुभग्रहेण दृष्टश्चेत् पुत्रः सञ्जायते। यदि सुतेशः कुजराहुयुक्तो वा राहुः कुजस्य मध्ये वा अस्तगतो चेत् गर्भस्य हानिरेव सम्पद्यते। यदि पञ्चमग्रहे शुभग्रहो भवेत् तर्हि

समराशौ शशिसितयोर्विषमे गुरुमंदभास्करावनिजाः।।
योगेऽस्मिन् गर्भगतं नूनं मिथुनं तु विज्ञेयम्।।४।।

प्रथमो योगः भवति। समराशिगतौ चन्द्रशुक्रौ तथैव विषमराशिगताः बृहस्पतिशनैश्चरसूर्यकुजाः भवन्ति तर्हि द्वितीयो योगः भवति नाम गर्भगतं मिथुनपुत्रमिति विज्ञेयम्।

लग्नेंदू वा समगौ पुंग्रहदृष्टौ च मिथुनयोगकरौ।।
तद्वज्ज्ञवक्रगुरवो बलिनः समराशिगास्तथैवोक्तम्।।५।।

अथवा समराशिस्थ लग्नचन्द्रौ पुरुषग्रहेण दृष्टश्चेत् पुत्रयोगः इति कथ्यते। एवमेव प्रकारेण बलवान् बुधः, शनिः, बृहस्पतयः च समराशौ स्थित्वा पुरुषग्रहैः दृष्टाश्चेत् पुत्रमिथुनस्य सम्भावना करणीया।

सुतयुगं यदि पुंभगतेन्दुना खचरमुत्तसिलं सुतसंभवः।।

यदि पुमाँस्तनुपः पुरुषर्क्षगः सुतभवाय यदा सनृखेचरः।।६।।

यदि पुरुषराशिस्थ चन्द्रमात् कस्यापि पुरुषग्रहस्य इत्तसालं भवेत्तर्हि पुत्रो जायते। यदि लग्नेशः पुरुषग्रहो वा पुरुषराशिगतश्चेत् पुत्रोत्पत्तिः सम्भाव्यते।

तरणिरात्मजकृत्सुतभे समे बुधहिमांशुसिता रमणीप्रदाः।।

खचरयोर्युगलं युगलं यदा पदचतुष्कगतं युगलोद्भवः।।

नरगृहे नृयुगं परथाऽन्यथा द्वितनुभे च सुता तनयद्वयम्।।७।।

सूर्योऽपि पुरुषराशिस्थ चेत् पुत्रः सम्भाव्यते। तथैव पञ्चमगृहे समराशिः एवं बुधचन्द्रशुक्राः समराशिगताश्चेत् रमणीप्रदाः, यदि द्वौ द्वौ ग्रहौ चरयोगे स्थितौ चेत् युगलसन्तानं भवेत्। परन्तु विशेषोऽयं यत् पुरुषराशिगतश्चेत् पुत्रद्वयं, स्त्रीराशिगतश्चेत् अथवा द्विस्वभावराशौ स्थिताश्चेत् कन्याद्वयं जायते।

पूर्वाह्णे भास्कराच्चंद्रे पुरस्ताद्गर्भगः सुतः।।

अपराह्णे रवेः पृष्ठे गर्भे कन्या तदा भवेत्।।८।।

पूर्वाह्णे सूर्यात् चन्द्रमा अग्रवर्ती चेत् गर्भस्थः पुत्रः, अपराह्णे सूर्यात् चन्द्रमा पृष्टवर्ती चेत् गर्भस्था कन्या इति विज्ञायते।

दक्षिणकुक्षौ वर्तुलगर्भः पुरुषः परथा रमणी मध्ये।

खण्डश्चोभयकुक्षिगगर्भश्चेद्युगलं नियतं नृपशूनाम्।।९।।

यदि दक्षिणकुक्षौ गोलाकारगर्भप्रतीतिः चेत् पुत्रः, वामकुक्षौ चेत् कन्या, उभयुकक्षौ चेत् नपुंसकः इति चिन्तनीयः। यदि उभयकुक्षौ खण्डश्चेत् युगलमिति मनुष्यपशूनां गर्भज्ञानं ज्ञेयम्।

गर्भभ्रान्तिप्रश्ने विचारः

यदात्मजेंऽगे च शुभोऽस्ति गुर्विणी स्मरांगनाथावथवा सुते तथा।।

स्मरात्मजेशौ यदि वा तनुस्थितौ तदाङ्गना गर्भवती च नान्यथा।।१।।

यदि पञ्चमलग्ने शुभग्रहो भवेत्तर्हि सा स्त्री गर्भवतीति, सप्तमेशलग्नेशौ पञ्चमगृहे अथवा सप्तमेशलग्नेशौ लग्ने स्थितौ चेत् सा स्त्री गर्भवतीति निश्चयेन कथ्यते अन्यथा चेत् गर्भविचारणमेव न स्यात्।

लग्नायपुत्रेषु शुभैर्बलान्वितैरवक्रनीचास्तगतैर्हि गुर्विणी।।

यदीन्दुलग्नाधिपती सुतस्थितौ सुतोदयर्क्षे परिपश्यतोऽथवा।।२।।

लग्नः एकादश्यां, पञ्चमस्थाने बलवान् शुभग्रहो भवेत् तथा वक्री – नीच – अस्तगतः चेत् सा स्त्री गर्भवती एव। यदि चन्द्रस्तथा लग्नाधिपतिः पञ्चमे स्थितौ अथवा पञ्चमे लग्नस्थानं वीक्ष्यते तर्हि सा गर्भवती एव।

तदाङ्गना गर्भवती यदा विधुः खलेसराफी नहि गुर्विणी तदा।।

यदांगपेन्दू हि चतुष्टयस्थितौ कृतेत्तसालौ सुतपेन गुर्विणी।।३।।

यो चन्द्रः पापग्रहेण सह इशशफयोगे भवेत्तर्हि सा गुर्विणी न भवेत् तथैव लग्नेशचन्द्रौ केन्द्रे स्थितौ अथवा पञ्चमेशेन सह इत्तसालयोगं कुर्वतः चेदपि सा गर्भवती एव।

पुत्रनाथेन चद्रांगपत्योर्दृष्टीत्तसालतः।।

आपोक्लिमे न गर्भः स्यादेवं क्षीणेन्दुयोगतः।।४।।

पञ्चमेशेन सह चन्द्रः लग्नेशस्य आपोक्लिमस्थाने दृष्टीत्तसाले स्थितश्चेत् गर्भं न स्यादेव। तथैव क्षीणयन्द्रयोगादपि वक्तव्यम्।

गर्भक्षेमप्रश्ने विचारः

व्ययपतौ शुभदृष्टयुते चतुष्टयगते नहि गर्भपरिच्युतिः।।

यदि खलास्तनयेऽशुभलग्नपे हिमकरे खलमुत्सिलिनि च्युतिः।।१।।

यदि व्ययेशो शुभग्रहैः युक्तो वा दृष्टो वा केन्द्रे स्थितश्चेत् गर्भस्य परिच्युतिः वक्तव्या तथैव यो पापग्रहः पञ्चमे लग्नेशोऽपि अशुभस्तथा पापग्रहैः सह चन्द्रः इत्तसालयोगे स्थितश्चेत् गर्भपरिच्युतिः निश्चया एव।

वक्रिपापकृतमुत्तसिलौ चेल्लग्ननाथहिमगू च्युतिहेतू।।

पुत्रपे सति शभान्वितदृष्टे सद्बले सुखमतो न विलोमे।।२।।

यदि लग्नेशचन्द्रौ वकौ अथवा पापग्रहेण युक्तौ चेत् इत्तसालयोगे गर्भस्य परिच्युतिरेव। तथैव पुत्रेशो शुभग्रहैः दृष्टो वा युक्तस्तथा शुभग्रहोऽपि बली चेत् गर्भं सुखपूर्वकं स्थिरं भवेत्। अस्मात् विपरीतो नाम उक्तयोगो न जायते चेत् गर्भं न तिष्ठत्येव।

बालानां जीवितप्रश्ने विचारः

केंद्रे व्ययेशे शुभदृष्टयुक्ते पुत्रेऽथ पूर्णे हिमगौ हि केंद्रे।।
जीवत्यथेज्यें खलदृष्टयुक्ते व्ययेऽशुभैर्दृष्टयुते न जीवेत्।।
व्ययेश्वरे पापयुते न जीवेदापोक्लिभस्थे म्रियते हि जातः।।३।।

यदि द्वादशेशः शुभग्रहैः दृष्टयुक्तः, केन्द्रे पञ्चमस्थाने पूर्णचन्द्रः केन्द्रे जीवितस्तथा बृहस्पतिः पापग्रहैः दृष्टो वा युक्तश्चेत् द्वादशगृहमापि अशुभग्रहैः दृष्टयुक्तश्चेत् न जीवत्येव। तथैव व्ययेशो पापग्रहैः युक्तो आपोक्लिमस्थाने स्थितश्चेत् जातकस्य मरणं निश्चयमिति ज्ञायते।

गर्भः कस्येति प्रश्ने विचारः

तनुसुताधिपती शुभदृग्युतौ स्वपतिगर्भ इतः परथाऽन्यतः।।
स्थिरभगैः कलुषैः स्वपतेर्भवेच्चरभगैः परतो द्वितयर्क्षगैः।।१।।

लगनेशः पञ्चमेशश्च शुभग्रहैः दृष्टो वा युक्तश्येत् स्वपतिसम्बन्धगर्भं, अन्यप्रकोरण नाम लग्नेशपञ्चमेशौ अशुभग्रहैः दृष्टौ तर्हि अन्यपुरुषसम्बन्धगर्भमिति वक्तव्यम्। यदि सः पापग्रहः स्थिरराशिगतश्चेत् स्वपतिसम्बद्धः, चरराशिगतश्चेत् अन्यपुरुषसम्बद्धः, द्विस्वभावराशिगतश्चेत्।

स्वधवजारभवो द्विलवक्रमाद्भवति गर्भ उतात्मज ईक्षणम्।।
यदि दिनेशशनैश्चरयोर्भवेन्नशुभदृक् परतोऽस्ति हि दोहदः।।२।।

स्वपतेः जारपुरुषस्य च गर्भमिति ज्ञातव्यम्। परन्तु द्विस्वभावराशिगतः यदि प्रथमहोरायां भेवत्तर्हि स्वपतिसम्बद्धः, द्वितीयहोरायां भवेत्तर्हि जारपुरुषस्य गर्भमिति ज्ञेयम् अथवा पञ्चमगृहे सूर्यशनैश्चरयोः दृष्टिश्चेत् तथा शुभग्रहदृष्टिः न भवेत्तर्हि परपुरुषाज्जातगर्भमिति मन्तव्यम्।

प्रसवप्रश्ने विचारः

तनोर्गतैर्नंदलवैर्गताः स्युर्भोग्या इह जन्ममासाः।।

बली भृगुर्यत्पदगस्तनोः स्यात्तत्तुल्यमासा यदि वा गताः स्युः।।१।।

लग्नस्य यावान् नवांशःगतश्चेत् तावान्तो गर्भस्य मासा अतीता इति, यावान् नवांशः अवशिष्टाः तावान्तो मासा शेषा इति वक्तव्याः। अथवा बलवान् शुक्रः लग्नात् यस्मिन् गृहे भवेत् तावन्तो मासा व्यतीता इत्येवं चिन्तनीयम्।

द्रेष्काणभागे च नवांशकस्य दिन भवेच्चिंतितमासकस्य।।

तनौ विनर्क्षं दिनभे वपुः पतौ दिनग्रहे जन्मदिनेऽन्यथा निशि।।

दिवानिशोश्चाधिबलस्य साम्ये बालस्य जन्माऽत्र च सन्ध्ययोः स्यात्।।२।।

लग्नस्य द्रेष्काणनवांशयोः यत् दिनमस्ति तदेव मासस्य दिनमिति कथ्यते। तदेव दिनं जन्मदिनमिति उच्यते तथैव लग्ने दिवाराशिः चेत् दिवाराशौ दिवाग्रहो स्थितश्चेत् बालकस्य जन्म दिवासमये, अन्यप्रकारेण चेत् रात्रिसमये इति दिवाबली तथा रात्र्यधिबली ग्रहो राशिश्च साम्ये स्थिते बालकस्य जन्म सन्ध्यासमये इति वक्तव्यम्।

मम भ्रात्रादयः स्वस्था न वेति प्रश्ने विचारः

यद्गृहं स्वपतिसौम्यवीक्षितं चेत्पतिश्च सुपदे सुदृष्टयुक्।।

तस्य सौख्यमभयं च तत्पतावस्तगे खलविमर्दितेऽन्यथा।।१।।

यस्य कुशलं प्रश्नकरणसमये तस्य गृहं स्वपतिना, अथवा स्वगृहाधीशग्रहशुभस्थाने शुभग्रहैः दृष्टयुक्तश्चेत् भ्रात्रादीनां सुखं तथैव निर्भयत्वञ्च कथ्यते। यदि तस्य स्थानपतिः अस्तगे, ग्रहैः पीडितस्तथा अन्यथा वक्तव्यम् नाम कुशलं यस्य पृष्टं तस्य दुःखं वा भयं वा चिन्तनीयम्।

षष्ठे शतं नाथकृतेत्तसाले षष्ठे स्थिते वापि तदीश्वरे वा।।

षष्ठे स्थिरे तद्गृहगे च पापे क्रूरेक्षिते चात्र गृहे गदार्त्तः।।२।।

यदि षष्ठेशस्तथा भ्रात्रस्थानेशश्च परस्परेत्तसालयोगे स्थितौ अथवा उभौ षष्ठमगृहे भवतः तथैव भ्रात्रादि स्थानेशः षष्टमगृहे स्थिरराशिगतश्चेत् अथवा भ्रात्रादीनां गृहे पापग्रहो अथवा भ्रात्रादीनां गृहं क्रूरगृहैः दृष्टश्चेत् रोगपीडितः इति वक्तव्यः।

तदीश्वरे पंचमलाभयाते भवेत्ततस्तद्वसतिश्च दूरम्।।

एवं सुतेशे सुतगे सुतेन योगः सुखं रोगभयं क्षतिश्च।।३।।

यदि भात्रादि स्थानेशः पञ्चमगृहे स्थिते प्रश्नकर्तृः भात्रादयः तस्मात् दूरे भवेयुः। एवमेव प्रकारेण पञ्चमगृहे स्थितश्चेत् पुत्रेणसंयोगः सुखञ्च प्राप्येत्। पूर्वोक्तरीत्या अशुभयोगश्चेत् रोगभयहानिः सम्भाव्यन्तेः।

विवाहप्रश्ने विचारः

तनोश्चेत्समे स्थान ऐनिर्वधूदः तथोजे वरप्राप्तये मंद एकः।

दशायारिधीन्दुर्दशेशार्कदृष्टो विवाहाय वा केंद्रधीभाग्यसौम्याः।।१।।

यदि लग्नात् समस्थाने शनैश्चरः स्थितश्चेत् वरपुरुषाय वधू लभ्यते। विषमस्थाने एकाकी शनैश्चरः वध्वै वरप्रदाता भवेत्। (१०/११/६/५) एतेषु स्थानेषु चन्द्रः दशमेशस्तथा सूर्येण दृष्टश्चेत् विवाहो सम्पद्यते। अथवा १/४/७/१०/५/९ एतेषु गृहेषु शुभग्रहः अस्ति चेत्

त्रयाऽस्तारिचंद्रो बुधेज्यार्कदृष्टो विवाहाय शीघ्रं खपत्या प्रदृष्टः।।

यदांगे विधुर्वार्थभाक् शुक्रदृष्टः खलाऽवीक्षितः स्त्रीप्रदश्चेच्चरर्क्षे।।२।।

चन्द्रः ३/७/६ गृहेषु स्थिते बुधबृहस्पतौ सूर्येण दृष्टश्चेत् शीघ्रमेव विवाहो सम्पद्यते। यस्मिन् लग्ने चन्द्रः दशमेशेन दृष्टो अथवा द्वितीयस्थ चन्द्रः शुक्रेण दृष्टस्तथा पापग्रहैः अदृष्टश्चेत् स्त्रीप्रदायको भवेत्।

वधूशीतगुः शुक्रदृष्टश्च केंद्रे खलाः भूरिनारीपतिः स्यात्तदा वै।

यदांगे विधुर्द्वादशेशार्कदृष्टस्तदा स्त्रीवरोद्वाह एव प्रदिष्टः।।३।।

यदि सप्तमगृहे चरराशिस्थ चन्द्रः शुक्रेण दृष्टश्चेत्, केन्द्रे पापग्रह स्थितस्तर्हि भूरिसंख्याकस्त्रीणां पतिर्भवेत् तथैव यस्मिन् लग्ने चन्द्रः द्वादशेशः सूर्येण दृष्टश्चेत् स्त्रीवरस्य विवाहकारको भवेत्।

तनुसप्तमलाभकर्मशुक्रः शुभदृष्टः सुभगांगनाप्रदः स्यात्।

तनुसप्तममुत्सिलो वधूदस्त्रिनवस्त्रीदशधीविधुप्रदृष्टः।।४।।

१/७/११/१० गृहेषु शुक्रो शुभग्रहैः दृष्टश्चेत् सुन्दरस्त्रीप्रदायको भवेत् तथैव लग्न सप्तमस्थ शुक्रः चन्द्रेण सह इत्तसालं करोति चेत् अथवा ३/९/७/१० स्थाने बलीभूय स्थितस्तथा शुभग्रहैर्दृष्टो तथा स्त्रीप्राप्तिर्भवेत्। यदि बृहस्पतिः लग्ने, सप्तमे चरराशिस्तथा ८/१/४/७/१० गृहेषु पापग्रहो न भवेत्तर्हि सुन्दरता – धन – जय – धर्मयुक्ता स्त्री लभ्यते। दशमे, सप्तमे उच्चचन्द्रः शुक्रश्च बृहस्पतिना दृष्टश्चेत् सुरूपवती।

शुभगै रमणीप्रदो यदोच्चादिशुभाः कंटकलाभगाः प्रवीर्याः।

शुभवीक्षणितास्तदांगनाप्तिर्यदि जीवो वपुषि स्मरे चरर्क्षम्।।५।।

यदि शुक्रो शुभग्रहैः दृष्टश्चेत् रमणी स्त्री लभ्यते। यदि उच्चादिशुभग्रहः १/४/७/१०/११ स्थाने बलान्वितश्चेत् शुभग्रहैः दृष्टश्चेत् स्त्रीप्राप्तिः भवेत्। यदि बृहस्पतिः लग्ने तथा सप्तमे चरराशौ

विखलेऽष्टमकंटके धनाढ्या ललिता स्त्री जय धर्मिणी प्रलभ्या।

दशसप्तगते विधौ निजोच्चे भृगुणेज्येन न वीक्षिते सुरूपा।।६।।

तथा ८/१/४/७/१० गृहेषु पापग्रहरहितश्चेत् सुन्दरधनजय धर्मयुक्ता स्त्री लभ्यते। दशमसप्तमोच्चस्थानगतः चन्द्रो शुकबृहस्पतिभ्यां दृष्टश्चेत् सुरूपवती

सधना बहुसंततिर्वधूः स्यान्मद उग्रा यदि वाऽरिभे शुभाश्च।।

मृतिमेति विवाहिता स्त्री किल जीवत्यथ सप्तमाम्बुपापैः।।७।।

सधना – सन्तानवती च बधू भविष्यति तथैव सप्तमे पापग्रहः, षष्ठमे शुभग्रहो भवेत्तर्हि विवाहिता स्त्री मरणमधिगच्छेत्। यदि जीविता चेदपि एवमेव प्रकारेण सम्भाव्या, सप्तमे पापग्रहो भवेत्तर्हि विवाहिता।

परिणीतधृतस्त्रियोः प्रणाशो यदि राहुर्मद उद्वहेत यां याम्।।

मृतिमेति मदे मदांगपौ चेत्रिलवैकोपगतौ तदा बहुस्त्री।।८।।

तथा चतुर्थस्थाने धृता स्त्री मरणमधिगच्छेताम्। यदि सप्तमे राहुः स्थितश्चेत् परिणीताः स्त्रियः म्रियन्ते। सप्तमेशलग्नेशौ एकस्मिन् द्रेष्काणे स्थितौ तर्हि बहुस्त्री सम्भाव्यन्ते।

यदि सुखं शुभवल्ललना धृता स्मरगृहं सशुभं च विवाहिता।

उभयतः खलयुक् विवधूर्भवेद्धृतविवाहितराडुभये शुभे।।९।।

यदि चतुर्थे शुभग्रहो भवेत्तर्हि धृतेति, सप्तमे शुभग्रहश्चेत् विवाहिता स्त्री तथा गृहद्वये पापग्रहश्चेत् विवधूरिति, उभयस्थानेषु शुभग्रहो भवेत्तर्हि धृतेति, विवाहितपतिर्भवेत्।

मृतिचतुष्टयलाभगते विधौ सखलमुत्तसिले यदि वा खलैः।।

मृतिचतुष्टयगैर्न वधूर्भवेत् यदि सुखे दितिजो म्रियते धृता।।१०।।

८/१/४/७/१०/११ एतेषु स्थानेषु चन्द्रः पापग्रहैः सह इत्तसालं कुर्वन् स्थितो अथवा ८/१/४/७/१० स्थानेषु पापग्रहोऽस्ति चेत् तस्मै पुरुषाय वधू नैव लभ्यते। यदि चतुर्थे राहुः भवेत्तर्हि धृता स्त्री मरणं प्राप्स्यति।

तनुगते भृणुजे तु मनोहरा सुरगुरौ सधना विदि वक्रधीः।

धरणिजे च सरुग्विधवा शनौ दिनकरे तु खरा हिमगौ जडा।।

युगशुभो दशमे च शुभास्तनौ परिणयावसरे जलवर्षणम्।।११।।

लग्ने शुक्रः स्थितश्चेत् सुन्दरी, बृहस्पतिरस्ति चेत् धनवती, बुधश्चेत् कुटिलबुद्धियुक्ता, कुजश्चेत् रोगिणी, शनैश्चरश्चेत् विधवा, सूर्यश्चेत् क्रूरस्वभावयुक्ता, चन्द्रश्चेत् मूर्खा स्त्री भवेयुः। ४/१०/११ गृहेषु शुभो भवेत्तर्हि विवाहसमये जलबर्षा सम्भाव्यते।

स्त्री सती न वेति प्रश्ने विचारः

शत्रुक्षेत्री यदा लग्नेट् स्त्रियां देवरगामिनी।।

यदैकभे पुरो भौमो लग्नाद्वा लग्ननाथतः।।१।।

यदि लग्नपतिः शत्रुक्षेत्री भूय सप्तमस्थ चेत् सा स्त्री देवगामिनी भवेत्तथा लग्नो वा लग्ननाथात्

अन्यदेशे पतिं त्यक्त्वा परेण सह तिष्ठति।।

जायेशवीक्षकैस्तुल्या जारा वाच्याः स्त्रिया मताः।।२।।

एकराशेः प्राग् कुजश्चेत् सा स्त्री अन्यदेशे पतिं त्यक्त्वा परपुरुषेण जीवेत्। सप्तमेशं दृष्टग्रहाणां तुल्यानां स्त्रीणां प्रियजारपुरुषः इति कथ्यते।

यदा कुजश्चंद्रमसागपन वा कृतेत्तसालः स्वगृहे परं भजेत्।।

कुजे स्वभे याति तदीयमंदिरं यदा सपापार्कहिमांशुमुत्सिलम्।।३।।

यो कुजग्रहः चन्द्रलग्नेशाभ्यां सह इत्तसालं करोति चेत् सा स्त्री स्वगृहे एव परपुरुषसेवां कुर्यात्। यो कुजः स्वराशिगतश्चेत् जारपुरुषस्य गृहं सा स्वयमेव याति। यदि पापग्रहो वा सूर्येण सह चन्द्रः इत्तसालं करोति चेत्

नृपेण भक्ता नृपसन्निभेन वा यदांगनेशस्य यमेन मुत्सिलम्।।

कुदासकैश्चेद्बुधशुक्रमुत्सिलं सुलेखकब्राह्मणवैश्यपूर्वकैः।।४।।

राजा अथवा राजसमीपस्थाः स्त्रीभोगमिच्छेयुः, तथैव सप्तमेशस्य शनैश्चरेण सह इत्तसालं भवेत्तथैव दासजनैः बुधशुक्राभ्याम् सह इत्तसालं भवेत्तर्हि सुलेखकः ब्राह्मणः वेश्यगामी भवेत्।

भावीत्तसाले स्मरपस्य भाविनी सदीशराफे कृतजारहारिणी।।

वपुः पतीन्द्वोर्गुरुमुत्सिले सती चतुष्टये वांकधियोर्गुरौ सती।।

खलविरहितवित्तेसद्भिरंगेन्दुसंस्थैः स्थिरगतखलखेटैः केंद्रतुगैश्च साध्वी।।५।।

यस्य सप्तमेशस्य उक्तग्रहैस्सह भाविजायमान इत्तसालः भवेत्तर्हि सा स्त्री उक्तपुरुषैस्सह भागी भेवदिति उक्तं वर्तते। तथैव सप्तमेशः शुभग्रहैः सह इशराफयोगं करोति चेत् जारुपुरषं हरतीति ज्ञायते। लग्नपतिचन्द्रयोः बृहस्पतिना सह इत्तसालं भवेत्तर्हि सा स्त्री पतिव्रता इति कथ्यते। द्वितीयगृहे न पापग्रहाः, लग्ने चन्द्रेण सह शुभग्रहः स्थितः, स्थिरराशिगतपापग्रहः स्थितः, केन्द्रे उच्चग्रहाः भवन्ति चेत् सा स्त्री साध्वी भवेत्।

कन्याशुद्धत्वप्रश्ने विचारः

स्थिरर्क्षे लग्ननाथेन्दू स्थिरलग्नं तदक्षता।।

चरर्क्षे क्षतयोनिः स्याद्यदा चंद्रो द्विमूर्तिभे।।१।।

लग्नलग्नपतिचन्द्राः स्थिरराशौ स्थिताश्चेत् सा कन्या अक्षता इति, चरराशौ स्थिताश्चेत् क्षता इति ज्ञायते। यदि चन्द्रः द्विस्वभावराशिगतश्चेत्

चरे लग्ने सदोषा स्त्री यदा केंद्रेसितेन्दुजौ।।

चंद्रदृष्टौ सदोषा स्यादथवा वृश्चिकोपगौ।।२।।

तथा लग्नः चरराशिगतस्तर्हि सा दोषवती एव। यदि केन्द्रे शुक्रबुधौ चन्द्रेण दृष्टौ चेदपि दोषवती अथवा वृश्चिकस्थ शुक्रः बुधो भवेत्तर्हि दोषवती एव।

हित्वा स्थिरं मुत्तसिलं कुजेन्द्वोर्गुप्तास्ति भुक्ता यदि मंदचंद्रौ।।

तनुस्थितौ सा प्रकटोपभुक्ताद्विदेहगो चंद्रतनू च भुक्ता।।३।।

यदि स्थिरराशिं त्यक्त्वा अन्यराशिस्थयोः कुजचन्द्रयोः इत्तसालं भवेत्तर्हि सा गुप्तभोगी भवेत्। यदि चन्द्रः शनैश्चरश्च लग्ने स्थितौ तर्हि प्रकटभोगीति, चन्द्रलग्नौ द्विस्वभागराशिसम्बन्धितस्तर्हि भोगी एव संभाव्यते।

वरप्राप्तिप्रश्ने विचारः

पुंलग्ने तनुभवयोर्जीवः कन्या लभेत वरम्।।

स्मरभवयोः सितचंद्रौ शुभदृष्टाढ्यौ वरप्रदौ स्त्रीणाम्।।१।।

पुरुषसंज्ञकलग्ने, लग्ने वा एकादशस्थाने बृहस्पतिः स्थितश्चेत् कन्यायै वरः लभ्यते। सप्तमे, एकादशस्थाने चन्द्रः शुभग्रहैः दृष्टो वा युक्तश्चेत् स्त्रीणां वरप्राप्तिः सिद्धेत्।

वधूः कीदृशीति प्रश्ने विचारः

चेज्जीवसौम्यौ सुतकंटकेषु यद्वा त्रिकोणायचतुष्टयेषु।।

सौम्यैः सुखार्थात्मजदीर्घदाया भवेद्यदा स्वोच्चभगौ कुजार्कौ।।१।।

यदि बृहस्पतिबुधौ ५/१/४/७/१० स्थाने स्थितौ ५/९/११/१/४/७/१० स्थानेषु शुभग्रहश्चेत् सुख – धन – पुत्र – दीर्घकालभाग्यवती स्त्री इति, यदि कुजशनिग्रहौ

तनौ स्मरे वित्तवती च रण्डा सुते खलैर्निःस्वकुला विसौख्या।।

शनिः स्मरेऽगेत्वसती च लग्नमृत्युस्तगैः पापखगैर्हि रण्डा।।२।।

स्वोच्चस्थाने स्थित्वा लग्नः सप्तमगृहे स्थितश्चेत् सा स्त्री धनवती, रण्डा इति कथ्यते। पञ्चमे पापग्रहश्चेत् निर्धनकुलगता सौख्यहीना इति ज्ञायते। शनिः सप्तमे लग्ने स्थितश्चेत् व्यभिचारिणी, १/८/७ स्थानेषु पापग्रहो भवेत्तर्हि सा रण्डा एव।

व्यये खलाश्चेद्विधवा षडष्टस्थेन्दौ मृतिः स्त्रीवरयोरिनाष्टे।।

तनौ विधौ सप्तमगे कुजे चेद्वरस्त्रियोः स्यान्मृतिरष्टमासकैः।।३।।

द्वादशस्थाने पापग्रहः भवेत्तर्हि स्त्री विधवा इति षष्ठमे, अष्टमे चन्द्रश्चेत् सा स्त्री वरमृत्युकारका इति ज्ञातव्या। सूर्यः अष्टमे, चन्द्रः लग्ने, कुजः सप्तमे स्थितास्तर्हि अष्टमासान्तरे वरस्त्रियोः मृत्युः निश्चयः।

चरलग्ने चरचंद्रे केंद्रे पापैर्बलान्वितैर्मदने।।

शुभयुतिवीक्षणहीने स्त्रीवरमरणं भवेच्छनैश्चरर्क्षे।।४।।

लग्नचन्द्रौ चरराशिगतौ, केन्द्रे पापग्रहो बलवान्, सप्तमगृहे शुभग्रहाणां दृष्टिराहित्येन स्त्रीवरमरणं सम्भाव्यते। लग्ने शनैश्चरस्य राशिः मकर

लग्ने भार्गवचंद्रौ पापदृशा पुंश्चली च लग्नेंदू।।

पापद्वयमध्यगतौ पापैर्दृष्टौ कुलक्षयाय वधू।।५।।

कुम्भकयोः शुक्रचन्द्रौ पापग्रहैः दृष्टौ तर्हि सा पुंश्चली इति लग्नचन्द्रौ पापद्वयग्रहाणाम्मध्ये अथवा पापग्रहैः दृष्टौ चेत् सा कुलक्षयकारिणी वधूरिति ज्ञेया।

तुष्टा स्त्री ममेष्यतीति प्रश्ने विचारः

सुखादधोऽर्के मित ऊर्ध्वगे तु तुष्टांगना नैति च वक्रशुक्रे।।

समेति शुक्रे च विनिर्गतेऽर्कान्न सैति चेत्पूर्णविधुस्तदा प्राक्।।

समेति तुष्टा च कृशे विलंबात्सुते रवौ भर्तृनिपीडिता स्त्री।।१।।

यदि चतुर्थगृहात् नीचस्थाने सूर्यः, ऊर्ध्वस्थाने शुक्रश्चेत् तुष्टाङ्गना नैवागच्छेत्। यदि शुक्रो वक्रश्चेत् आगच्छेत्। सूर्यात् शुक्रो निर्गतश्चेत् तुष्टाङ्गना नैवागच्छेत्। यदि पूर्णचन्द्रः सूर्यात् पूर्वभागे स्थितश्चेत् सा आगच्छेत्। यदि चन्द्रः क्षीणश्चेत् विलम्बेन सा आगच्छेत्। पञ्चमगृहे सूर्यश्चेत् सा स्त्री पतिना पीडिता इति चिन्तनीया।

स्त्रीपुंसोः प्रीतिप्रश्ने विचारः

चेदंगनालग्नपमुत्तसीलं प्रीतिर्यदांगास्तपयोस्तु दृष्टिः।।

पुंस्त्रीयुगप्रीतिरथांगनाथे लग्नस्थिते भर्तृनिदेशगा स्त्री।।१।।

यदि सप्तमेशलग्नेशयोः इत्तसालं भवेत् तर्हि अथवा उभौ परस्परदृष्टौ चेत् सा स्त्री पुरुषे प्रीतिदायका भवेत्। तथैव लग्ने लग्नेशः भवेत्तर्हि सा स्त्री भर्तुः आज्ञाकारिणी इति चिन्तनीया।

स्मरेंगनाथो रमणीनिदेशगा यदांगनांगाधिपती तनुस्थितौ।।

स्मरस्थितौ वा मिथ एव मित्रताद्वयोर्यदा लग्नमदेश्वरारिदृक्।।२।।

यदि लग्नेशः सप्तमे गृहे स्थितश्चेदपि स्त्री भर्तुः आज्ञाकारी भवेत्। यदि सप्तमेशलग्नेशौ लग्ने वा सप्तमगृहे स्थितौ चेत् स्त्रीपुरुषयोः मैत्री जायते। तथैव लग्नेशसप्तमेशयोः परस्परवैरिदृष्टिश्चेत्

तदाविरोधो द्वितयस्य चेत्सुखं शुभेक्षितं स्त्री धनवान् पतिर्भवेत्।।

यदा सुखं सौम्ययुतं भवेत् तदा ददाति वित्तं पतिरेव च स्त्रियै।।

मदे बलिष्ठे रमणी सवीर्या लग्ने बलिष्ठे पुरुषो बलिष्टः।।३।।

उभयोर्मध्ये विरोधो जायते। चतुर्थस्थानं शुभग्रहैः दृष्टश्चेत् धनवान् पतिर्लभेत्। यदि चतुर्थगृहं शुभग्रहैः युक्तश्चेत् पतिः स्वसम्पत्तिः सर्वं स्त्रियै दास्यति। सप्तमगृहं बलवान् चेत् सा स्त्री बलवती तथा लग्नो बलवान् चेत् पुरुषो बलिष्टो भवेत्।

विषकन्याप्रश्ने विचारः

रिपौ शुभग्रहद्वयं शुभान्यथा विषांगना।।४।।

षष्ठमगृहे शुभग्रहौ द्वौ स्थितौ चेत् सा शुभकन्या इति। यदि तथा न चेत् विषकन्या इति कथ्यते।

आगमनप्रश्ने विचारः

तनुपतिस्तनुतूर्यगतेन चेन्मुतसिलं विदधाति तथांगपः।।

कुटिलकेंद्रगतस्तनुमक्षिते स सुखमेति तदा पथिको ध्रुवम्।।१।।

यदि लग्नेशः लग्नस्य वा चतुर्थस्य वा ग्रहेण इत्तसालं कुर्यात् अथवा वक्री लग्नेशः सप्तमगृहे स्थित्वा लग्नं पश्येत्तर्हि पथिको सुखेपूर्वकमागच्छेत्।

तनुघनसहजस्थाः सर्वखेटा यदि स्युस्तदुपथिक उपैतिस्युर्यदा तत्र सौम्याः।।

हृतगतनरवस्त्वाप्तिर्यदा जीवशुक्रौ द्रुततरमुपयात्येव स्वदेशे हि पान्थः।।२।।

लग्नस्य द्वितीयतृतीयगृहेषु सर्वे ग्रहाः स्थिताश्चेत् पथिक आगच्छेत्। यदि तेषु गृहेषु केवलं शुभग्रह एव भवेत्तर्हि नष्टवस्तुनः प्राप्तिः, गतस्य आगमनं च सम्भाव्यते। यदि केवलं बृहस्पतिरेव शुक्रस्य पूर्वोक्तगृहेषु स्थितश्चेत् पथिकोऽतिशीघ्रमेव स्वगृहं यास्येत्।

कश्चिद्गृहः सप्तमगोऽरिगो वा केंद्रे गुरुश्चागमनं करोति।।

त्रिकोणगोज्ञो यदि वा भृगुः स्यात्पांथागमश्चेद्विमगुर्मृतिस्थः।।३।।

यः कोऽपि ग्रहः सप्तमे वा षष्ठगृहे वा स्थित्वा केन्द्रे बृहस्पतिरस्ति चेत् पथिक आगमिष्यति। ९/५ स्थाने बुधो वा शुक्रो वा स्थितश्चेदपि पथिकस्य पुनरागमनं निश्चयमेव। यदि अष्टमगृहे चन्द्रः,

केंद्रैर्विपापैः सुखमेति सौम्यैर्युक्तैः सलाभी सुखमभ्युपैति।।

वित्ततृतीयाष्टमधर्मसंस्थैः सौम्यैश्चरैर्मार्गगतः प्रवासी।।४।।

केन्द्रे शुभग्रहश्च पापग्रहरहितश्चेत् पथिकः लाभसहितसुखपूर्वकमागच्छेत्। २/३/८/९ गृहेषु शुभग्रहः चरराशिगतश्चेत् प्रवासीपुरुषः मार्गमध्येऽस्तीति ज्ञातव्यः।

चंद्राङ्गराण्मुत्तसिले व्ययेंऽगे समेति शीघ्रं परथा विलम्बात्।।

चंद्रे तनूजे त्रिगतेत्तसाले सप्ताष्टवित्तांबुषु वैति चंद्रे।।५।।

चन्द्रलग्नेशौ द्वादशस्थाने वा लग्ने वा स्थित्वा इत्तसालं कुरुतश्चेत् प्रवासी आगच्छेत्। यदि अन्यप्रकारेण जायते तर्हि प्रवासी विलम्बेन आगच्छेत्। पञ्चमगृहे स्थितेन चन्द्रेण सह तृतीयस्थेन ग्रहेण सह इत्तसालं भवेत् तर्हि ७/८/२/४ गृहेषु चन्द्रः स्थितश्चेत् प्रवासी आगच्छेत्।

लग्नविधू चरभे चरभांशे केंद्रसुतायसहोत्त्थशुभाश्चेत्।।

एति यदा त्रिसुतारिनवस्त्रीवक्रखगा द्रुतमागमनाय।।६।।

लग्नचन्द्रौ चरराशिगतौ वा चरराशिगतनवांशे स्थितौ १/४/७/१०/५/११/३ एतेषु गृहेषु शुभग्रहः स्थितश्चेत् प्रवासी आगमिष्यति। यदि ३/५/६/९/७ गृहेषु वक्री ग्रहः स्थितश्चेत् प्रवासी शीघ्रमागच्छेदिति ज्ञेयम्।

पृष्ठोदये लग्नगतेत्तसाले निशाकरे शीघ्रमुपैति पान्थः।।

धर्मांबुवित्तास्तपतीसराफे चंद्रे ततो मुत्तसिले समेति।।७।।

पृष्टोदयराशिस्थस्य चन्द्रस्य लग्नस्थ ग्रहेण सह इत्तसालं भवेत्तर्हि पथिको शीघ्रमागच्छेत्। ९/४/२/७ एतेषु गृहेषु स्थित स्वामिभिस्सह चन्द्रः इशराफो वा इत्तसालयोगं वा करोति चेत् प्रवासी सम्यग्रूपेण गृहमागच्छेत्।

मार्गाधिपो भस्य परे दले चेद्विदेशगो ना द्रुतमेति नूनम्।।

धर्माम्बुवित्तास्तपतीत्तसाले चंद्रे सुखाधः स्थखगेत्तसाले।।

वीर्यप्रकर्षाच्चिरकालतः स्याद्विदेशगस्थागमनं नरस्य।।८।।

यदि मार्गेशो राशेः परार्द्धे स्थितश्चेत् विदेशगतपुरुषो शीघ्ररूपेण निःसन्देहमागच्छेत् ९/४/२/७ गृहेषु स्वामिभिस्सह चतुर्थगृहात् नीचगृहे स्थितेन ग्रहेण सह चन्द्रस्य इत्तसालं भवति चेत् बलाधिक्येन अर्थात् ग्रहाणामधिकबलवशात् विदेशगतपुरुषस्य आगमनं किञ्चित् विलम्बेन सम्भाव्यते।

पान्थश्चलितो न वेति प्रश्ने विचारः

लग्नेश्वरे शीतकरे च केंद्राद्विनिर्गते केंद्रगतेसराफे।।

तनुतृतीयाष्टमगैर्ग्रहैर्वा विधौ स्मरे वा चलितः पदात् स्वात्।।१।।

लग्नेशस्तथा चन्द्रः केन्द्रात् विनिर्गत्वा अन्यस्थाने स्थितौ तथा केन्द्रस्थ राहुणा सह इशराफयोगं कुरुतश्चेत् एको योगः, १/३/८ गृहेषु समस्तगृहाः सन्ति चेत् द्वितीयो योगः, सप्तमे चन्द्रश्चेत् तृतीयो योगः भवति। एतेषु योगेषु एकस्यापि योगः भवेत्तर्हि प्रवासी स्वस्थानादागच्छेत्।

वित्ते तृतीयाष्टमधर्मसंस्थे लग्नेश्वरे मार्गगतः प्रवासी।।

चरोदये स्वामिशुभान्वितेक्षितेऽथवान्यखेटेक्षणयोगवर्जिते।।२।।

२/३/८/९ गृहेषु लग्नेशः स्थितश्चेत् प्रवासी मार्गेऽस्तीति यदि चरलग्नस्वामी वा शुभग्रहैः युक्तः दृष्टश्चेत्, पापग्रहैः अयुक्तः अदृष्टस्तर्हि नागच्छेत्।

च्युतिर्नहि स्यात्परथा भवेदथो स्थिरे तनौ नैव कदा द्विमूर्त्तिभे।।

शुभेशभूरीक्षणयोगतो नहिच्युतिः खलावीक्षणयोगतो भवेत्।।३।।

यद्यन्यप्रकारेण अर्थात् पापग्रहैः युक्तः दृष्टश्चेत् स आगमिष्यत्येव। तथैव स्थिरलग्नश्चेत् नैवागच्छेत्। यदि द्विस्वभावलग्नः स्वस्वामिना सह शुभग्रहैः पूर्णदृष्टो वा युक्तश्चेत् सो नैवागच्छेत्। यदि पापग्रहैः पूर्णदृष्टो वा युक्तश्चेत् आगमिष्यति।

किमध्वा पान्थेनातिवाहित इति प्रश्ने विचारः

तनोर्भुक्तांशकैस्तुल्यः पथिकेनातिवाहितः।।

पंथाः शेषांशकैः शिष्टश्चलितस्यैव चिन्तयेत्।।४।।

लग्नस्य भुक्तांशानां तुल्यश्चेत् मार्गः सिद्ध इति, भोग्यांशानां सदृशश्चेत् शिष्टश्चलित इति ज्ञेयः।

यदसौ गृहं नागतो हतो बद्धो नवेति प्रश्ने विचारः

मूर्तौ क्रूरे न हतो बद्धो नान्त्ये वा मदने हतबद्धः।।

यदि मृतिवपुषोर्वा मदवपुषोः पापैर्निहतो बद्धः पान्थः।।५।।

यदि मूर्तौ वा सप्तमे एकदशगृहे क्रूरग्रहः स्थितश्चेत् पथिकः न मृतः, न बद्धः इति, अष्टमे लग्ने वा सप्तमे लग्ने वा पापग्रहस्थितश्चेत् प्रवासी मृतो वा बद्धो वा इति विज्ञेयः।

कदैष्यतीति प्रश्ने विचारः

यदा लग्नतो नूनमायाति सौम्यस्तृतीयं तदाऽभ्येति पान्थो यदीन्दुः।।

विवाह स्मरं कंटकादग्रिमर्क्षं व्रजेदागमस्तत्क्षणे ह्यन्यदेशात्।।१।।

लग्नगतो शुभग्रहः यदा तृतीयगृहे प्रविशेत् तस्मिन् समये पथिकः स्वगृहमागच्छेत्। यदि चन्द्रः सप्तमगृहं त्यक्त्वा अन्यकेन्द्रात् (१/४/७/१०) अग्रिमगृहं यदा प्रविशेत् तस्मिन्नेव समये प्रवासी प्रदेशात् व्रजेत्।

लग्नाद्बली तिष्ठति यत्र गेहे कश्चिद्ग्रहस्तद्गृहसंमिताङ्काः।।

सूर्याहतास्तैर्दिवसैः समेति वक्री स चेतैः पुनरेव गन्ता।।२।।

यः कोऽपि बलवान् ग्रहः लग्नात् यस्मिन् गृहे स्थितः, तस्य गृहस्य संख्यां द्वादशेन गणनकरणे सति यावत्सु दिनेषु प्रवासी आगच्छेत्। यथा द्वितीयगृहे स्थितश्चेत् द्वितीयगृहसंख्यां द्वादशेन गणनं करणे सति चतुर्विंशति दिनाभ्यन्तरे प्रवसी आगमिष्यति। यदि स एव ग्रहो वक्री चेत् तावत्सु दिनेषु आगत्य पुनर्गच्छेत्।

यदाङ्गनेशस्तनुमेति यद्वा लग्नाधिनाथेन कृतेत्तसालः।।
तदा प्रवासी स्वगृहं समेति चरर्क्षयोगे स विशेषतश्च।।३।।

सप्तमेशः लग्ने यस्मिन् समये प्रविशेत् अथवा लग्नेशेन सह इत्तसालं कुर्यात् तस्मिन्नेव समये प्रवासी स्वगृहं प्रत्येति। तथैव चरराशियोगश्चेत् विशेषरूपेण अर्थात् चरलग्ने, लग्नेशसप्तेशौ अपि चरराशिगतौ चेत् प्रवासी सुखपूर्वकं धनसहितञ्च आगमिष्यति।

दूरस्थ एव चेज्जीवविच्छुक्राश्चरभेंऽबुनि।।
आगन्ता तत्क्षणे गेहं नात्र कार्या विचारणा।।४।।

यदि चतुर्थस्थाने चरराशसम्बन्धिताः बृहस्पतिबुध – शुक्रास्थिताश्चेत् प्रदेशे बहुदूरं गतोऽपि प्रवासी तस्मिन्नेव समये गृहं प्रत्यागमिष्यति नात्र संशयः।

स्वस्थोऽयं प्रवासी गृहमागतो न वेति प्रश्ने विचारः

चरर्क्षे चरमांशे चतुर्थे शीतदीधितिः गृहं प्राप्तः प्रवासी वा चतुर्थे स्वामिसंयुते।।५।।

चन्द्रः चतुर्थगृहे चरराशिर्वा चरराशिगतनवांशे स्थितश्चेत् प्रवासी स्वगृहं प्रत्यागमिष्यत्येव। अथवा चतुर्थगृहं स्वस्वामिना वा शुभग्रहयुक्तश्चेदपि प्रवासी स्वगृहं सम्प्राप्स्यत्येव।

सौम्यान्विते दिनातीतभोग्यं खेटगतैष्यवत्।।
यदहस्तत्र संयोगश्चंद्रतस्तत्क्षणे गृहम्।।६।।

प्रवासी कदा आगत इति प्रश्नस्य विचारः एवं करणीयः – ग्रहस्य भुक्तभोग्यसदृशानां दिनानां भुक्तभोग्यं भवति यथा चतुर्थगृहे चन्द्रस्य संयोगो यदा जातः, तस्मिन्नेव दिने प्रवासी गृहमागतवान् इति ज्ञात्वा प्रश्नस्य समयपर्यन्तं गणनं कृत्वा भुक्तदिनसंख्या उच्यते। प्रवासी आगत्य कति दिनानि जातानि, कदा

आगमिष्यति इति प्रकारेण भोग्यदिनसंख्या ज्ञायते यथा प्रश्नकुण्डल्यां चन्द्रः यस्मिन् गृहे स्थितः, तस्मात् प्रस्थाय कति दिनेषु यास्यति, तावत्सु भोग्यदिनेषु प्रवासी निजगृहमेष्यतीति ज्ञातव्यम्।

दूरस्थजीवितप्रश्ने विचारः

तनुनाथविधू षडष्टतुर्ये यदि वा नीचभगौ न चास्तगौ वा।
मृतिराङ्कृत्मुत्सिलौ सपापौ मरणायैव सुदूरगस्य नूनम्।।७।।

लग्नेशः चन्द्रश्च ६/८/४ गृहेषु नीचराशिगतौ नास्तगौ तथा अष्टमेशने सह इत्तसालं कुर्यात् अथवा पापग्रहैः युक्तश्चेत् दूरदेशगतपुरुषस्य मरणं निश्चयमेव।

यदेन्दुः सुखाधस्थवक्रीत्तसाली शुभावीक्षितो मृत्यवे चेद्विवीर्याः।।
शुभाः षण्मृतिद्वादशे पापदृष्टास्तनौ द्वौ हिमार्कौ विदेशी मृतः स्यात्।।८।।

यदि चन्द्रः चतुर्थगृहात् नीचस्थाने स्थित्वा वक्रग्रहेण सह इत्तसालं कुर्यात् अथवा शुभग्रहैः अदृष्टः चेत् दूरस्थ पुरुषस्य मरणं निश्चयमिति ज्ञातव्यम्। यो शुभग्रहः ६/८/१२ गृहेषु निर्बली भूत्वा पापग्रहैः दृष्टः, चन्द्रः सूर्यश्च लग्ने स्थितौ चेत् विदेशी मृत एव।

पृष्ठोदये पापयुते त्रिकोणे पापश्च केंद्राष्टमषष्ठसंस्थैः।।
विसदृशा मृत्युगतः प्रवासी यदा रविर्धर्मगतो गदी स्यात्।।९।।

पृष्टोदये लग्ने त्रिकोणे (१/५/९) एतेषु गृहेषु पापग्रहैः युक्तो वा १/४/७/१०/८/६ एतेषु गृहेषु पापग्रहशुभग्रहाणां दृष्टिरहितश्चेत् प्रवासी मृत एव। यो सूर्यः नवमस्थाने स्थितश्चेत् प्रवासी रोगयुक्त इति भाव्यः।

यदि शुभान्वितवीक्षितशीतगुः सुखगृहोर्ध्वगखेचरमुत्सिली।।
तदु विदेशगतः सुखकोशवान् नियतमेव हि जीवति मानवः।।१०।।

यदि चन्द्रः शुभग्रहैः युक्तो वा दृष्टस्तथा चतुर्थस्थानात् ऊर्ध्वगृहस्थ ग्रहेण सह इत्तसालं करोति चेत् विदेशगतपुरुषः सुखधनयुक्तो जीवितो भवेत्।

यात्राप्रश्ने विचारः

उदये यदि चरराशिर्द्रेष्काणे वा नवांशके लग्ने।।

यद्वा खेटे चरभे दशमाद्धष्टे प्रवासचिंता स्यात्।।१।।

लग्ने यदि चरराशिश्चेत् अथवा लग्ने चरराशिगतद्रेष्काणो वा नवांशः भवेत्तर्हि चरराशिगतग्रहः दशमगृहात् अग्रिमगृहे प्रविशेत्तथा प्रष्टुः यात्राचिन्ता करणीया।

लग्नविधू चरभे यदि सौम्यैर्दृष्टयुतौ गमनं जयलब्धिः।।

तौ स्थिरभे यदि सद्युतदृष्टौ नो गमनं स्थितितश्च जयाप्तिः।।२।।

लग्नः, चन्दश्च चरराशिगतौ सौम्यग्रहैः दृष्टो वा युक्तौ चेत् प्रष्टुः गमनं निश्चयं नाम ततः जयप्राप्तिर्भवेत्। यदि एतौ लग्नचन्द्रौ स्थिरराशिगतौ शुभग्रहैः युक्तौ दृष्टौ चेत् गमनं न समुचितम्। स्वस्थाने एव विजयप्राप्तिः भविष्यतीति ज्ञातव्यम्।

तौ द्वितनौ यदि केवलपापैर्दृष्टयुतौ कुगतेर्विनिवृत्तिः।।

विघ्नपराभवतो यदि तौ द्वौ द्व्यंगगृहे शुभवीक्षितयुक्तौ।।३।।

यदि लग्नचन्द्रौ द्विस्वभावराशिगतौ तथा केवलं पापग्रहैः दृष्टयुक्तश्चेत् यात्राकरणे कुगतिः, विघ्नानि, पराजयकारणात् निर्गमनं, यदि एतौ द्वौ लग्नचन्द्रौ द्विस्वभावराशिगतौ शुभग्रहैः दृष्टयुक्तौ चेत्

अल्पसुखार्थकरी तदु यात्रा चेत्सखलं चरभं गमने स्यात्।।

क्लेशरुजौ यदि च द्वितयाङ्गं जीवयुगर्द्धपथो विनिवृत्तिः।।४।।

यात्राकरणे स्वल्पसुखं, धनञ्च लभ्यते। पापग्रहैः युक्तः चरलग्ने स्थितौ चेत् क्लेशः, रोगश्च सम्भाव्यते। यदि द्विस्वभावलग्नः बृहस्पतिना युक्तश्चेत् अर्धमार्गात् विनिवृत्तो भवेत्।

तनौ स्थिरे चोग्ररिपुप्रदृष्टान्विते बलिष्ठे न गमोऽतिवघ्नतः।।

शीर्षोदये स्याद्गमनं स्थिरेऽपि पृष्ठोदये चंद्रतनू न यात्रा।।५।।

यो बलवान् स्थिरलग्ने स्थित्वा पापग्रहैर्वा शत्रुग्रहैर्वा दृष्टश्चेत् अतिविघ्नकारणात् गमनं न सम्भवेत्। यो शीर्षोदयराशिगतलग्नश्चेत् गन्तव्यमेव। यदि लग्नः स्थिरश्चेदपि गन्तव्यमेव। यदि चन्द्रः लग्नश्च पृष्ठोदयराशिगतौ चेत् यात्रा नैव करणीया।

पृष्ठोदये स्थिरर्क्षे तु प्रतीपं गमनं चिरात्।।

चरे शीघ्रं भवेद्यात्रा द्विस्वभावो विलम्बतः।।६।।

यो लग्नः स्थिरस्तथा पृष्ठोदयराशिगतश्चेत् शीघ्रमेव यात्रा न सम्भाव्यते अर्थात् यत्र गन्तव्यमिति विचारोऽस्ति तत्र नैव गच्छेत् अन्यत्र गमनं भवेत्। यदि चरराशिलग्नश्चेत् यात्रा सम्भाव्यते, द्विस्वभावगतश्चेत् किञ्चित् विलम्बेन जायते।

नवाधिपो लग्नपशीतगुभ्यां यदेत्तसाल्यस्ति तदैव यात्रा।

नवस्थिते लग्नपतौ विधौ वा द्रुतं गतिर्धर्मपतौ तनुस्थे।।७।।

नवमेशस्य लग्नेशो वा चन्द्रेण सह यदा कदापि इत्तसालं कुर्यात् तदा गमनमिति, यदि लग्नेशो वा चन्द्रश्च नवमगृहे स्थितौ चेत् शीघ्रं गन्तव्यमिति विज्ञेयम्। नवमेशः लग्ने

लग्नेश्वरे केंद्रतृतीयगे वा यात्रा भवेद्वा तनुधर्मपत्योः।।

लग्ने यदा मुत्तसिलं गति स्याद्धर्मांगपौ चेद्विबलौ न यात्रा।।८।।

लग्नेशः केन्द्रे वा तृतीयग्रहे स्थितश्चेत् यात्रा सम्पद्यते। यदि लग्ने लग्नेशनवमेशयोः इत्तसालं भवेत्तर्हि गमनमिति ज्ञातव्यम्। यदि नवमेशलग्नेशौ निर्बलौ चेत् यात्रा नैव सम्भाव्यते।

लग्नाधिनाथस्य च धर्मपस्य सौम्येत्तसाले च खलैस्तनुस्थैः।।

केंद्रेषु केंद्राधिपतीत्तसाले शीतांशुलग्नेश्वरयोर्न यात्रा।।९।।

लग्नेशनवमेशयोः शुभग्रहेण सह इत्तसालं भवेत्तथैव पापग्रहः लग्ने स्थितस्तथा केन्द्रे चन्द्रलग्नेशयोः केन्द्राधिपतिग्रहेण सह इत्तसालं भवेत्तर्हि पूर्वोक्तपापग्रहोऽपि लग्ने स्थितश्चेत् यात्रा नैव भवेत्।

चेदित्तसालः खललग्नपत्योर्न स्याद्गविर्वा नवमेऽप्यदृष्टे।।

धर्मोद्विधुभ्यां च खले स्मरस्थे यात्रर्थकार्यक्षयतो न यात्रा।।१०।।

यदि लग्नेशस्य पापग्रहेण सह इत्तसालं भवेत्तर्हि गमनं न भवेत्। नवमगृहं नवमेशचन्द्राभ्याम् अदृष्टः, पापग्रहः सप्तमगृहे स्थितश्चेत् गमनपुरुषस्य अर्धकार्यनाशकारणात् गमनमेव न भवेत्।

पापैर्दशस्थैर्न गतिः प्रदिष्टा स्वज्येष्ठबंध्वीश्वरयोर्निषेधात्।।

लग्नस्थितेस्तैः शुभदा तु यात्रा नास्तीह वा दौर्धरिकाख्ययोगे।।११।।

यो पापग्रहः दशमगृहे स्थितश्चेत् स्वज्येष्ठबन्धुभिः, स्वामिभिश्च निषेधात् गमनं न भवेत्। यदि स पापग्रहः लग्ने स्थितश्चेत् यात्रा शुभदायका न भवेत् अथवा लग्ने दुर्धरायोगः भवेर्तर्हि।

ज्येष्ठाधिपालस्य निषेधतोऽस्मिन् पापोद्भवे तस्कररोगभीतिः।।

त्रिषष्ठलाभेषु खला रिपूणां क्षयाय यात्रासु रसातलस्थाः।।१२।।

ज्येष्ठाधिकारिणा निषेधात् नैव गच्छेत्। यदि लग्ने पापग्रहोदयश्चेत् चोरात् रोगाद्वा भयं भवेत्। तथैव पापग्रहः ३/६/११ गृहेषु स्थितश्चेत् शत्रूणां नाशः तथा यात्रायां चतुर्थगृहे पापग्रहोऽस्ति चेत्।

मार्गान्निवृत्त्यैव चतुष्टयस्थाः पापा हि कार्यस्य विनाशनाय।।

चेन्मुत्तसीलं तनुधर्मपत्योर्दृष्टं शुभैर्मित्रदृशा सुखेन।।१३।।

मार्गात् प्रतिनिवृत्तो भवेत् तथैव केन्द्रेऽस्ति चेत् कार्यविनाशः भविष्यति। यदि लग्नेशनवमेशयोः इत्तसालयोगे शुभग्रहैः मित्रदृष्ट्या दृष्यश्चेत् सुखेन।

जयार्थसिद्धौ परथाऽन्यथा स्यात्क्रूरेऽरिपे बंधरुजो व्ययेशे।।

विलग्नपे मृत्युरथ स्मरेशे क्रूरेऽष्टपे वा रिपुचौरभीतिः।।१४।।

जयं तथा अर्थसिद्धिश्च जायते। यदि अन्यप्रकारेण भवेत्तर्हि अन्यथा फलमेव लभ्यते अर्थात् नवमेशलग्नेशयोः इत्तसालयोगराहित्यं, पापग्रहैः वैरिदृष्टिश्चेत् पराजयं, अर्थहानिश्च भवेत्। यदि षष्ठेशद्वादशेशौ क्रूरौ चेत् बन्धनरोगौ, लग्नेशः क्रूरश्चेत् मृत्युः सप्तमेशाष्टमेशौ क्रूरौ चेत् शत्रुभयं, चोरभयञ्च जायते।

व्ययाष्टगे तस्कररोगभीतिर्लग्नाधिपे चोग्रयुते मृतेर्भीः।।

शुभेऽगपे वीर्ययुते शुभं स्याल्लग्नेशधर्माधिपतीत्तसाले।।१५।।

यदि लगनेशः १२/८ स्थाने स्थितश्चेत् चोरात्, रोगात् भयं जायते। तथैव यो लग्नेशः पापग्रहैः युक्तश्चेत् मृत्युभयं भवेत्तथा शुभग्रहो लग्नेशो बलवान् भवेत् अथवा लग्नेशनवमेशयोः इत्तसालयोगं भवेत्तर्हि शुभफलं वक्तव्यम्।

चतुष्टयस्था गमनं शुभाय धने तु लाभाय सुखेऽथ सिद्ध्यै।।

चंद्रादपीत्थं प्रवेदत्फलं वा ततो वदेद्भावफलानि तत्र।।१६।।

यदि शुभग्रहः केन्द्रे स्थितश्चेत् शुभदायक इति विज्ञेयः। द्वितीये स्थिते धनलाभः, चतुर्थे सिद्धिर्भवेत्। एवं प्रकारेण चन्द्रादपि फलं वक्तव्यम्। तदनन्तरं भावफलवर्णन करणीयम्।

सौम्ये तनौ कायसुखं सुखार्थभोज्येष्टसिद्धिश्च सुखे सुखेन।।

जयार्थलाभश्च सुतेऽर्थसिद्धिः पदाम्बरप्राप्तिर्मदने धनाप्तिः।।

स्याद्वाहनाप्तिदर्शमे च कार्यसिद्धिर्भवेत्सौख्यधनार्थलाभः।।१७।।

यदि लग्ने शुभग्रहोऽस्ति चेत् शरीरसुखं, चतुर्थे सुख – अर्थ – भोज्यवस्तु – मनोरथसिद्धिश्च, पञ्चमे सुखेन विजयः, अर्थलाभश्च, सप्तमे अर्थसिद्धिः, स्थानवस्त्रादीनां प्राप्तिः, दशमे धनवाहनप्राप्तिः, एकादशे कार्यसिद्धिः, सुखधनार्थलाभो भविष्यति।

कदा चलिष्यतीति प्रश्ने विचारः

यदा नवेशस्तनुमेति यद्वा लग्नाधिनाथेन कृत्तेत्तसालः।।

प्रष्टुस्तदा स्याद्गमनं च तत्र चरर्क्षयोगे सविशेषतऽस्यात्।।१।।

यदा नवमेशो लग्ने समायाति अथवा लग्नेशेन सह इत्तसालं करोति चेत् तदा प्रष्टुः गमनं निश्चयं तथा चराराशिगतश्चेत् अर्थात् लग्नलग्नेशनवमेशाः चरराशिगतास्तर्हि विशेषरूपेण गन्तव्यम् भवति।

विश्रामप्रश्ने पौरयात्रायां विचारः

लग्नेन्दू चरभे ह्येकः स्थिरे द्वौ द्वितनौ त्रयः।।

बहवो यदि वा वाच्या विश्रामा बलवद्वशात्।।२।।

लग्नचन्द्रौ चरराशिगतौ चेत् एकः, स्थिरराशिगतौ चेत् द्वौ, द्विस्वभावगतौ चेत् त्रयः अथवा बहवो विश्रामा भवेयुः अथवा बलवता ग्रहेण विश्राम वक्तव्यः।

लग्नभोदितनंदाशात्तुर्यसप्तनवांशके।।

यत्र खेटो हितर्क्षादौ सुस्थो विश्रामकृद्भवेत्।।३।।

सुखेन सह विश्रामोऽपि लभ्यते वा इति विचारे लग्नस्य उदितनवांशके चतुर्थ – सप्तम – नवम – नवांशेषु ग्रहः मित्रराशिगतश्चेत् सुखपूर्वकविश्रामो प्राप्यते।

स च वक्री पुनर्याति योऽतीचार्याशुयानदः।।

तन्मध्यांशेषु विश्रामाः श्रेष्ठाः सौम्यैस्तदन्तरा।

पापैस्तदन्तरा दोषो बल्लवल्लग्नपात्तु वा।।४।।

यदि स ग्रहो वक्री चेत् पुनर्याति, यदि अतिचारी चेत् शीघ्रं याति। उक्त नवांशानां मध्ये मध्यस्थ नवांशेषु अर्थात् पञ्चमे, षष्ठे, अष्टमे शुभग्रहो भवेत्तर्हि मार्गे सुखपूर्वकः श्रेष्ठविरामः, पापग्रहश्चेत् दोषयुक्तं दुःखपूर्वकञ्च भवेत्। बलवतः लग्नात् विश्रामस्य स्थितिः वक्तव्या।

गन्तुरभिमुखं कः करिष्यतीति प्रश्ने विचारः।।

तनावजेऽजो गवि गौर्नृयुग्मे दिव्यांगता कर्किणि चाग्निभृत्स्त्री।।

प्रदक्षिणो कुक्कुटनिःस्वनं वा सिंहे मिलेदोतुरु कन्यकायाम्।।१।।

मेषलग्ने अजः, वृषभलग्ने गौः, मिथुने दिव्यस्त्री, कर्के अग्निभृत्स्त्री, दक्षिणभागे कुक्कुरशब्दं, सिंहे कन्यायां

वधूर्दिवाभीतककाकशब्दो वृक्षेऽथवा तौलिनि नोनकांगः।।

शिवारवो वा कपिलोऽलिराशौ नरश्च चापे सुनरो मृगे स्त्री।।२।।

वधू अथवा दक्षिणभागे भीतकवाचकशब्दं, तुलायां पूर्णाङ्गपुरुषः शिवारवः च, वृश्चिके कपिलपुरुषः, धने सुन्दरपुरुषः, मकरे नीचस्त्री वा पक्षी

नीचा चषो वा कलशे च दासी मीने च रण्डाभिमुखं प्रयातुः।।

नराङ्गनासंज्ञभसंयुतेऽङ्गेः क्रमान्नरस्त्रीकुनरा मिलन्ति।।३।।

कुम्भे दासी, मकरे नीचा स्त्री गन्तारमभियान्ति। पुरुषे स्त्रीसंज्ञकराशिगत लग्नश्चेत् क्रमेण पुरुषः, स्त्री, कुनराः मिलन्तीति ज्ञेयम्।

कस्य समीपे यातीति प्रश्ने विचारः

इत्तसाले विधेर्भानुना भूपतेश्चामरेज्येन साधोः सितेन स्त्रियाः।।

सौरिणा नीचपानां च सौम्येन वाणिज्यलेख्यादिपांडित्यभूमीभृताम्।।१।।

चन्द्रस्य सूर्येण सह इत्तसालयोगः भवेत्तर्हि राजसमागामी, बृहस्पतिना सह इत्तसालयोगश्चेत् साधुसङ्गो, शुक्रेण सह योगश्चेत् स्त्रीसमीपगः, शनैश्चरेण सह योगश्चेत् नीचपुरुषसंसर्गः, बुधेन सह योगश्चेत् वणिक्, लेखक, पण्डितसंसर्गः अथवा राजसमीपे

कुजेनैति मंत्रोग्रपापेश्वराणां समीपे प्रयात्यैनिना चेशराफे।।

विधोर्व्याश्रयेणारतः स्वेशभीतेर्दिनेशेन चोर्वीशशंकाकुलत्वात्।।२।।

कुजेन सह योगश्चेत् उग्रपापकरणशीलश्च राज्ञः समीपे निवसेत् तथैव चन्द्रस्य शनैश्चरेण सह इशराफयोगश्चेत् विशेषाश्रयः, कुजेन सह योगश्चेत् स्वस्वामिभयेन सहगमनेन राजशंकात् व्याकुलो भवेत्

खलेनेंदुजेनार्थशून्यं प्रयातीशराफे शुभैर्मध्यमार्थाय याति।।३।।

पापग्रहेन वा बुधेन सह योगश्चेत् विना प्रयोजनं तथा शुभग्रहैस्सह इशराफयोगश्चेत् मध्यमार्थाय गच्छेत्।

गतां पुनः कदैष्यतीति प्रश्ने विचारः

यदा सप्तमपो वक्री खेटो भूयात्तदागमः।।

इह नक्षत्रवक्रेण ग्रहवकं विचारयेत्।।१।।

सप्तमेशः यस्मिन् दिने वक्री भवेत् तद्दिने गतः पुरुषः पुनरागच्छेत् परन्तु तत्र नक्षत्रस्य वक्रात् ग्रहस्य वक्रविषये चिन्तनमपि करणीयम्।

मार्गफलम्

शुभस्तनुपतिर्यत्र भवेत्तस्मात्सुखार्थदः।।

लग्नेशेन्दू च जलभे पापार्त्तौ जलचारितः।।२।।

शुभग्रहो लग्नेशस्य यस्मिन् भावे भवेत् तस्मात् भावात् सुखार्थप्राप्तिर्जायते। यदि लग्नेशचन्द्रौ जलराशिगतौ पापग्रहैः पीडितौ चेत् जलचरजीवात्

सिंहे सिंहादलौ सर्पात्तूर्यपादे चतुष्पदात्।।

नृभे तस्करवैरिभ्यां भयं चाहिकुजे विषात्।।३।।

सिंहराशिगतौ चेत् सिंहात्, वृश्चिकराशिगतौ चेत् सर्पात् चतुष्पादराशिगतौ चेत्, नरराशिगतौ चेत् चोरात्, वैरात् वा, वृश्चिकस्य कुजराशिगतौ चेत् विषात्

निर्जलर्क्षे तृषाभीतिर्निरम्बुनि पदे भवेत्।।

शनिना पीडितश्चंद्रो जलाशयभयं वदेत्।।४।।

निर्जलराशिगतौ चेत् निर्जलस्थाने तृषात् भयं भवेत्। शनैश्चरेण पीडितः चन्द्रश्चेत् जलाशयात् भयं जायते।

लग्नाद्वा लग्ननाथाद्वा यावन्तः क्रूरखेचराः।।

नवमे द्वादशे वापि तत्संख्योपद्रवाः स्मृताः।।५।।

लग्नात् वा लग्नेशात् नवमदशमस्थानेषु यावन्तः क्रूरग्रहाः सन्ति तावन्तः उपद्रवाः मार्गे सम्भाव्यन्ते।

यावन्तश्च शुभा मार्गे तावन्तः सुखभोगदाः।।

क्रूरयुक्तेक्षितो मंदः सौम्यदृग्योगवर्जितः।।६।।

यावन्तो शुभग्रहाः नवमगृहे स्थिताः तावन्तः सुखभोगप्रदायकाः भवन्ति तथैव क्रूरग्रहैः युक्तो वा दृष्टस्तथा शुभग्रहैः अयुक्तो वा दृष्टः शनैश्चरः

नवस्थो रोगकृन्मृत्यौ मृत्युदः परिकीर्तितः।।

रवौ वा मंगले मृत्यौ पथि चौरभयं मृतौ।।७।।

नवमगृहे स्थितश्चेत् रोगस्तथा अष्टमे चेत् मृत्युकारको भवेत्। सूर्यकुजौ अष्टमे स्थितौ चेत् चोरात् भयं तथा अष्टमगृहे।

यावन्तः खेचरा मार्गे तावन्तः स्युरुपद्रवाः।।

कुजोऽष्टमे समंदेक्षश्चंद्र शस्त्राहतिस्तदा।।८।।

यावन्तो ग्रहाः भवेयुः तथा मार्गे तावन्त उपद्रवाः सम्भविष्यन्ति। अष्टमगृहे कुजस्तथा चन्द्रं शनैश्चरः पश्येत्तर्हि शत्रुणा मृत्युर्जायते।

चंद्रार्कयोरष्टगयोर्यमेन सदृष्टयोः शस्त्रभयं च मार्गे।।

रन्ध्रे सिते ज्ञे च सुखाप्तिरारे मन्दे भयं पापयुगीक्षिते स्यात्।।९।।

अष्टमस्थ चन्द्रसूर्यौ शनैश्चरेण दृष्टौ तर्हि मार्गे शत्रुभयं, नवमे अष्टमगृहे शुक्रबुधौ चेत् सुखप्राप्तिः, तथा पापग्रहैः युवतौ दृष्टौ शनैश्चरकुजौ चेत् भयं भवेत्।

लग्नलग्नेशयो पार्श्वे यावन्तश्च सुभग्रहाः।।

तावत्पदेषु सौख्याप्तिः परथापरथा ततः।।१०।।

लग्नस्तथा लग्नेशस्य पार्श्वे यावन्तो शुभग्रहाः भवेयुः तावत्सु स्थानेषु सुखप्राप्तिस्तथा पापग्रहश्चेत् तावत्सु स्थानेषु दुःखोपद्रवः सम्भाव्यते।

रवौ वा मंगले मृत्यौ पथि चौरभयं मृतौ।।

यावन्तः खेचरास्तावच्चौराः सिंहेऽथ चेद्रविः।।११।।

सूर्यो वा कुजः अष्टमे गृहे स्थिते मार्गे चोरभयं भवेत् तथैव अष्टमगृहे यावन्तः ग्रहाः स्थिताः तावन्तः चोराः प्रविशेयुः। यदि सिंहे सूर्यस्तथा

कुजोऽष्टमे भयं च्छेदश्चंद्रः शस्त्राहतिस्तदा।।

तनौ शुक्रे गुरौ वापि सुखं वा प्रबलेंऽगपे।।१२।।

कुजः अष्टमगृहे चेत् भयं, अङ्गच्छेदो जायते। यदि चन्द्रः कुजेन सह अष्टमे स्थितश्चेत् शास्त्रात् भयं, लग्ने बृहस्पतिर्वा शुक्रः स्थितो तथा लग्नेशो बलवान् चेत् सुखप्राप्तिर्जायते।

भृगौ वा गुरौ वांगपे वैरिचोराहवेभ्यो भयं नो भवेद्वा प्रहारः।।

पथि स्याद्भृगौ वा विधौ सप्तमस्थे वधूभिर्विलासो बलिष्ठेऽधिभोगः।।१३।।

यदि शुक्रो वा बृहस्पतिर्वा लग्नेशो वा बलवान् चेत् वैरिचोराहवेभ्यः भयं वा प्रहारं वा न स्यात्। तथैव नवमे शुक्रः, सप्तमे चन्द्रश्चेत् वधूजनैस्सह विलासस्तथा अधिकबलवान् चेत् अधिकभोगञ्च प्राप्यते।

स्वभे य ईज्यो गगने नृपालाद्गतार्थलाभो भृगुजे च लब्धिः।।

चंद्रे च सौम्ये सुखमाप्तिरुक्ता पृष्ठोदयर्क्षं खलवीक्षितं चेत्।।१४।।

स्वराशिगतः बृहस्पतिः दशमस्थने स्थितश्चेत् राज्ञः गतद्रव्यलाभः, यदि शुक्रश्चेत् धनप्राप्तिः, चन्द्रबुधौ स्थितौ चेत् सुखप्राप्तिस्तथा या पृष्टोदशराशिः पापग्रहैः दृष्टा चेत्

वधश्च बंधस्त्विह पापखेटा यदा तृतीये न शुभेक्षिताः स्युः।।

मृतौ गतोऽन्यत्र हि वा प्रवासी वान्यत्र गेहे पथ उक्तयोगे।।

मृतो यदा पापखगा हि केंद्रे शुभैरदृष्टा मुषितः स चौरैः।।१५।।

वधबन्धनकारकमिति कथ्यते। यदि तृतीयस्थाने पापग्रहः शुभग्रहैः न दृष्टश्चेत् प्रवासी मृतो वा कुत्रचित् गतो वा इति ज्ञेयम्। नवमे वा अन्यस्थाने उक्तयोगः भवेत्तर्हि प्रवासी मृत इति निश्चयः। यदि केन्द्रे पापग्रहः शुभग्रहैः अदृष्टश्चेत् स प्रवासी मार्गे चौरैः पीडितः निर्गतधनी इति कथ्यते।

पुरप्रवेशादकस्मात्फलमस्ति न वेति प्रश्ने विचार

नगरप्रवेशलग्नाद्धनपो वक्री ततोऽर्थसंसिद्ध्यै।।

न स्थित्यै त्वतिवक्री किञ्चित्स्थितिकृन्नचार्थसंसिद्ध्यै।।१।।

नगरप्रवेशकरणलग्नात् द्वितीयस्थाने स्वामिग्रहो वक्री चेत् तत्र अर्थसिद्धिस्तथा अतिवक्री चेत् स प्रदेशो न निवासयोग्य इति ज्ञेयः। किन्तु किञ्चित्समयः स्थातुं शक्यते, अर्थसिद्धिस्तु न भवेद्येव।

अतिमंदगतिः शुभकार्यकरो यदि कोशपतिस्तनुकोशभवे।।

सकलार्थकरो यदि तिग्मकरस्त्रिनवे पुनरेति कृतार्थधनः।।२।।

अतिमन्दगतिश्चेत् कार्यसिद्धिर्जायते। यदि धनेशलग्नौ द्वितीय – एकादशभावे स्थितौ अर्थसिद्धिः सम्भाव्यते। यदि सूर्यः तृतीये नवमे स्थितः तथा अर्थसिद्धिः, धनसिद्धिश्च भविष्यति।

धनपतौ सखले सुखगे गदी स्वगृहमेति मृतिं लभतेऽथवा।।

मदनगे कलहोऽत्र चतुष्टये हिमकरे सखले भवति क्षतिः।।

यदि तनुनवपेन्दवो हि केंद्रे शुभदृष्टाः शुभदा न चात्र पापाः।।३।।

यदि धनेशः पापग्रहयुक्तस्तथा चतुर्थे स्थिते रोगी भूत्वा गृहमेष्यति अथवा मृतिं लभते। यो धनेशः सप्तमे स्थिते विवादो जायते तथा केन्द्रे पापग्रहयुक्तश्चन्द्रः चेत् शरीरक्षतिः निश्चयः एव। यदि पापग्रहरहिताः लग्नेशचन्द्रनवमेशाः केन्द्रे शुभग्रहैः दृष्टाश्चेत् शुभफलमेवेति सम्भाव्यम्।

इदं स्थानं कीदृगिति प्रश्ने विचारः

शुभेन चंद्रस्य यदीशराफः पापेन वा मुत्तसिलं पदं सत्।।

यस्माद्गतं चेदशुभेशराफं शुभेत्तसालो यदि वा परस्तात्।।१।।

यदि चन्द्रस्य शुभग्रहेण सह इशराफयोगो अथवा पापग्रहेण सह इत्तसालयोगश्चेत् स्थानं शुभप्रदमेव। यदि चन्द्रस्य अशुभग्रहेण सह इशराफयोगश्चेत् पूर्वं शुभस्थानमिति तथैव शुभग्रहेण सह इत्तसालयोगश्चेत् परस्तात् कदाचित् शुभं भूयात् परन्तु तत्समयः न शुभकर इति मन्तव्यः।

अमुकपार्श्वे यामि स मिलति न वेति प्रश्ने विचारः

केंद्रस्थिते बलयुते स्मरपे स्वगेहे स्यात्संयुतिः पणफरे च निजोपगेहे।।

आपोक्लिमे च मिलनं न भवेत्परत्र संस्थः स यस्य मिलने व्रजति प्रवासी।।१।।

सप्तमेशो बलीभूय केन्द्रे स्थितश्चेत् स्वगृहप्राप्तिः, पणफरे स्थितश्चेत् स्वगृहसमीपगृहं लभ्यते तथैव आपोक्लिमस्थाने स्थितश्चेत् यं मेलितुमिच्छाम स न मिलत्येव कुत्रचित् स्थित इति ज्ञेयम्।

राज्यलाभप्रश्ने विचारः

विधुलग्नपती बलिनौ दशगौ शुभदृष्टयुतौ च तनौ दशपे।।

पदलब्धिरथांबरपो विधुना तनुपेन हि वा कृतमुत्तसिलः।।१।।

चन्द्रः लग्नेशश्च बलवन्तौ दशमगृहे शुभग्रहैः दृष्टौ वा युक्तौ तथा दशमेशः लग्ने स्थितस्तथा राज्यप्राप्तिः भवेत्। दशमेशचन्द्रयोः लग्नेशेन सह इत्तसालं भवेत्।

अथवोच्चमुखो हि शुभोंऽबरदृक् पददो यदि वा विधुलग्नखपाः।।

शुभदृष्टयुताश्च शुभा निजतुंगमुखा नियतं पदलाभकराः।।२।।

अथवा उच्चस्थानस्थ शुभग्रहो दशमगृहं पश्येत्तर्हि राज्यप्राप्तिर्भवेत्। अथवा चन्द्रलग्नेशदशमेशाः शुभग्रहैः दृष्टा वा युक्ताः चेत् तथा शुभग्रहः स्वोच्चराशौ स्थितस्तर्हि निश्चयेन राज्यप्राप्तिः भविष्यति।

बलान्विते देवगुरौ विपामरेऽथवा शुभैर्दृष्टयुते निशापतौ।।

समौजसि स्वल्पबलेऽथवा भवेत् यदाप्तिकृच्छ्रंक्रमणेन पृच्छतः।।३।।

अथवा बृहस्पतिः बलान्वितः उच्चस्थाने स्थितः न नीचस्थाने तथा शुभग्रहैः दृष्टयुक्तः, चन्द्रः समबली वा अल्पबली वा भूत्वा पृच्छकभ्रमणात् राज्यप्राप्तिर्जायते।

तनौ तनुपतिः स्वर्क्षे तुंगे वा स्वोच्चपेक्षितः।।

क्रमेण राज्यलाभाय यदा स्वांगपतिस्तनौ।।४।।

लग्ने लग्नेशः स्वराशिगतो वा उच्चस्थाने वा स्वोच्चदृष्ट्या दृष्टश्चेत् क्रमेण राज्यलाभः, तथा दशमेशः लग्नेशश्च लग्ने स्थितौ

शुभैः शेषैस्त्रिकोणा ये बलिभिः परमोन्नतिः।।

अचिंतिता स्वभादिस्थैः किञ्चिदूना प्रकीर्तिता।।५।।

शेषशुभग्रहः बलान्वितः ९/४/११ स्थाने स्थितः तर्हि विना विचारेण परमोन्नतिः भविष्यति। यदि स्वराज्यमन्दिरे स्थितौ चेत् पूर्वोक्तात् किञ्चिद् न्यूनोन्नतिः भवेत्।

मीने तनौ जीवसितान्विते बुधे भवेत्पदाप्तिश्च गुरौ चतुष्टये।।

शीर्षोदये चंद्रसितेन्दुजा युताः सुराज्यलाभो यदि कर्मपस्तनौ।।६।।

मीनलग्ने बृहस्पतिशुक्रबुधाः स्थिताश्चेत् राज्यप्राप्तिः, यदि बृहस्पतिः केन्द्रे तथा शीर्षोदयराशिषु चन्द्रशुक्रबुधाः स्थितास्तर्हिः सुराज्यप्राप्तिः भविष्यति। यदि दशमेशो लग्ने स्थित्वा

शुभेत्तसाली पददायकस्तथा खगः प्रत्दृष्टोदयगः पदप्रदः।।

यदा खभेंऽगे तनुपः स्वतुंगगः कुजः पदाप्तिर्यदि रात्रिभूपतिः।।७।।

केनापि शुभग्रहेण सह इत्तसालं करोति चेत् राज्यप्राप्तिः, एवमेव प्रकारेण कोऽपि ग्रहो हर्षावस्थितोदयश्चेत् राज्यप्राप्तिः तथैव लग्नेशो दशमे वा लग्ने स्थितस्तथा कुजः उच्चस्थाने स्थितस्तर्हि राज्यप्राप्तिरेव। यदि चन्द्रो

बली हि केंद्रे स शुभो विपामरः पदप्रदो निन्द्यविधुः कदापि नो।।

सुरेज्यलग्नेश्वररात्रिपा यदा परार्दिता अन्यनृपः पदं हरेत्।।८।।

बलान्वितः केन्द्रे शुभग्रहैस्सह नीचो न भवेत्तर्हि राज्यप्राप्तिः, यदि निन्दितचन्द्रः स्थितश्चेत् कदापि राज्यं न लभ्यते। यदि बृहस्पतिलग्नेशचन्द्राः शत्रुग्रहैर्वा पापग्रहैर्वा पीडिताश्चेत् अन्यराज्या आगत्य राज्यपदं हरेत्।

लग्नेश्वराधिष्ठिशुभर्क्षगः शुभो राज्यार्थदोऽस्तादिगतः कदापि नो।।

यदांगपोऽरिव्ययगोऽतिदुर्बलः खलयेशोभयलब्धमुत्सिलः।।९।।

लग्नेशयुक्ते शुभराशौ कोऽपि शुभग्रहोऽस्ति चेत् राज्यप्राप्तिः, अर्थप्राप्तिश्च भवेत्। यदि लग्नेशशुभग्रहौ अस्तादिगतौ तर्हि कदापि राज्यप्राप्तिः नैव भवेत्। यदि लग्नेशो निर्बलरूपेण ६/१२ भावे स्थितो अथवा दशमेशाष्टमेशाभ्यां सह इत्तसालं करोति चेत्

चतुष्टये वा निधने खलैर्युत्ते पदस्य लाभो नृपतेश्च बन्धनम्।।

व्ययाम्बरेशोग्रजमुत्सिलेंऽबरे भवेद्धि राज्ये नृपतेश्च बंधनम्।।

शनौ सुखे वा लघुतत्स्मरे तथा परत्र राज्याद्भुतमेव नश्यति।।१०।।

अथवा केन्द्रं वा अष्टमगृहं वा पापग्रहैः युक्तश्चेत् राज्यप्राप्त्यनन्तरं राज्ञः बन्धनं भवेत्। तथैव व्ययेशदशमेशयोः शनैश्चरेण सह इत्तसालं दशमगृहे भवेत्तर्हि राज्यप्राप्त्यनन्तरमपि राज्ञः बन्धनं सम्भाव्यते। शनैश्चरः चतुर्थे वा सप्तमे स्थितश्चेत् राज्यप्राप्तिः किञ्चिदेव भवेत्। किन्तु सो राजा तस्मात् राज्यात् शीघ्रमेव भ्रष्टो भवेत्।

नृपमंत्रिप्रीतिप्रश्ने विचारः

शुभदृशा तनुसप्तपमुत्सिले नृपतिमंत्रिहितत्वतनुत्तमम्।।११।।

यदि शुभदृष्ट्या लग्नेशसप्तमेशयोः इत्तसालं भवेत्तर्हि सो राजा मन्त्री च प्रेमानुरागिणौ भवतः।

राज्यं चरं स्थिरं वेति प्रश्ने विचारः

दशपतौ स्वगृहे शुभवीक्षिते सुविधुमुत्तसिले यदि वा गुरौ।।

निजभतुंगचतुष्टयगेऽथवा दशपमुत्तसिलेऽत्र पदं स्थिरम्।।१।।

यदि दशमेशः स्वगृहे शुभग्रहेण दृष्टो वा पूर्णचन्द्रेण सह इत्तसालं करोति चेत् वा बृहस्पतिः स्वराशौ वा उच्चस्थाने केन्द्रे वा द्वादशेन सह इत्तसालं भवेत्तर्हि राज्यं स्थिरं भवेत्।

भवति तत्परथापरया यदाम्बुनि खलग्नपचंद्रमुसरिफम्।।

कुचलने नतु राज्यपरिच्युतिर्यदि वपुः पतिनीचपमुत्सिलम्।।२।।

यदि पूर्वोक्तयोगादन्यथा योगश्चेत् स्थिरं न भवेत्, अन्यराज्यवशो भविष्यति। चतुर्थगृहे स्थितयोः दशमेशलग्नेशयोः चन्द्रेण सह इत्तसालयोगश्चेत् दुर्गनिष्क्रमणात् राज्यं निर्गच्छेत्। यदि लग्नेशनीचेशयोः इत्तसालयोगः चन्द्रेण सह भवेच्चेदपि

कुचलनात्पदहानिरथो खपे पदहतिर्निजनीचपमुत्सिले।।

यदि नवत्रिगतस्तनुपस्त्रिधर्मपतिमुत्तसिली नृपतारकः।।

यदाङ्गेश्वरस्त्रयंकनाथेशराफी भवेत्केंद्रगः प्राप्नुयाद्भ्रष्टराज्यम्।।३।।

कुचलनात् राज्यहानिर्जायते अथवा दशमेशस्य स्वनीचराशिना सह इत्तसालं भवेत्तर्हि राज्यहानिरेव। यदि लग्नेशो नवमे तृतीये स्थितः तृतीयेशनवमेशाभ्यां सह कुर्यात् चेदपि राज्यवृद्धिः सम्भाव्यते। यदि तृतीयेशः नवमेशेन सह इशराफयोगः करोति चेत् तथा लग्नेशः केन्द्रे स्थितस्तर्हि भ्रष्टराज्यं पुनर्लभ्यते।

मम राजदर्शनं भविष्यति न वेति प्रश्ने विचारः

लग्नेशेन दिवाकरेण यदि वा खेशेत्तसालं तदा।

भूयाद्भूपतिदर्शनं सबहुमानं लग्नलाभेशयोः।।

अन्योन्यं हितदृक् तथा मुतसिलं वाभूपतोऽर्थागमो।

वैरालोकनतश्चिरेण यदि केंद्रेऽगायपेन्दूद्भवम्।।१।।

लग्नेशेन वा सूर्येण यदि दशमेशः इत्तसालं कुर्यात्तर्हि राजदर्शनमतिगौरवेण सम्भाव्यते। यो लग्नेशो लाभेशश्च परस्परमित्रदृष्टिस्तथा उभयोः इत्तसालयोगश्चेत् राज्ञः अर्थलाभः, यदि उभयोः परस्परवैरिदृष्टिश्चेत् राजदर्शनं किञ्चित् विलम्बेन भवेत्तथा केन्द्रस्थित लग्नेशस्य चन्द्रेण सह

कंबूलं स्थिरभे चिरान्नरपतेराप्तिश्चरे चंद्रमा।
वारैकं द्वितनावुपक्षर्वशतः स्याच्चामरेज्येऽवले।।
आशाहानिरथात्र सोजसि गुरौ केंद्रे निजोच्चे नृपा।
त्पूर्णाशा विपदा स्वभे तु दलिता हृद्दे त्वकेंद्रे लघुः।।२।।

कम्बूलयोगः स्थिरराशौ भवेत्तर्हि राज्ञः बहुकालानन्तरं लाभो जायते। यदि चन्द्रः चरराशिगतश्चेत् एकवारं राजदर्शनं सम्भवेत्। यदि द्विस्वभावराशिगतश्चेत् समीपराशिवशात् राजदर्शनं भवेत्। यदि बृहस्पतिः निर्बलश्चेत् आशाहानिः, बृहस्पतिः, बलाधिक्येन केन्द्रे उच्चस्थाने स्थितश्चेत् राज्ञः आशा सम्पूर्णा भवेत्। यदि स्वराशिगतश्चेत् चतुर्थभागं कार्यं, स्वोद्धामे चेत् अर्थभागं कार्यं, केन्द्रवर्जितस्थाने स्थितश्चेत् स्वल्पाशायाः सिर्द्धि भवेत्।

जयपराजयप्रश्ने विचारः

तनुसप्तदशोपगाः शुभाश्चेत्पुरनाथस्य जयाय चेत्कुजार्की।।
नवमे किल पृच्छकस्य नेष्टौ ज्ञसितेज्या इह तज्जयाय नूनम्।।१।।

लग्नः सप्तमे दशमे च भावे शुभग्रहश्चेत् पुरराजस्य जयमिति, कुजशनैश्चरौ नवमगृहे स्थितौ तर्हि प्रष्टुः पराजयः, नवमगृहे बुधशुक्रबृहस्पतयः स्थिताश्चेत् प्रष्टुः पुरराजस्य जयं सम्भविष्यति।

त्रिसुखसुतरिपुस्त्रीमृत्युगाः सत्वगाश्चेत्पुरनृपतिविजयदाः शेषगा यातृराज्ञः।।
विजयकृत उतान्ये तु प्रभंगं दिशन्ति व्ययभवदशपापाश्चापि यातुर्भयाय।।२।।

३/४/५/६/७/८ स्थानेषु यदि शुभग्रहोऽस्ति चेत् पुरराजाय विजयमेव। शेषस्थानेषु स्थितश्चेत् गमनसिद्धाय महाराजाय विजयप्राप्तिरेव।

पापग्रहः यस्मिन् गृहे स्थितः तस्य भङ्ग एव। १२/११/१० स्थानेषु पापग्रहश्चेत् गमनसिद्धोः राजा भयावहो भवेत्।

शुभानृक्षे केंद्रे यदि शुभदृशा सन्धिरथ च वपुर्लग्नेशेशावुदितबलिनौ पौरजयदौ।।
तनौ नृक्षे सौम्या व्ययभवगताश्चापि नृपयोर्भवेत्संधिः पापैर्द्वितनुभगतैः पूर्णकलहः।।३।।

यदि शुभग्रहः पुरुषसंज्ञकराशौ केन्द्रे स्थितस्तथा शुभग्रहैः दृष्टश्चेत् उभयमेलनं सम्भवेत्। अथवा लग्नेशस्तथा लग्नेशस्य स्वामिग्रहः उदितः बलवान् चेत् पुरराजस्य विजय एव। यस्मिन् लग्ने पुरुषसंज्ञकराशिश्चेत् तथा शुभग्रहः १२/११ भवने स्थितश्चेत् उभयराजानां मेलनं सम्भवेत्। तथैव यो पापग्रहो द्विस्वभावराशिषु स्थितश्चेत् पूर्णकलहो जायते।

यदा स्त्रीस्त्रीशेशावुदितबलिनौ यायिजयदौ यदा लग्नस्त्रीशोर्मुतसिलमयुद्धं हितदृशा।।
यदा दृष्ट्या हीनं तनुमदपमुत्सर्रिफमलं रणश्चेल्लग्नेशश्चरमदगृहे वीर्यरहितः।।४।।

यदि सप्तमेशस्तथा सप्तमेशस्य स्वामिग्रहः उदितौ बलन्वितौ चेत् यायिराजस्य विजयः एव। यदि लग्नेशसप्तमेशयोः मित्रदृष्ट्या इत्तसालयोगश्चेत् युद्धं न भविष्यति। मित्रदृष्टिरहितौ लग्नेशसप्तमेशयोः इत्तसालं भवेत्तर्हि पूर्णयुद्धं तथैव लग्नेशः चरराशिगतः सप्तमगृहे निर्बलत्वेन स्थितश्चेत्

पुराधीशो वीर्योद्यमविरहितश्चेत्स्मरपतिश्चरे लग्नं यायी तदुगतसुवीर्योद्यमबलः।।
स्थिरे लग्ने लग्नेट् पुरपतिरलं वीर्यसुबलोद्यमी चैवं स्त्रीशो मदन उपरो वीर्यसहितः।।५।।

पुरराजा पराक्रमवान् तथा उद्यमरहितः इति ज्ञातव्यः। यदि सप्तमेशः चरराशिगत लग्ने स्थितश्चेत् गमनोद्युक्तः राजा वीर्योद्यमबलरहित इति ज्ञेयः। यदि लग्नेशः स्थिरलग्ने स्थितश्चेत् पुरराजा पूर्णवीर्यवान्, सुन्दरः, बलवान्, उद्यमयुक्त इति ज्ञातव्यः। एवं प्रकारेण सप्तमस्थाने स्थितश्चेत् गमनोद्युक्तः राजा वीर्ययुक्त इति ज्ञेयः।

कर्मेट् तनौ स्थायिबलं सहायं तुर्येट् स्मरे यायिबलं च तद्वत्।।
चेदम्बरात् षड्गृहेषु सौम्येंदुलग्नपाः पौरजयाय नूनम्।।६।।

यदि द्वादशेशो लग्ने स्थितश्चेत स्थायीराजस्य सेना सहायकारिणी तथैव चतुर्देशः सप्तमे स्थितः चेत् यायीराजस्य सेना सहायकारिणी भवेत्। यदि दशमस्थानात् षष्ठमगृहे शुभग्रह – चन्द्र – लग्नेशाश्चेत् पुरराजस्य जय इति निर्णेयः।

चेच्छेपषड्के विधुसप्तमेशसौम्यास्तदा यायिएतेर्जयाय।।

भौमेन्दुमन्दार्कतमस्सु लग्ने त्रिभिश्चतुर्भिर्यदि वा प्रयायी।।७।।

अवशिष्टेषु षट्गृहेषु चन्द्र – सप्तमेश – शुभग्रहाः सन्ति चेत् यायीराजस्य विजयो निश्चयः। यदि कुज – चन्द्र – शनि – सूर्य – राहुग्रहाः सर्वे वा एतेषु त्रयो वा चत्वारो वा लग्ने स्थिताश्चेत् यायीराजा

पौरं द्रुतं हन्ति मदे च पौरः प्रयायिनं चेद्गुजीवसौम्याः।

लग्ने बलाढ्या यदि वेज्यशुकौ लग्ने पुरेड् यायिबलं निहन्ति।।८।।

पुरस्थायिनं हन्ति। पूर्वोक्तग्रहाः सप्तमगृहे सन्ति चेत् पुरस्थायीराजा यायीराजानं हन्ति। यदि शुक्रबृहस्पतिबुधाः वा बृहस्पतिशुक्रौ वा बलान्वितौ लग्ने स्थितौ चेत् पुरस्थायीराजस्य हस्ते यायीराजस्य सैन्यं म्रियन्ते।

सौम्येन्दुशुक्रामरपूजितानां सर्वैस्त्रिभिर्वा स्मरगैर्बलाढ्यैः।।

यायी द्रुतं स्थायिनमेव हन्यात्सुखांबरस्थैश्च शुभैर्हि संधिः।।९।।

बुध – चन्द्र – शुक्र – बृहस्पतिग्रहाः सर्वे वा एतेषु त्रयो ग्रहाः बलान्विताः सप्तमे गृहे उपस्थिताः चेत् यायीराजः स्थायीराजनं शीघ्रमेव हन्ति। तथैव चुतर्थे दशमे गृहे शुभग्रहः स्थितश्चेत् उभयोर्मेलनं साध्यते।

तनौ च केत्वर्ककुजैः स्मरेंऽगेण्मंदेंदुभिर्वात्र विपर्ययस्थैः।।

सद्भिः प्रवीर्यैरुभयोः प्रणाशो यदा तनौ चंद्रकुजेत्तसालः।।१०।।

लग्ने केतु – सूर्य – कुजग्रहाः, सप्तमगृहे लग्नेश – शनैश्चर – चन्द्रस्तथा विपर्ययस्य रूपेण स्थिताः अर्थात् लग्ने लग्नेशशनिचन्द्राः, सप्तमे गृहे केतुसूर्यग्रहास्तथा शुभग्रहो बलन्वितस्तर्हि उभयोः महाराजयोः नाशस्तथा लग्ने चन्द्रकुजयोः इत्तसालं चेत्

पौरस्य बंधो निधनं रणे वा स्मरेऽत्र योगे किल यायिमृत्युः।।

तदा तनौ रात्रिपती रविर्वा खलेत्तसाली दृढसंगराय।।११।।

युद्धे पुरस्थायीराजस्य बन्धनं वा मरणं वा सम्भविष्यति। सप्तमगृहे योगोऽयमस्ति चेत् यायीराजः म्रियते। यदि लग्ने चन्द्रो वा सूर्यस्य पापग्रहैस्सह इत्तसालयोगः भवेत्तर्हि प्रबलयुद्धं निश्चयम्।

वक्रे बलोने प्रबले त्ववक्रे केंद्रे शनौ दैत्यसुते रणश्च।।

स्वर्क्षे स्वतुंगे च धरासुताकौं चंद्रोऽपि खे यावदहो रणः स्यात्।।१२।।

तथैव वक्रीग्रहो निर्बली तथा अवक्रीग्रहो बलवान् चेत्तथा केन्द्रे शनिशुक्रौ स्थितौ चेदपि युद्धमनिवार्यं। यदि स्वराशेः उच्चस्थाने कुजसूर्यौ तथा चन्द्रो दशमे स्थितश्चेत् यावदहः तावत् युद्धं प्रचलिष्यति।

केंद्रे स्थिरे भूमिसुते रणोऽल्पो द्यंगे चरेऽतीव लघुः प्रदिष्टः।।

दिवाकरोपग्रहमुत्तसीलं स्यात्सैनिकानां मरणं च संधिः।।१३।।

केन्द्रे स्थिराशिगत कुजोऽस्ति चेत् अल्पयुद्धं, सूर्यस्य उपग्रहः केतुः राहुणा सह इत्तसालं करोति चेत् योद्धानां मरणानन्तरं सन्धिर्जायते।

लग्ने स्थिरे स्वोच्चभगैर्बलिष्ठैः सद्भिर्विपापैश्च शुभे विलग्ने।।

शुभेत्तसाले हिमगौ रणश्चेदवाप्तिकोशौ शुभदृष्टयुक्तौ।।१४।।

लग्ने स्थिररूपेण शुभग्रहः स्वेच्चराशिगतः बली च, पापग्रहैः रहितो, शुभग्रहो लग्ने तथा चन्द्रशुभग्रहयोः इत्तसालं भवेत्तर्हि युद्धं निश्चयम्। यदि एकादशद्वितीयगृहे शुभग्रहैः दृष्टौ वा युक्तौ चेत्

पौरस्य सेनोपचयश्च रन्ध्रे युते शुभैर्दृष्टयुते च यातुः।।

लग्नस्वकर्मायगतैश्च सौम्यैः पौरस्य नूनं प्रबलः सहायी।।१५।।

पुरराजसैन्यबलं वर्धते। अष्टमपञ्चमगृहे शुभग्रहैः दृष्टौ वा युक्तौ चेत् यायीराजसैन्यबलमेधते। लग्ने द्वितीयदशमैकादशगृहेषु शुभग्रहाः स्थिताश्चेत् पुरस्थायी-राजसहायको बलवान् भवेत्।

तनुपे मृतौ मृतिपमुत्तसिले नगराधिपस्य च धने स्मरपे।।

धनपेत्तसालिनि परस्य मृतिस्तनुपोंऽत्यगश्चरगृहे प्रबलः।।१६।।

लग्नेशोऽष्टमे भावे स्थित्वा अष्टमेशेन सह इत्तसालं कुर्यात्तर्हि पुरराजमृत्युः, सप्तमेशः द्वितीयगृहे स्थित्वा धनेशेन सह इत्तसालं करोति चेत् यायीराजमृत्युः भविष्यति। तथैव नग्नेशो बलान्वितः द्वादशगृहे चरराशिगतश्चेत्

पुरपो विनश्यति विजित्य पुरा स्मरपो यदैवमितरः क्षयति।।

तनुनाथसप्तमपमध्यगतः प्रबलः खगश्च निजवर्गनरात्।।१७।।

पुरराजस्य मरणं निश्चयम्। यदि सप्तमेशो बलाधिक्येन द्वादशगृहे चरराशिगतश्चेत् यायीराजा पुरराजात् जित्वाऽपि म्रियते। लग्नेशसप्तमेशयोः यः कोऽपि बलीग्रहश्चेत् स्ववर्गपुरुषद्वारा

नृपयोश्च संधिकृदिनो नृपतेर्विधुरत्र कंचुकिन इन्दुभवः।।

बुधलेखतोऽप्यवनिज्यो नृपतो भृगुजः स्त्रियाः प्रवरतश्च गुहः।।१८।।

उभयोः महाराजयोः सन्धिकारको भवेत् अर्थात् यो सूर्यो मध्ये चेत् राज्ञः, चन्द्रो मध्ये चेत् अन्तःपुरपालकात्, बुधश्चेत् पण्डितचतुरपुरुषलेखात्, कुजश्चेत् राज्ञः, शुक्रश्चेत् स्त्रियः, राहुश्चेत् प्रवरात्

जरिस्त्रियाः शनिरथांगपतिर्वपुषि स्मरेशकृतमुत्तसिलः।।

तदु यायिराड् भवति संधिकरो मदनेऽपि वा खसुखयोस्त्वपरः।।१९।।

शनिश्चेत् वृद्धस्त्रियः सन्धिप्रबन्धो भविष्यति। यदि लग्ने स्थित्वा सप्तमेशेन सह इत्तसालं करोति चेत् यायीराजः स्वयमेव सन्धिं कुर्यात्। यदि लग्नेशः सप्तमे, दशमे, चतुर्थग्रहेषु स्थित्वा सप्तमेशोन सह इत्तसालं करोति चेत् स्थायीराजः सन्धिं कुर्यात्।

समता द्वयोरिह खले मदने सबलेंऽत्यगे च पुरपो हि धनम्।।

अपराय यच्छति विलोममतः किल यायिपः पुरमवाप्य पुनः।।२०।।

यदि सप्तमगृहे पापग्रहश्चेत् उभयराजानाम्मध्ये समता जायते। यदि

बलवान् पापग्रहो द्वादशगृहे स्थितश्चेत् पुरराजा यायीराजाय धनं दास्यति तथैव विलोमश्चेत् अर्थात् षष्टमगृहे बलवान् पापग्रहश्चेत् यायीराजः पुरमुपगम्य

प्रददाति नागरनृपाय खगः प्रबलोऽत्र यस्य फलदो न परः।।

व्ययगेंऽगपे पुरपतिर्मदपेऽरिगते परश्च हि पलायनकृत्।।२१।।

नगरराजाय धनं दास्यति। उक्तस्थानेषु यस्य ग्रहो बली स एव फलदायको भवेत्तथैव अन्यप्रकारेण नैव सिद्ध्येत्। लग्नेशो द्वादशभावे स्थितश्चेत् पुरराजा पलायनकृत, सप्तमेशो षष्टमभावे स्थितश्चेत् यायीराजः पलायनकृत् भवेत्।

अथ चारप्रश्ने विचारः

सूर्येत्तसाले विधुजे सुगुप्ताश्चाराः स्मृता भूमिसुतेशराफात्।।

ग्रहाः शशांकेन खलेन युक्तास्तदान्यवेषाः प्रचरन्ति चाराः।।१।।

चन्द्रस्य सूर्येण सह इत्तसालं भवेत्तर्हि चारपुरुषो गुप्तरूपेण भवेत्। तथैव चन्द्रस्य सूर्येण सह इशराफयोगश्चेत् ग्रहः चन्द्रः पापग्रहयुक्तश्चेत् चारपुरुषो अन्यवेषे विचरेदिति विज्ञायते।

दिग्विजयप्रश्ने विचारः

सिते तनौ सुते गुरौ सुखे बुधे त्रये रवौ।।

परैः खगैर्भवे नृपो विजित्य चैत्यरीन् द्रुतम्।।२।।

लग्ने शुक्रः, पञ्चमे बृहस्पतिः, चतुर्थे बुधः, तृतीये सूर्यः, शेषग्रहाः एकादशे स्थिताश्चेत् राजा शीघ्रमेव शत्रून् जित्वा स्वस्थानम् यास्येत्।

तनौ कुजार्की च गुरुस्तनूजे लाभेऽथ खे वित्सितयो रविः खे।।

प्रष्टुर्जयः संगरतोऽत्र योगे सितेऽष्टमे द्राग्वशमेति शत्रुः।।३।।

लग्ने कुजशनिग्रहौ, पञ्चमे बृहस्पतिः, एकादशे बुधः, दशमे शुक्रो वा सूर्यश्चेत् प्रष्टुः युद्धकरणात् विजयं सिद्ध्येत्। अस्मिन् योगे शुक्रग्रहः अष्टमे स्थितश्चेत् शत्रुः शीघ्रमेव वशं भवेत्।

शशिनि कर्मणि लग्नगते गुरौ रिपुगते तरणौ जयलब्धयः।।

उदयिवैरिगुरौ भृगुजेऽष्टमे शशिनि वा तरणौ जयलब्धयः।।४।।

चन्द्रः दशमे, बृहस्पतिः लग्ने, सूर्यः षष्ठमे गृहे स्थितश्चेत् जयप्राप्तिर्भवेत्। देववैरिगुरुः शुक्रो वा चन्द्रो, सूर्यो अष्टमे चेत् जयप्राप्तिर्जायते।

रवौ भवेऽम्बरे कुजे त्रये शनौ विधौ रिपौ।।

तनौ परेषु पृच्छको जयार्थलाभवान् भवेत्।।५।।

सूर्यः एकादशे, कुजः दशमे, शनिः तृतीये, चन्द्रः षष्ठमे, शेषग्रहाः लग्ने स्थिताश्चेत् प्रष्टुः जयं, द्रव्यलाभञ्च जायते।

आराकौं प्रबलिगुहो भवे सितज्ञौ लग्ने श्रीजयसुखालावाँस्तदा स्यात्।।

शुक्रेऽस्ते शशिनि मृतौ च केंद्रभागे तुर्येशे भवति जयर्द्धिसिद्धिलाभः।।६।।

कुजसूर्यौ बलान्वितौ राहुः एकादशे, शुक्रबुधौ लग्ने स्थितौ चेत् प्रष्टुः लक्ष्मी – जय – सुखलाभो सिद्येत्। शुक्रः सप्तमे, चन्द्रोऽष्टमे, चतुर्देशः केन्द्रे स्थितास्तर्हि जयम् तथा ऋद्धिसिद्धिलाभो सम्भाव्यते।

वपुषीज्यशुक्रविधुजैस्त्रितये शशिभौमभानुभिरलं विजयः।।

तनुगे गुरौ दशमगे तरणौ मदने विधौ भुवि बुधेऽर्थजयौ।।७।।

लग्ने बृहस्पतिबुधशुक्राः, तृतीये चन्द्रकुजसूर्याः, स्थिताश्चेत् पूर्णविजयो साध्यते। लग्ने बृहस्पतिः, दशमे सूर्यः, सप्तमे चन्द्रः, चतुर्थे बुधः स्थितास्तर्हि अर्थजयलाभो भवेत्।

पापैर्भवांबरगतैर्वपुषीज्यशुक्रौ युद्धे जयाय यदि जीवसितौ विलग्ने।।

सूर्ये चरे रिपुगृहे बलिनोः कुजास्योर्विच्छुक्रयोर्व्ययगृहे विजयाप्तिलाभः।।८।।

पापग्रहः एकादशे दशमे, बृहस्पतिशुक्रौ लग्नौ स्थिताश्चेत् युद्धो विजयं सम्प्राप्यते। यदि बृहस्पतिशुक्रौ लग्ने, सूर्यः चरराशिगतस्तथा षष्ठमे गृहे बलान्वितौ शनैश्चरकुजौ, द्वादशे बुधशुक्रौ स्थितास्तर्हि विजयः द्रव्यलाभश्च जायते।

तनौ गुरौ भास्वति लाभसंस्थे मंदे तृतीये च कुजे रिपुस्थे।।

चंद्रे सुखस्थे दशमे भृगौ च बुधेऽपि खे प्रष्टुरलं जयः स्यात्।।९।।

लग्ने बृहस्पतिः, एकादशे सूर्यः, तृतीये शनिः, षष्ठे कुजः, चतुर्थे चन्द्रः, दशमे शुक्रस्तथा बुधश्चेत् प्रष्टुः परिपूर्णविजयं सिद्येत्।

जीवे तनौ स्मरविधौ बुधशुक्रतः खे तुर्येऽथवा त्र्यरिभवेषु खलेषु तद्वत्।
खे शीतगौ भृगुविदोः सुखपुत्रयोःखे तुर्येऽथवा त्र्यरिभवेषु खलैर्जयः स्यात्।।१०।।

बृहस्पतिः लग्ने, चन्द्रः सप्तमे वा बुधः शुक्रात् दशमे वा चतुर्थे स्थिते ३/६/११ स्थानेषु पापग्रहः स्थितश्चेदपि परिपूर्णविजयः सिध्येत्। चन्द्रः दशमे, शुक्रबुधौ चतुर्थे, पञ्चमे वा दशमे, चतुर्थे वा पापग्रहः ३/६/११ स्थाने स्थितास्तर्हि विजयं सिध्येत्।

खे शीतगौ भृगुविदोः सुखपुत्रयोः षष्ठेऽर्के गुरौ वपुषि चारिभवे कुजार्क्योः।।
प्रष्टुर्जयो यदि गुहः प्रथमे शनिः खेऽर्कारौ सुखे बुधसितौ विजयस्वराज्यम्।।
लग्ने सितेऽम्बुनि बुधो मदने सुरेज्ये भौमे भवे त्रयशनौ जयवाहराज्यम्।।११।।

चन्द्रो दशमे, शुक्रबुधौ पञ्चमे चतुर्थे च, सूर्यः षष्ठमे, बृहस्पतिः लग्ने, कुजशनिग्रहौ षष्ठमे एकादशे स्थिताश्चेत् प्रष्टुः जयमेव। यदि राहुशनिग्रहौ लग्ने, सूर्यकुजौ दशमे, बुधशुक्रौ चतुर्थे स्थिताश्चेत् विजयं, धनराज्यप्राप्तिश्च जायते। लग्ने शुक्रः, चतुर्थेबुधः, सप्तमे बृहस्पतिः, एकादशे कुजः, तृतीये शनिग्रहः स्थितश्चेत् जय – वाहन – राज्यलाभो – भवेत्।

गुहो लग्ने स्वोच्चेऽतिरिपुगतयोर्मंदकुजयोः
स्वतुंगेऽर्के लाभे बुधसिधुसितैः खे पतिजयः।।
वपुर्नाथेन्दू शेच्छुभमुतसिले वित्तसुखदौ
प्रयातुर्वैलोम्यादतिभयकरौ तौ ह्यरिकुलात्।।१२।।

उच्चस्थानस्थ राहुः लग्ने, शनिकुजौ रिपुगृहे उच्चस्थानगत सूर्यः एकादशे, बुधचन्द्रशुक्राः दशमे स्थिताश्चेत् राज्यलाभो भेवत्। लग्नेशचन्द्रशुभग्रहाः इत्तसालयोगे स्थितश्चेत् राज्ञे धनं सुखप्राप्तिश्च सिद्धध्येत्। तथैव विलोमश्चेत् अर्थात् लग्नेशचन्द्रयोः पापग्रहेण सह इततसालं भवेत्तर्हि शत्रुकुलात् अतिभयं जायते।

व्यधिकृति कुजे धनस्थे नृपपृष्ठबलस्य कष्टमत्र भवेत्।।
वादानिलतो भीतिः सौरे चोरान्बुतोऽर्ककेऽग्निरुणात्।।१३।।

अधिकारहीनः कुजः द्वितीयगृहे स्थितश्चेत् राज्ञः पृष्टरक्षकसेनस्य कष्टमापद्यते। तथैव द्वितीये शनिश्चेत् विवादो तथा पवनात्, सूर्यश्चेत् अग्निस्तथा युद्धात् भयं सम्भाव्यते।

अधिकृतकुजे च कोशे नरमृत्युभयं धनेशनीचेऽस्ते।।
यानं विफलं भंगं यदि कुलचंद्रार्कयोंऽगधर्मसुते।।१४।।

यदि अधिकारयुक्तः कृजः द्वितीये स्थितश्चेत् मनुष्याणां मृत्युभयं भवेत्। तथैव धनेशो नीचो वा अस्तङ्गतश्चेत् राजगमनं निष्फलं तथा भङ्गो भवेत्। यदि कुजचन्द्रशनिग्रहाः लग्ने पञ्चमे नवमभावे स्थिताश्चेत्

प्रष्टुर्भंगाय यदांगे मंदेन्दू कुजे क्षितौ मृत्युः।।
यदि मंदारौ मृत्यौ सूर्यो लग्ने तदा रणे मृत्युः।।१५।।

प्रष्टुः भङ्गो जायते। यदि लग्ने शनिस्तथाचन्द्रः कुजेन दृष्टश्चेत् मृत्युर्भवेत्। यदि शनिकुजौ अष्टमे सूर्यः लग्ने स्थितौ चेत् युद्धे मृत्युर्भवेत्।

अत्र व्ययमृत्युस्थे चंद्रे सूर्यान्विते रणे मृत्युः।।
विधुबुधभौमा मदने यातुः पृष्ठरणे नाशः।।१६।।

तथैव अस्मिन् योगे द्वादशे, अष्टमे च चन्द्रसूर्यौ स्थितौ चेत् युद्धे मृत्युस्तथा चन्द्रबुधकुजाः सप्तमे स्थिताश्चेत् यातुः राज्ञः पृष्टयुद्धे एव नाशो भवेत्।

यदारशुक्रौ वपुषोऽरिवृद्धिः क्षुधाभयं चेत्तनुचंद्रजीवौ।।
मंदेक्षितौ स्यात्समरे प्रभंगो यदा खलाः पंचमलग्नसंस्थाः।।१७।।

यदि कुजशुक्रौ लग्ने स्थितौ राजानां वृद्धिस्तथा क्षुद्भयं तथैव यदि लग्ने चन्द्रबृहस्पती शनैश्चेरण दृष्टौ चेत् युद्धे प्रभङ्गो भवेत्। यदि पापग्रहः पञ्चमे लग्ने स्थितश्चेत्।

प्रष्टु रणे पुत्रमृतिर्यदास्ते मृत्यौ रविः शीतकरस्तनौ वा।।
रिपोर्भयात्रासवधोग्रबंधा यदा खला द्वित्रिचतुष्टयस्थाः।।१८।।

युद्धे प्रष्टुः पुत्रमरणं भवेत्। यदि सूर्यचन्द्रकुजाः सप्तमे, अष्टमे वा लग्ने स्थिताश्चेत् शत्रुभयात् त्रासः, वधः, उग्रबन्धनञ्च भवेत्। यदि पापग्रहः द्वितीये तृतीये केन्द्रे

सौम्या विवीर्या हिमगुर्मृतिस्थो रणे प्रयातुर्वधबंधभीतिः।।

सद्भिर्बलिष्ठैः सुतधर्मकेंद्रेऽनिष्टेऽपि योगे समवत्फलं स्यात्।।१९।।

स्थितस्तथा शुभग्रहो वीर्यहीनश्चेत् चन्द्रोऽष्टमे स्थितस्तथा गमनपुरुषस्य वधं वा बन्धनभयं वा सम्पद्यते। शुभग्रहः बलाधिक्येन ५/९/१/४/७/१० स्थाने उपविष्टाश्चेत् अनिष्टयोगो जायमानेऽपि समवत्फलं नाम बहुसमीचीनफलं लम्भे।

शीतांशौ मदगे रवौ तनुगते मंदारयोरष्टमे।

सौम्ये भ्रातरि मंत्रिणा सह गृहीत्वा हन्यते भूपतिः।।

सौम्यार्कौ तनुगौ स्मरे कुजविधू भंगः स्वदेशे यदा।

द्यूने मंदकुजौ तनौ रविविधू युद्धे प्रभंगस्तथा।।२०।।

चन्द्रः सप्तमे, सूर्यः लग्ने, शनिकुजौ अष्टमे, शुभग्रहः तृतीयस्थाने स्थिताश्चेत् राजा मन्त्रिसहितो मरणमेति। शुभग्रहस्तथा सूर्यश्च लग्ने, कुजचन्द्रौ सप्तमे स्थिताश्चेत् स्वदेशे भङ्गो जायते। यदि सप्तमे शनिकुजौ, लग्ने सूर्यचन्द्रौ स्थितौ चेदपि युद्धे भङ्गो जायते।

अर्काक्यरैः स्मरायात्मजनवमगतैर्लग्नगे शीतभानौ।

प्रष्टा शत्रुं निहन्यात्सचिवपुरयुतं चेद् ज्ञशुक्रौ रिपुस्थौ।।

भानुर्मृत्यौ कुजेन्दू वपुषि ससचिवार्यृक्षयोगेऽर्कमंदौ।

भौमेक्षास्तौ त्वशैषैर्बलिभिरिह शुभैर्वाहिनीनाथनाशः।।२१।।

सूर्यशनिकुजग्रहाः ७/११/५/९ स्थानेषु स्थितस्तथा चन्द्रो लग्ने स्थितश्चेत् पृच्छको शत्रुं, पुरं, मन्त्रिसमेतं हन्ति। यदि बुधशुक्रौ षष्ठमे, सूर्योऽष्टमे, कुजचन्द्रौ लग्ने, सूर्यशनिमन्त्रिसहितौ, शत्रुराशौ कुजदृष्टियुक्तश्चेत्तदा सर्वे शुभग्रहाः बलान्विताश्चेत् सेनापतेः नाशः भवेत्।

यायिनां शुभाशुभप्रश्ने विचारः

चरोदये शुभाः शुभाय यायिना परत्र नो।।

स्थिरोदयेऽपि वा शुभं निजेशदृष्टियोगतः।।१।।

चरलग्ने शुभग्रहोऽस्ति चेत् यायीपुरुषाय शुभं तथा अन्यथाऽस्ति चेत् अशुभं भवेत्। स्थिरलग्ने निजेशेन दृष्टश्चेदपि शुभफलं सिद्धेत्।

यातुनिर्वृत्तिप्रश्ने विचारः

सर्वाधिबलः खेटो यन्मितपदगो भवेत्समायातः।।

तन्मितमासैर्यातुर्विनिवृत्तिश्चात्र चरभागे।।१।।

सर्वाधिकबलवान् ग्रहः खोटगृहे स्थितश्चेत् तावत्सु मासेषु गमनपुरुषो समायाति। अथवा बलवान् ग्रहः चरराशिगत नवांशे स्थितश्चेत् पूर्वोक्तमासेष्वेव आगच्छेत्।

स्थिरभागे विनिवृत्तिः सा द्विगुणा द्व्यंगभागगे त्रिगुणा।।

यदि वा स्मरपतिवक्रे पुनरावृत्तिः प्रयातुरुद्दिष्टा।।२।।

यदि स्थिरराशिगतनवांशे स्थितश्चेत् तस्मात् द्विगुणं, द्विस्वभावराशिगतनवांशे स्थितश्चेत् पूर्वोक्तमाससंख्यायाः त्रिगुणमासे आगच्छेत्। अथवा यदा कदाचित् सप्तमेशो वक्री भवेत्तर्हि गमनपुरुषस्य आगमनं सम्भवेत्।

शत्रोशगमने श्रुते आगमनं भविष्यति न वेति प्रश्ने विचारः

इन्दुः स्थिरे चेच्च तनौ चरोदयोऽर्यनागमस्य श्रवणेऽपि चागमः।।

चरे विधुः स्याच्च तनौ स्थिरोदयो द्विषागमस्य श्रवणेऽपि नागमः।।१।।

यदि चन्द्रः स्थिरराशिगतस्तथा लग्ने चरराशोदयश्चेत् शत्रोः अनागमस्य श्रवणेऽपि आगमः भवेत्। यदि चन्द्रः चरराशिगतस्तथा लग्ने स्थिरराशिः भवेत्तर्हि शत्रोरागमनस्य वार्ता श्रवणादपि नागमिष्येत्।

भानुभानुजसितेन्दुभुवां चेदंगगश्चरगृहे खचरेन्द्रः।।

आगमं रिपुनृपस्य विदध्याद्वक्रतोऽत्र न कदापि विदध्यात्।।२।।

सूर्यशनिशुक्रबुधग्रहेषु यः कोऽपि ग्रहः चरराशिगतश्चेत् शत्रुराजस्य आगमनकारको भवेत्। यदि सः ग्रहः वक्री भवेत्तर्हि कदापि आगमनं नैव भवेत्।

स्थिरे तनौ जविशनीक्षिते गमागमौ न योगेऽत्र त्रिपंचषष्ठगाः।।

खलारिपोः संगमदा इहैव चेच्चतुर्थगा वैरिपतेर्निवृत्तये।।३।।

स्थिरलग्ने बृहस्पतिः शनिग्रहेण दृष्टश्चेत् गमनागमनं नैव साध्यतेति ज्ञातव्यम्। अस्मिन्नेव योगे तृतीये, पञ्चमे, षष्ठमे पापग्रहः भवेत्तर्हि शत्रुसंगमो भाव्यते तथा एतस्मिन् योगे चतुर्थे पापग्रहः स्थितश्चेत् शत्रुराजस्य निवृत्तिः अर्थात् पुनरागमनं भवेत्।

चेद्भानुचंद्रौ हिबुकेन चागमो रिपोः सुखास्ते च गुरुज्ञभर्भावाः।।

द्विडेति तूर्णं यदि भानुशीतगूद्विषोंऽबुगौ जीवसितौ तदेत्यरिः।।४।।

यदि सूर्यचन्द्रौ चतुर्थे स्थितौ तर्हि शत्रोरागमनं नैव भवेत्तथा बृहस्पतिबुधशुक्राः चतुर्थे सप्तमे स्थितास्तर्हि शत्रुः शीघ्रमेव समायास्यति। यदि सूर्यचन्द्रौ षष्ठमे, बृहस्पतिशुक्रौ चतुर्थे स्थितौ शुत्रोरागमनं निश्चयम्।

हिमगुर्द्वितनौ स्थिरं वपुश्चेदपि दूरागमितो निवर्ततेऽरिः।।

वपुषि द्वितनुर्विधुश्चरे चेन्नियतं चार्द्धपयो निवर्ततेऽरिः।।५।।

यदि चन्द्रः द्विस्वभावराशौ स्थिरलग्ने स्थितश्चेत् बहुदूरं गतः शत्रुरपि पुनरागच्छेत्। लग्ने द्विस्वभावराशिस्तथा चरराशिस्थ चन्द्रश्चेत् शत्रुः मार्गमध्यात् पुनर्निवृत्तो भवेत्।

द्वितनौ हिमकृच्चरं च लग्नं बलयुग्मेन तदेति वैरिभूपः।।

जयतीह यदा खलेक्षणं स्यात् प्रतिभूपस्यबलात्तिरस्कृतिः स्यात्।।६।।

द्विस्वभावराशिगतौ चन्द्रलग्नौ चरराशिगतौ तर्हि शत्रुराजा सैन्ययुग्मेनागत्य जेष्यतीति ज्ञेयम्। यदि लग्नचन्द्रौ पापग्रहेण दृष्टौ तदापि शत्रुराजस्य सैन्यं पराजयं प्राप्स्याति।

मेषवृषसिंहधनुषामेकतमेंऽगे चतुर्थे वा।।

तत्काले विनिवृत्तिर्यदि चरलग्ने रविश्च जीवो वा।।७।।

मेषवृषसिंहधनुराशिषु या काऽपि राशिः लग्ने वा चतुर्थभावे स्थिता चेत् तस्मिन् समये शत्रोरागमनं सिदध्येत्। यदि चरलग्ने सूर्यो वा बृहस्पतिरस्तिचेत् शत्रोरागमनं तथ्यम्।

शत्रोरागमनं चेत्स्थिरलग्ने भास्करिर्गुर्वाऽपि।।
नागमनं यदि तनुभाच्चंदोडुर्यन्मितैर्दिनैर्भवति।।८।।

यदि स्थिरलग्ने सूर्यो वा बृहस्पति स्थितश्चेत् शत्रोरागमनं नैव सिद्धेत्। यदि लग्नस्य राशितः चन्द्रस्य राशिः यावति संख्यायां तिष्ठेत् तावत्सु दिनेषु शत्रोरागगनं भविष्यति।

आगमनं स्याच्छत्रोर्यदि नहि मध्ये ग्रहः कश्चित्।।
द्वितये यदि वा त्रितये जीवसितौ चेत्परागमो नूनम्।।९।।

परन्तु लग्नचन्द्रराश्योर्मध्ये कोऽपि ग्रहो न भवेत् अथवा कोऽपि भवेत् तदा शत्रोरागमनं निश्चयमेव। द्वितीये तृतीये स्थाने बृहस्पतिशुक्रौ स्थितौ चेत् शत्रोरागमनं निश्चयम्।

सुते रिपौ वा यदि पापिनोऽध्वतो रिपोर्निवृत्त्यै यदि तूर्यगाः खलाः।।
पुरोपकण्ठोपगतोऽपि पीडितो निवर्तते चेत्सुतषष्ठयोः खलाः।।
पलायनायारिपतेर्यदा झषालिकुम्भकर्का भुवि वैरिधर्षणा।।१०।।

यदि पञ्चमे वा षष्ठमे पापग्रहः स्थितश्चेत् शत्रुः मार्गात् निवृत्तो भवेत्तथैव चतुर्थे पापग्रहः स्थितश्चेत् पुरसमीपमागत्य पीडितस्सन् निवृत्तो भवेत्। यदि पञ्चमे षष्ठे पापग्रहः स्थितश्चेत् शत्रुराजः पलायनं कुर्यात्। यदि मीनवृश्चिककुम्भकर्काः चतुर्थे स्थितास्तर्हि शत्रोः भयं भवेत्।

अथ संघट्टचक्रम्

क्रियादिभिर्द्वादशभिस्त्रिकोणं संघट्टचक्रं विलिखेत्सखेटम्।।
तिर्यक्तथा सन्मुखवक्रवेधो मीनाजयोर्वृश्चिकमेषयोश्च।।१।।

मेषादि द्वादशराशियुक्तं त्रिकोणसंघट्टचक्रम् लिखेत्। यो ग्रहो यस्मिन् राशौ स्थितो तम् तस्मिन् तिर्यक्, सन्मुखवक्रवेध इति कश्चते। यथा मीनमेषयोः

वृश्चिकमेषयोः एवं प्रकोरण अन्यराशीनामपि चक्रे ज्ञातव्यम्। एवं प्रकारेण नक्षत्रसंघट्टचक्रस्य विचारोऽग्रो लिख्यते।

सङ्घट्टचक्रम् (प्रथमप्रकारः)



एवं परत्रापि नृपोद्भवर्क्षं चेत्पापविद्धं समरस्तदोग्रः।।

अतोऽन्यथा सन्धिरथो यदृक्षं क्रूरैः प्रविद्धं सरणाभिलाषी।।२।।

यदि राज्ञः जन्मराशिर्वा जन्मनक्षत्रं वा पापग्रहैः विद्धश्चेत् उग्रयुद्धं सम्भवेत्। तथैव तस्मादन्यथा चेत् अर्थात् शुभग्रहैः विद्धश्चेत् सन्धिर्जायते। तथैव यस्य राशिर्वा नक्षत्रं क्रूरग्रहैः प्रविद्धश्चेत् स एव युद्धाभिलाषी भवेत्।

सङ्ग्रहचक्रम् (द्वितीयप्रकारः)



सङ्ग्रहचक्रम् (सरलीकृतरूपं)

राशयः	मेषः	वृषभः	मिथनः	कर्कः	सिंहः	कन्या	तुला	वृश्चिकः	धनुः	मकरः	कुमभः	मीनः
वेधः	मीनः वृश्चिकः	कुम्भः तुला	मकरः कन्या	धनुः सिंह	कर्कः मीनः	मिथुनः कुम्भः	वृषभः मकरः	मेषः धनुः	वृश्चिकः कर्कः	तुला मिथुनः	कन्या वृषभः	सिंहः मेषः

सौम्यैश्च सन्धीच्छुरयो विमिश्रैर्वक्रातिचारस्तगतैर्न युद्धम्।।
वाल्पं भवेदेकतमेऽपि विद्धे यदा जनुर्भेऽर्ककुजा हि मंदाः।।३।।

यो शुभग्रहैः वेधितश्चेत् सन्धिः वक्तव्या। यदि वक्र – अतिचार – अस्तगत – पापशुभग्रहैः वेधितश्चेत् युद्धं नैव भवेत्। यदि एकस्य राज्ञः जन्मराशिर्वा नक्षत्रं वा पापग्रहैः विद्धश्चेत्तथैव अन्यराजस्य न सम्बन्धितश्चेत् युद्धं स्वल्पमिति भाव्यम्। यदि जन्मराशौ वा नक्षत्रे सूर्यकुजकेतुशनैश्चराः सन्ति चेत् युद्धमिति ज्ञेयम्।

नक्षत्रसङ्घट्टचक्रम्



युद्धप्रदाश्चेद्भृगुचंद्रचांद्रिर्जावास्तु सन्धिर्यदि जन्मराशौ।।

स्वतुंगभर्क्षे सकला यदा स्त्रीमानार्थसौख्याय यदा च सर्वे।।४।।

यदि शुक्रः चन्द्रबुधबृहसतीनां राशौ स्थितश्चेत् सन्धिरनिवार्या। यदि समस्तग्रहाः स्वोच्चाराशिगताश्चेत् स्त्री, सन्मान, अर्थ, सौख्यादीनां प्राप्तिः भविष्यति। तथैव सर्वे ग्रहाः यदि

नीचारिभस्थाः श्वपचारिभीतिक्लेशप्रदाश्चेज्जननेन्दुराशेः।।

द्रेक्काणभागे ह्यशुभेः प्रविद्धे युद्धं शुभैर्व्योमचरैश्च संधिः।।५।।

नीचस्थाने वा शत्रुराशिगताश्चेत् श्वपचारिभीतिः, शत्रुपक्षात् क्लेशो भयञ्च सम्भवेत्। यदि जन्मचन्द्रराशिगतः द्रेष्काणभागः अशुभग्रहैः प्रविद्धश्चेत् युद्धं तथा शुभग्रहैः प्रविद्धश्चेत् सन्धिर्जायते।

अथ राशिसंघट्टचक्रम्

जनुर्लग्नं यस्य प्रबलनिजभोच्चस्थपतिना

प्रदृष्टं तस्याजौ जय इह विलोमे तु परथा।।

जनुर्धिष्ण्येराहुः खलखचरयुक् पामरदृशा

स्ययं वा यस्य स्याद्व्रजति समरे भंगमचिरात्।।६।।

यस्य जन्मलग्नः स्वोच्चराशिस्थ स्वामिग्रहेण दृष्टश्चेत् तस्य राज्ञः युद्धे जयं, तस्य विपरीतं तर्हि पराजयमिति सम्भाव्यते। यस्य जन्मराशौ वा नक्षत्रे राहुः पापग्रहेण युक्तस्तथा नीचदृष्ट्या दृष्टश्चेत् युद्धे शीघ्रमेव तस्य भङ्गो जायते।

यदाऽभिवृद्ध्या नृपजन्मराशौ दृष्टिः शुभस्यार्थसुखास्पदाप्तिम्।।

पापस्य च क्लेशभयार्थनाशं ददाति मिश्रा हि फलं विमिश्रम्।।७।।

यदि राज्ञः जन्मराशौ शुक्रगृहस्य पूर्णदृष्टिश्चेत् द्रव्यसुखस्थानादि प्राप्तिस्तथा पापग्रहस्य पूर्णदृष्टिश्चेत् क्लेशभयार्थनाशादयः, यदि पापशुभग्रहयोः उभयदृष्टिश्चेत् मिश्रफलमिति कथ्यते।

प्रविद्धे खलैर्युक्तदृष्टे वृषे मध्यदेशाधिपः पीड्यतेऽन्यागमेन।।

तदा चौरदुर्भिक्षभूपाग्निवादानयैः पीड्यते च प्रजा नो शुभैर्हि।।८।।

यदि वृषराशिः पापग्रहैः सिद्धो वा दृष्टयुक्तश्चेत् मध्यदेशराजः अन्यराजस्य आगमनात् पीडितो भवेत्। तथैव प्रजाः चोर – दुर्भिक्ष – राजा – अग्नि – विवाद – अनीतिभावेन पीडिताः स्युः। यदि शुभग्रहैः विद्धो दृष्टयुक्तश्चेत् फलमेतत् नैव भेवत्।

यावत्कुरुक्षेत्रकगर्गराज्यं प्रयागभूसंभलमत्र मध्यम्।।

खलैर्नृयुग्मे युतविद्धदृष्टे समागधश्चंपकगौडनाथः।।९।।

यावत् कुरुक्षेत्रगर्गराज्यप्रयागभूमिस्तथा संभलदेशः तावत् मध्यदेश इत्युच्यते। यदि मिथुनं पापग्रहैः विद्धः दृष्टयुक्तश्चेत् मगधचम्पकगौडदेशराजाः

निपीड्यतेऽन्यागमतश्च लोकमहर्घरुग्दस्युभिरन्यथा नो।।

खलैः प्रविद्धेक्षितयुक्तकर्के कलिंगचक्रांगतिलिंगभूपः।।१०।।

अन्यराजस्य आगमनेन, प्रजापि महर्षचोररोगदस्यु इत्यादिभिः पीडिता भवेयुः। अन्यथा शुभग्रहैः विद्धो वा दृष्टयुक्तश्चेत् फलमेतद् नैव साध्यते। यदि कर्कः पापग्रहैः विद्धो वा दृष्टयुक्तश्चेत् कलिङ्गचक्राङ्गत्रिलिङ्गदेशराजाः

निपीड्यते कोशलकादिभिर्जनो महर्घरोगैश्च शुभैरतोऽन्यथा।।

खलैः प्रविद्धेक्षितयुग्मृगाधिपे निषादकर्णाटकविन्ध्यभूपतिः।।११।।

कोशलदेशादि राजभिस्तथा प्रजाः महर्षरोगादिभिः पीडिता स्युः। तथैव शुभग्रहैः विद्धश्चेत् फलमेतत् न लभ्यते। यदि सिंहः पापग्रहैः विद्धो वा दृष्टयुक्तश्चेत् निषादकर्णाटक विन्ध्याचलदेशराजाः

निपीड्यते रुग्रिपुतोऽन्यथाशुभैः खलैश्च विद्धा सहितेक्षिता वधूः।।

तदामहर्घारिरुजा निपीड्यते समालवश्चित्रनृपोऽन्यथा शुभैः।।१२।।

रोगस्तथा शत्रुभिः पीडिताः भवेयुः। शुभग्रहेण यदि विद्धश्चेत् फलमेतत् न भवेत्। यदि कन्या पापग्रहैः विद्धा वा दृष्टयुक्ता चेत् महर्घशत्रुरोगादिभिः मालवचित्रदेशराजाः पीडिताः भवेयुः। तथैव शुभग्रहैः विद्धश्चेत् फलमेतत् न भवेत्।

प्रविद्धे खलैर्युक्तदृष्टे तुलर्क्षे मरूगुर्जरेट् पुष्करेट् पीड्यते च।।

अदृष्टैश्च दंतावलैरत्र सौम्यैर्विलोमं खलैर्युक्तविद्धेक्षितेऽलौ।।१३।।

यदि तुलाराशिः पापग्रहैः विद्धो वा दृष्टयुक्तश्चेत् मारवाडगुर्जरपुष्करदेशराजाः अदृष्टखलैः पीडिताः भवेयुः। यदि शुभग्रहैः विद्धो वा दृष्टयुक्तश्चेत् विलोमफलमिति ज्ञेयम्। यदि वृश्चिकराशिः पापग्रहैः विद्धो वा दृष्टयुक्तश्चेत्

महर्घारिरोगौर्वितस्ताख्यसिंधुक्षमाशोभतीट् पीड्यतेऽन्यैर्विलोमम्।।

प्रविद्धे खलैर्युक्तदृष्टे च चापे खुरासांतुरक्केट् महर्घारिरोगैः।।१४।।

महर्घशत्रुरोगादिभिः वितस्तासिन्धुदेशराजास्तथा गोमनीनदीश्वरः पीडितो भवेत्तथा शुभग्रहैः विद्धो वा युक्तश्चेत् विलोमफलम् अर्थात् शुभफलमेव

लभ्येत्। यदि धनुराशिः पापग्रहैः विद्धो वा दृष्टयुक्तश्चेत् खुरासानतुरकिस्तानदेशराजाः महर्घशत्रुरोगादिभिः

परैः पीड्यतेन्यैः शुभं विद्धदृष्टान्विते पामरैरत्र नक्रेऽरिभूपात्।।

सकाश्मीरजालंधरेट् मध्यपालस्तथा पीड्यतेऽन्यैश्चसौख्यार्थलाभः।।१५।।

तथैव अन्यराजैः पीडिताः स्युः। यदि शुभग्रहैः विद्धश्चेत् शुभफलमिति सम्भाव्यम्। यदि मकरः पापग्रहैः विद्धो वा दृष्टयुक्तश्चेत् शत्रुराजात् काश्मीरजालधरमध्यदेशराजाः पीडिताः स्युः। तथैव शुभग्रहैः विद्धश्चेत् सौख्यार्थलाभो भवेत्।

कुंभे खलैर्विद्धयुतेक्षिते स्यात्कुलूत्तकेदारखसोत्तरेशान्।।

अरातिरागैस्तपनं हि सौम्यैः सुखार्थवृद्धिश्च खलैः प्रविद्धे।।१६।।

यदि कुम्भराशिः पापग्रहैः विद्धो वा दृष्टयुक्तश्चेत् कुलूत्तकेदारखसोत्तरदेशराजाः शत्रुभयेन, रोगभयेन च तप्यन्ते। यदि शुभग्रहैः विद्धश्चेत् सुखवृद्धिः, अर्थवृद्धिश्च जायते।

मीने च दृष्टे सहिते हिमाद्रिर्निपीड्यतेऽन्यैश्च समृद्धिमेति।।

मेषे खलैर्विद्धयुतेक्षिते वै नैपालगंगातटतीरभुक्तीट्।।१७।।

यदि मीनराशिः पापग्रहैः विद्धो वा दृष्टयुक्तश्चेत् हिमालयराजः पीडितो भवेत्। यदि शुभग्रहैः विद्धश्चेत् समृद्धिं प्राप्नुयात्। यदि मेषराशिः पापग्रहैः विद्धो वा दृष्टयुक्तश्चेत् नैपालगङ्गातटसमीपवर्तिनां राजानः

प्रपीड्यतेऽलं सरयूपसंस्थितैः शुभैः समर्घार्थधनैः प्रवर्द्धते।।

यद्राशिवेधी खलयुक् तमोऽथवा शनिर्हि तद्देशनृपादिनाशकः।।१८।।

सरयूनदीतीरराजानाम् आगमनात् पीडिताः स्युः। तथैव शुभग्रहैः विद्धश्चेत् समर्घ – अर्थ – धनवृद्धिः भवेत्। यस्य राशिवेधितकरणे रतः राहुर्वा शनिः पापग्रहैः युक्तश्चेत् तस्य देशराजः नाशनमेति।

चारातिवक्राद्रविजः कुजश्च केतुर्गतिस्पर्शनदर्शनाच्च।।

उत्काभिघाताद्ग्रहणाद्रवींद्वोश्चारात्तमः पीड्यतीह धिष्ण्ये।।१९।।

चरराशेः अतिवक्रकारणेन शनिकुजकेतुस्तथा गतेः स्पर्शनदर्शनेन, सूर्यचन्द्रयोः ग्रहणवशात्, राहुः कृत्तिकानक्षत्रे वा मेषात् स्वचारद्वारा नक्षत्रं वा राशिं वा पीडयेत्।

कृशानुधिष्ण्यात्क्रियतोऽथवापि क्रूरग्रहाणामुडुपीडनेन।।

क्षत्रस्य भंगः खलु मध्यदेशात्खण्डस्य च द्वादशमे विभागे।।२०।।

क्रूरग्रहस्य नक्षत्रात् वा राशिपीडाद्वा मध्यदेशस्य कस्यापि खण्डस्य द्वादशभागं क्षत्रभङ्गं भवेत्।

अथ कोटचक्रम्

त्रिनाडिचक्रे चतुरस्र आयते शैवीक्रमात्कोटभतोऽन्तरा न्यसेत्।।

बहिश्च कोटेतरमध्ययोस्ततो विनिर्गमोऽभ्यन्तरकोटबाह्यतः।।१।।

त्रिनाडिसहिते चतुरस्रायने चक्रस्थापने सति तस्यान्तः ईशान्यदिशि कोटस्य नक्षत्रगृहस्य अन्तः क्रमेण नक्षत्राणां स्थापनेन कोटस्याभ्यन्तरे बहिः विनिर्गमस्तथा कोटस्य बहिर्भागे मध्यभागे प्रवेशः एवं रीत्या चक्रं लेखनीयम्।

कोटचक्रम्

ईशानम्				पूर्वा				आग्नेयः	
	कृत्ति			अश्लेषा				मघा	
		रोहिणी		पुष्या			पू.फा		
			मृग	पुनर्वसु		उ.फा			
				आर्द्रा					
उत्तरा	भरणि	अश्विनि	रेवती	उ.भा	मध्य	हस्	चित्रा	स्वाति	विशाखा	दक्षिणा
				पू.षा					
			पू.भा	उ.षा		मूला			
		शतभि		अभिजित्			ज्येष्ठा		
	घनिष्ठा			श्रवण				अनुरा	
वायव्या				पश्चिमा				नैऋत्यम्	

इति क्रमादत्र तु वक्रिणो यदा सुरेज्यभौमज्ञसिताः पुरा क्रमात्।।

प्रभंगदा स्युर्जलदिक्क्रमादिम तु रक्षका वक्रिण एव संततम्।।२।।

यदि अस्मिन् चक्रे बृहस्पतिकुजबुधशुक्रग्रहाः वक्राश्चेत् क्रमेण पूर्वादि दिक्षु भङ्गो जायते। तथा पश्चिमादि दिक्षु निरन्तररक्षां कुर्वन्ति।

यदा रविर्मंदयुतो न भंगदाः स्मृता इमे वेष्टकभूपतिर्यदा।।

प्रवेशभे संगरमारभेत्तदा जयी भवेन्निर्गमभे च तत्परः।।३।।

यदि सूर्येशो नियुक्तश्चेत् पूर्वोक्तः वक्री ग्रहो भङ्गं नैव कुर्यात्। यदि वेष्टकभूपतेः प्रवेशनक्षत्रे युद्धं प्रारम्भ्यते चेत् विजयमेव। तथैव निर्गमनक्षत्रे क्रियते चेत् तस्य शत्रोः विजयोऽनिवार्यः।

अन्तः सौम्या बहिः क्रूरा यायिनो भंगनाशदाः।।

परथा दुर्गभंगाय पापाश्चेद्बाह्यकोटके।।४।।

मध्यभागे शुभग्रहो बाह्यभागे क्रूरग्रहः स्थितश्चेत् यायीराजस्य भङ्गस्तथा नाशो जायते। यदि अन्यप्रकारेण जायते तर्हि दुर्गभङ्गो भवेत्। यदि पापग्रहः दुर्गस्थानात् बहिः

अन्तः शुभास्तदा खण्डो दुर्गभंगो न जायते।।

बाह्यकोटे शुभाः पापा मध्ये दद्यात्पुरेट् गढम्।।५।।

तथा शुभग्रहो अन्तः स्थिते दुर्गस्य खण्डो भवेत् भङ्गो न भवेत्। यदि शुभग्रहो बहिर्भागे तथा पापग्रहोऽन्तः स्थिते पुरेशो गढम् दद्यात् इति ज्ञेयम्।

यदा कोटे शुभाः पापा बहिरन्तर्द्वयोः क्षयः।।

बाह्ये मध्ये खलाः कोटे तदा खंडरणो समौ।।६।।

यदि दुर्गस्य बहिरन्तः स्थानेषु शुभपापग्रहौ स्थितौ तथा उभयराजयोः नाशो भवेत्। यदि दुर्गस्य बहिरन्तःस्थानेषु केवलपापग्रहश्चेत् अखण्डयुद्धं भवेत्। परन्तु उभावपि राजस्थाने एव तिष्ठेत् न जयं न पराजयञ्च।

बहिरन्तरा शुभखला हि यदा नृपसंधये यदि शुभाः सबलाः।।

जयदाः खला अशुभदा विमिश्रिताः खचरा विमिश्रितफला निरन्तराः।।७।।

यदि दुर्गे बहिरन्तःस्थानेषु शुभग्रहःपापग्रहश्च भवेत्तर्हि उभयराजयोः सन्धिः जायते। यदि शुभग्रहे बलवान् चेत् जयदायकस्तथा अशुभपापग्रहो बलवान् चेत् अशुभदायकः, यदि विमिश्रितपापग्रहश्चेत् मिश्रफलदायको भवेत्।

मध्ये वक्रिखला दुर्गेट् स्वयं नश्यति वै तदा।।

दुर्गभे वक्रिपापाः स्युः स्वयं दुर्गेद् पलायते।।८।।

यदि मध्यभागे वक्री पापग्रहश्चेत् दुर्गेशः स्वयं पलायनं कुर्यात्। यदि दुर्गस्य नक्षत्रे वक्री पापग्रहश्चेत् दुर्गेशः स्वयमेव पलायते।

रवौ बन्धशोषः कुजे च प्रदाहः शनौ मृत्युयोगः स्वभेदश्च राहौ।।

ध्वजेऽन्तर्विषं स्याच्च सर्वे च मध्ये तदा दुर्गभंगो यदेज्येन्तरा स्यात्।।९।।

यो सूर्यः स्थितश्चेत् केनापि प्रकारेण बन्धनात् दुःखं, कुजश्चेत् अतिदाहो, शनिश्चेत् मृत्युयोगः, राहुः चेत् स्वभेदनं, केतुः चेत् अन्तः विषदानं तथा समस्तपापग्रहाः मध्ये स्थिताश्चेत् दुर्गभङ्गो जायते। यदि बृहस्पति मध्ये स्थितश्चेत्

प्रभूतं समर्धं जलं स्यात्सितोज्ञस्तथेन्दुः ससौम्यस्तथा सर्वसौम्यः।।

जयो दुर्गपस्याथ चेदेककोऽपि खलो मध्यगो बाह्यकोटे च सौम्याः।।१०।।

अतिसमर्घस्तथा जलं भवेत्। यदि शुक्रबुधशुभग्रहयुक्तश्चन्द्रस्तथा सर्वे शुभग्रहाः स्थिताश्चेत् दुर्गपतेः जयं सिद्येत्। यदि एकाकी कोऽपि पापग्रहः दुर्गमध्ये स्थितस्तथा शुभग्रहो बहिर्दुर्गे स्थितस्तथा

तदा दुर्गपो द्राक् त्यजेदेव दुर्गं यदा मंदयानाः स्वभोच्चादिसौम्याः।।

स्थिरर्क्षे विपापाः प्रवीर्याश्च मध्ये जयो दुर्गिणश्चेद्बहिस्ते परस्य।।११।।

दुर्गाधिपतिः शीघ्रमेव दुर्गं त्यक्त्वा गच्छेत्। यदि दुर्गमध्ये मन्दयानाः, स्वोच्चराशेः उच्चादिगतैः पापग्रहैः रहितः, बलवान् शुभग्रहः स्थिरराशौ वा नक्षत्रे स्थितश्चेत् दुर्गाधिपतेः तथा बाह्यभागे स्थितश्चेत् परस्य राज्ञः जयं भवेत्।

चेदन्तरं विषममल्पबलः सहायैर्हीनः पुरेश इह यावदथो शुभः स्यात्।।

तावद्बली गढपतिश्च यदैव पापा आयान्ति नूनमिह पौरभयं तदा स्यात्।।१२।।

यदि अन्तरे विषमश्चेत् पुरेशोऽल्पबली तथा सहायहीनश्च भवेत्। यावत् पर्यन्तं दुर्गमध्ये शुभग्रहो भवेत् तावत् पर्यन्तं गढपतिः बली तथा पापग्रहा आयान्ति चेत् निश्चयेन पुरपतेः राज्ञः भयं जायते।

इह कृत्तिकादित्वमुपलक्षकं तत पुरभादिक्रम उचितः।।

अस्मिन् चक्रे कृत्तिकादि नक्षत्राणां लेखनं तु उपलक्षकमात्रमेव किन्तु प्रथमपुरनक्षत्र-क्रमात् लेखनीयम्।

अथ सर्वतोभद्रचक्रम्

दशोर्ध्वं दश तिर्यक् च रेखास्त्रैलोक्यदीपके।।

अकारादिस्वराँस्तत्र कोष्ठेऽथैशीक्रमाल्लिखेत्।।१।।

त्रैलोक्यदीपके नाम सर्वतोभद्रे दशोर्ध्वं तथैव दशतिर्यक् रेखाः आकृष्य, कोष्ठे ईशानदिशाक्रमात्

सर्वतोभद्रचक्रम्

ईशान्य — पूर्वा — अग्निः

	अ	**कृत्ति**	**रोहिणी**	**मृगशि**	**आद्रा**	**पुनर्वसु**	**पुष्या**	**आश्ले**	आ	
	भरणि	उ	अ	व	क	ह	उ	ऊ	**मघा**	
	अश्वि	ल	ॡ	वृषभः	मिथुनः	कर्कः	ॡ	म	**पू.फा**	
	रेवती	च	मेषः	ओ	नंदा सूर्य कुजौ	औ	सिंहः	ट	**उ.फ**	
उत्तरा	**उ.भा**	द	मीनः	रिक्ता शुक्रः	पूर्णा शनिः	भद्र,बुध चंद्रौ	कन्या	प	**हस्ता**	दक्षिण
	पू.भा	स	कुम्भः	अः	जया गुरुः	अं	तुला	र	**चित्रा**	
	शतभि	ग	ऐ	मकरः	धनुः	वृश्चिक	ए	त	**स्वा**	
	धनिष्ठा	ऋ	ख	ज	भ	य	न	ऋ	**विशा**	
	ई	**श्रवणा**	**अभिजित्**	**उ.षा**	**पू.षा**	**मूला**	**ज्येष्ठा**	**अनु**	इ	

वायव्य — पश्चिमा — नैऋत्य

सृष्टिमार्गेण नियतं शोडशैवं चतुर्भ्रमम्।।

पूर्वादितः कृत्तिकातः सप्त सप्त च तारकाः।।२।।

सृष्टिमार्गेण चतुर्भ्रमणपूर्वकं स्वराः लेखनीयाः, पूर्वादि दिक्षु कुत्तिकात् आनीय सप्त सप्तनक्षत्राणि स्थापनीयानि। एषःप्रथमो क्रमः।

अवकहडाः पूर्वस्यामटपरता दक्षिणे च नयभजखाः।।

पश्चिमदिशि गसदचला उतरादिक्स्थाः परिज्ञेयाः।।३।।

पूर्वे अवकहडाः, दक्षिणे अटपरताः, पश्चिमे नयभजखाः, उत्तरभागे गसदचलाः स्थापनीयाः। अयं तु द्वितीयक्रमः।

पूर्वादितो वृषाद्याः स्युः क्रमादेव त्रयस्त्रयः।।

शेषेषु काष्ठाकोष्ठेषु नंदाद्यास्तिथयः क्रमात्।।४।।

पूर्वादि दिक्षु वृषाद्याः क्रमेण त्रयः त्रयः राशयः लेखनीयाः। अयं तृतीयक्रमः। शेषदिक्षु कोष्ठेषु नन्दादि तिथिक्रमात् लेखनीयम्। अयं तृतीयः क्रमः।

वाराणां सप्तकं लेख्यं भौमाद्यं पूर्वदिक्क्रमात्।।

शन्यर्कराहुकेत्वाराः पापा शेषाः शुभाः स्वगाः।।५।।

पूर्वादि दिक्षु क्रमेण कुजादिं स्वीकृत्य सप्तवारं स्थापनीयम्। शनिसूर्यराहुकेतुकुजग्रहाः पापग्रहा इति, शेषशुभग्रहाः इति ज्ञेयाः।

बुधोऽपि क्रूरयुक् क्रूरश्चंद्रमाश्च कृशस्तथा।।

यत्र भे खचरस्तिष्ठेत्ततो वेधत्रयं भवेत्।।६।।

स्वगेक्षणवशादत्र वामदक्षिणसन्मुखाः।।

शीघ्रे वामोन्मुखी मध्ये ज्ञेया वक्रे च दक्षिणा।।७।।

बुधकृशचन्द्राः क्रूरग्रहा इत्यभिधीयन्ते। यस्मिन् नक्षत्रे ग्रहः स्थितो तस्मात् तस्य ग्रहस्य दृष्टिवशात् वामदक्षिणसन्मुखाः वेधत्रयेण अभिधीयन्ते। शीघ्रगतिग्रहे वामस्तथा मध्यगतिग्रहे सन्मुखः, वक्रे दक्षिणदृष्टिः भवेत्।

भौमादिष्वथ सूर्येन्दुकेत्वहीना च दृक्त्रयम्।।

सदैव वक्रिणौ दैत्यौ सूर्येन्दू शीघ्रगौ यतः।।८।।

कुजादि क्रूरग्रहेषु सूर्यचन्द्रकेतुराहूणां दृष्टिः भवेत्। किमर्थमिति चेत् राहुकेतुग्रहौ सदा वक्रिणौ तथा सूर्यचन्द्रौ शीघ्रगौ भवतः।

सूर्यान्मुक्ता उदीयन्ते शीघ्राः खेटा धने रवेः।।

तृतीये च समाः प्रोक्ताश्चतुर्थे मंदगामिनः।।९।।

सूर्यात् मुक्ता शीघ्रग्रहा सूर्यात् द्वितीये गृहे उदीयन्ते। तृतीये समगतिः, चतुर्थे मन्दगामिनः

भानोः खेटात्पञ्चमे च वक्राश्चाष्टमसप्तमे।।

अतिवक्राः स्मृता धर्मदशके मार्गगामिनः।।१०।।

पञ्चमे वक्रिणः, सप्तमे अष्टमे च अतिवक्रिणः नवमे दशमे मार्गगामिनः।

लाभद्वादशके शीघ्रा यदा वक्रो भवेत्खगः।।

सौम्योऽतिसौम्यश्चोग्रोऽतिपापः शीघ्रः स्वभाववत्।।११।।

एकादशे द्वादशे शीघ्रगामिनः भवेयुः तथैव सौम्यग्रहो यदा वक्री भवेत् तदा अतिसौम्यस्तथा पापग्रहो वक्री भवेत् चेत् अतिपापस्तथा शीघ्रीस्वभावतुल्याः भवन्ति।

तुंगस्थानं तुंगभं स्यात्तस्मान्नीचं च सप्तमम्।।

नीचाच्चोच्चात्तुर्यभं यत्समं सोऽग्रशुभः खलः।।१२।।

उच्चस्थानस्य उच्चराशिस्तथा उच्चस्थानात् सप्तमे नीचस्तथा उच्चस्थानात् चतुर्थः समराशिरिति कथ्यते। पापग्रहेण सह शुभग्रहोऽपि पापग्रह इत्युच्यते।

ऊर्ध्वदृष्टी च सूर्यारौ बुधशुक्रौ च केकरौ।।

चंद्रेज्यौ समदृष्टी च मंदराहू त्वधोदृशौ।।१३।।

सूर्यकुजौ ऊर्ध्वदृष्टिसहितौ, बुधशुक्रौ केकरौ, बृहस्पतिचन्द्रौ समदृष्टिसहितौ, शनिराहू च अधोदृष्टिवन्तौ इति कथ्यते।

ऊर्ध्वदृष्टिग्रहे कुर्यात्कुण्डली यन्त्रसाधनम्।।

समे च साधयेत्पिंण्डं रन्ध्रपातमधोदृशि।।१४।।

ऊर्ध्वदृष्टिग्रहे कुण्डलीयन्त्रं, समदृष्टिश्चेत् पिण्डं, अधो दृष्टिश्चेत् छिद्रपातयन्त्रं कुर्यात्।

सुहृदोऽर्केन्दुभौमेज्या ज्ञशुक्रशनिराहवः।।

अन्योन्यं वैरिणो ह्यन्ये राहौः सर्वे तु शत्रवः।।१५।।

सूर्यचन्द्रकुजबृहस्पतिग्रहाः तथा बुधशुक्रशनिराहुग्रहाः अन्योन्यं मित्ररूपेण, अन्यग्रहे शत्रुरूपेण एवं राहुसम्बद्धाः सर्वे ग्रहाः शत्रव एवेति ज्ञेयम्।

घङ्छा रौद्रगे वेधे षणठा हस्तगे तथा।।

धफढा पूर्वाषाढायां शञ्चथा भाद्र उत्तरा।।१६।।

घ, ङ, छ, इत्यक्षराणि आर्द्रायाः वेधे, ष, ण, व इत्यक्षराणि हस्तायाः वेधे, ध, फ, ढ इत्यक्षराणि पूर्वाषाढायाः वेधे, श, झ, थ इत्यक्षराणि उत्तरभाद्रपदस्य वेधे लेखनीपानि।

ववौ शसौ षखौ चैव जयौ ङञौ परस्परम्।।

एकेन द्वितयं विद्धं सदसद्ग्रहवेधने।।१७।।

शुभो वा अशुभग्रहस्य वेधश्चेत् च, व, श, स, ष, ख, ज, य, ङ,ञ एतान्यक्षराणि परस्परमेकेन द्वितयं वेधश्चेत् विद्धो जायते।

अवर्णादिस्वरद्वन्द्वे ह्येकवेधे द्वयोर्व्यधः।।

युक्तास्वरात्मके वेधे त्वनुस्वारविसर्गयोः।।१८।।

अवर्णादि द्वन्द्वस्वराः (अ, आ, इ, ई, उ, ऊ, ऋ, ॠ, ऌ, ॡ) इत्येतेषु एकास्य वेधश्चेदपि द्वयोवेधः इति ज्ञातव्यः। युक्तस्वराः (ए, ऐ, ओ, औ) एतेषां वेधे अनुस्वरस्य (अं) तथा विसर्गस्य (अः) चापि वेधो भवेद्येव।

घङ्छाः षणठाश्चैव धफढाः शञ्चथास्तथा।।

एतत्त्रिकं त्रिकं विद्धं विद्धैकपदभैः क्रमात्।।१९।।

नक्षत्रस्य प्रथमचरणादीनां विद्धादपि क्रमात् त्रि त्रि वर्णाः विद्धाः भवेयुः यथा नक्षत्रस्य प्रथमचरणं विद्धश्चेत् घ, ङ, छ, इत्यक्षराणि, द्वितीयो विद्धश्चेत् ष, ण,

ठ इत्यक्षराणि, तृतीयो विद्धश्चेत् ध, फ, ढ इत्यक्षराणि चतुर्थो विद्धश्चेत् श, झ, थ इत्यक्षराणि विद्धानि भविष्यान्ति।

भरण्यन्तपदस्थायी कृत्तिकाद्यांघ्रिगोऽपि वा।।

वेधयेत्तु अउलृऊकारं पूर्णां तिथिं तथा।।२०।।

यदि ग्रहो भरणीनक्षत्रस्यान्ते तथा कृत्तिकानक्षत्रस्यादौ चरणं वेधेत्तर्हि अ, उ, लृ, ऊ, तथैव पूर्णातिथिस्थितोऽपि वेधते।

एवं कोणभयोर्मध्ये चान्त्यादिपदगे खगे।।

अस्वरादिचतुष्कस्य वेधः पूर्णतिथेस्तथा।।२१।।

एवं प्रकारेण उभयकोण्योर्मध्ये नक्षत्रद्वयस्य अन्त्यादि चरणे स्थितो ग्रहः तयोः उभयोः नक्षत्रयोः, मध्यस्थ अकारादि चतुष्कस्य तथा पूर्णां तिथिं वेधते।

एकादिपादवेधेन भीर्हानी रुग् मृतिः क्रमात्।।

धिष्ण्ये विधे भ्रमो वर्णे हानिर्व्याधिः स्वरे तिथौ।।२२।।

नक्षत्रस्य प्रथमादि चतुर्वर्णानां विद्धश्चेत् क्रमेण भयहानिरोगास्तथा मृत्युरपि भवेत्। नक्षत्रवेधे भ्रमः, वर्णे हानिः, स्वरे व्याधिः, तिथौ

भयं राशौ परं विघ्नं पंचवेधे मृतिर्भवेत्।।

उग्रस्यैकस्य वेधेन भीर्द्वयोश्च व्रणो रणे।।२३।।

भयं, राशौ अतिविघ्नं तथा पञ्चैते वेधे चेत् मृत्युरपि भवेत्। एकस्य पापग्रहस्य वेधश्चेत् भयं, पापग्रहद्वयस्य युद्धे व्रणं।

खलत्रयव्यधाद्भंगश्चतुः पापव्यधान्मृतिः।।

आधी रवेर्व्यधे द्रव्यहानिर्भौमस्य रुक् शनेः।।२४।।

पापग्रहत्रयस्य वेधश्चेत् भङ्गः, चतुष्टयस्य वेधश्चेत् मृत्युरेव सम्भवेत्। सूर्यस्य वेधश्चेत् व्याधिः, कुजस्य वेधश्चेत् द्रव्यहानिः शनैश्चरस्य चेत् रोगः।

राहुकेत्वोर्महाविघ्नं पुष्टेन्दोश्च शुभं फलम्।।

क्षीणोन्दोरशुभं चाद्रेर्बुद्धिर्जीवस्य वाञ्छितम्।।२५।।

राहुकेतुग्रहयोः वेधश्चेत् महाविघ्नं, पूर्णचन्द्रयोः चेत् शुभफलं, क्षीणचन्द्रस्य चेत् अशुभफलं, बुधस्य चेत् बुद्धिवृद्धिः, बृहस्पतेः चेत् मनोरथसिद्धिः।

रतिः शुक्रस्य वृद्ध्यै स्यात्पूर्णं स्वोच्चर्क्षगे फलम्।।

त्रिकोणे चाष्टमे वाद्यौ समर्द्धं चाद्रिवद्रिपौ।।२६।।

शुक्रस्य चेत् रतिवृद्धिर्जायते। यदि ग्रहः स्वोच्चराशिगत त्रिकोणे (९/५) स्थितस्तर्हि पूर्णफलं भवेत्। तथैव अष्टमे वा सप्तमे स्थितश्चेत् अर्धफलं, षष्ठमे गृहे चेत् सप्तमगृहतुल्यफलमिति नाम अर्धफलमिति ज्ञेयम्।

स्थानवेधसमायोगाद्यत्संख्यं जायते बलम्।।

तत्तुल्यं वेधवस्तूनां फलं ब्रुयादशंकितः।।२७।।

स्थानवेधसमागमात् यावत् फलं लभ्येत तावत् फलं वेधवस्तूनां फलं जायतेति कथ्यते।

वक्रे द्विगुणमुच्चस्थे त्रिगुणं शीघ्र उक्तवत्।।

नीचेऽर्द्धं च सदा निन्द्यो वेधः कार्येषु सत्सु च।।२८।।

यदि वक्रग्रहश्चेत् द्विगणफलं, उच्चस्थाने स्थिते त्रिगुणफलं, शीघ्री चेत् पूर्वोक्तसदृशफलं, नीचश्चेत् अर्धफलमिति विज्ञेयम्। शुभकार्येषु वेधः सदा निन्दित एव।

रोगकाले वक्रिपापवेधे मृत्युश्च पापिनि।।

शीघ्रे रोगी भवेज्जय्यो वेधस्थाने भटे क्षतिः।।२९।।

रागकाले वक्री तथा पापग्रहस्य वेधश्चेत् मृत्युः शीघ्रं भवेत्। पापग्रहस्य वेधश्चेत् योद्धा तथा रोगी भवेत्। यदि वेधस्य स्थाने स्थितश्चेत् क्षयमेव सम्भवेत्।

कवौ प्रवेशनं युद्धे भंगः खंडो भवेद्गढे।।

वामदक्षे सतोर्वेधो दुर्गहानिर्हि सन्मुखे।।३०।।

यदि शुक्रस्य पापग्रहेण सह वेधश्चेत् युद्धे प्रवेशः, यदि शुभग्रहस्य पापग्रहेण सह वामवेधश्चेत् वेधश्चेत् दुर्गहानिटिति विज्ञायते। युद्धे भङ्गः, दक्षिणवेधश्चेत् गढे खण्डः, सन्मुखे

वृषादिराशित्रयभानुभोगद्दशाचतुष्कं क्रमतोऽस्तमैंद्याः।।

ऐंद्री यदास्तं समुपैति शैवी तथा फलावाच्यनलस्य दिक् च।।३१।।

वृषादि राशित्रयेषु सूर्यस्य भोगकारणात् क्रमेण पूर्वादि चतुर्षु दिक्षु अस्तं यास्यन्ति। अर्थात् २/३/४ राशिषु पूर्व, ५/६/७ राशिषु दक्षिण, ८/९/१० राशिषु पश्चिमस्तथा ११/१२/१ राशिषु उत्तरदिशा अस्तमेति। पूर्वदिशा यदा अस्तमेति तदैव ईशानदिशा अस्तमेति। यदा दाक्षिणदिशा अस्तमेति तदैव आग्नेयदिशा अस्तमेति।

तद्वत्प्रतीची निर्ऋतेर्दिशा स्यात् तथोत्तरावायुदिशा तथा स्यात्।।

भेऽस्ते रुजा हानिरिहाक्षरे च शोकः स्वरे विघ्नमलं च राशौ।।३२।।

तथैव यदा पश्चिमदिशा यदा अस्तमेति तदा नैऋतिदिशाऽपि अस्तं गच्छेत् तदेव वायव्यदिशापि अस्तमेति। नक्षत्रस्य अस्तगमने रोगः, अक्षरश्चेत् हानिः, स्वरश्चेत् शोकः राशिश्चेत् बहुविघ्नं,

भयं तिथौ पञ्चसु मृत्युरेव यात्रां विवादं चरणं गृहस्य।।

द्वारं शुभं चाऽप्यपरं समस्तमस्तोन्मुखं नैव कदा विदध्यात्।।३३।।

तिथिश्चेत् भयं तथा पञ्चैते अस्तं गताश्चेत् मृत्युरेव सम्भवेत्। यात्रा, विवाद, युद्ध, गृहद्वारं तथा सर्वाणि शुभकर्माणि अस्तोन्मुखं नैव करणीयानि।

यन्नामाद्यक्षरं ह्यस्तं सदैव निहतः सदा।।

पुष्टिर्धिष्ण्ये समुदिते लाभो वर्णे सुखं स्वरे।।३४।।

यस्य नामाद्यक्षरं अस्तं चेत् स सदा दैवात् निहतो भवेत्। नक्षत्रोदयश्चेत् पुष्टिः वर्णश्चेत् लाभः, स्वरश्चेत् सुखं।

राशौ जयस्तिथावोजः स्थानाप्तिः पंचकोदये।।

प्रश्नेऽगं सत्फलं यच्च पापैर्विद्धं न सद्धि तत्।।

शुभैः शुभं समैर्मध्यं ज्ञेयमत्र पुरोक्तवत्।।३५।।

राशिश्चेत् जयं, तिथिश्चेत् वलः, पञ्चानामुदयश्चेत् जयप्राप्तिरेव। प्रश्ने योऽङ्ग शुभफलदायकश्चेदपि पापग्रहेण विद्धचेत् शुभं नैव भवेत्। शुभग्रहैः विद्धश्चेत् शुभं, समग्रहैः विद्धश्चेत् मध्यमफलं पूर्वोक्तवत् ज्ञेयम्।

भूरिकालात्मके वेधे यदा चंद्रो व्यये भवेत्।।

तदा वेधफलं वाच्यं शुभाशुभमसंशयम्।।३६।।

बहुकालं चन्द्रो वेधे स्थित्वा यदा कदाचित् द्वादशगृहे भवेत् तदा वेधस्य शुभाशुभफलं निःसन्देहेन ज्ञातव्यम्।

क्रूरैरुभयतो विद्धं यस्य भं च स देशपः।।

देशदुर्गगढस्थानपुरो नश्यति वस्तु च।।३७।।

उभयपक्षयोः क्रूरग्रहैः यस्य नक्षत्रस्य विद्धश्चेत् तस्य देशपतेः, देशस्य, दुर्गस्य, स्थानस्य, पुरस्य, वस्तुनः च नाशो सम्भवेत्।

कृतिकादित्रयं मध्ये तथार्द्रादित्रिकं त्रिकम्।।

पूर्वादिक्रमतो लेख्यं तत्र वेधे हि तत्क्षयः।।३८।।

कृत्तिकादितः स्वीकृत्य नक्षत्रत्रयमध्ये तथा आर्द्रात् - आनीय नक्षत्रत्रयं पूर्वादिदिक्षु क्रमेण लेखनीयानि। यत्र वेधोऽस्ति तत्र तस्य क्षय एवेति विज्ञेयः।

अयोध्या मिथिला चंपा कोशांबी कौशिकी तथा।।

अहिछत्रं गया विध्यमंतर्वेदिश्च मेखला।।३९।।

कृत्तिकादि त्रीणि नक्षत्राणि विद्धश्चेत् अयोध्या, मिथिला, चम्पा, कौशाम्बी, कौशिकी, अहिच्छत्र, गया, विन्ध्याचल, अन्तर्वेदि, मेखला।

कान्यकुब्जः प्रयागश्च मध्यदेशोऽग्निभत्रये।।

विद्धे नश्यति तत्रापि यत्र वेधो भवेत्क्षयः।।४०।।

कान्यकुब्ज, प्रयाग, मध्यदेशः एतेषा देशानां नाशो सम्भवेत्। तथा यत्र वेधः तत्र क्षय एव।

अग्नौ पुष्ये च रेवत्यां नक्षत्रे च पुनर्वसौ।।

विद्धे यथाक्रमं वेधो वर्णेषु ब्राह्मणादिषु।।४१।।

कृत्तिकायां पुष्ये रवेत्यां पुनर्वसौ च नक्षत्रविद्धश्चेत् यथाक्रमेण ब्राह्मणादि वर्णेषु दुःखोत्पन्नो भवेत्।

तौल्यं भांडो रसो धान्यं वाहेभादिचतुष्पदम्।।

यावत्पापव्यधस्तावत्सर्वं गच्छेन्महर्घताम्।।४२।।

यावत्पर्यन्तं पापग्रहस्य वेधो भवेत् तावत्पर्यन्तं गजादि चतुष्पदानि सर्वाणि महर्घातां प्राप्स्यन्ति।

क्रूरवेधसमायोगे व्यस्योपग्रहसंभवः।।

तस्य मृत्युर्न संदेहो रोगिणो निर्बलस्य च।।४३।।

क्रग्रहस्य वेधे यस्य रोगिणः वा निर्बलपुरुषस्य जन्मनक्षत्रे उपग्रहयोगस्य उत्पत्तिर्भवेत् तस्य पुरुषस्य निःसन्देहेन मृत्युः निश्चयः।

सूर्यभात्पञ्चमाष्टाख्यमशुभं चैकविंशतेः।।

चतुष्कं जन्मभं चेत्स्यात्तदा भूयादुपग्रहः।।४४।।

सूर्यस्य नक्षत्रात् पञ्चमाष्टमनक्षत्रं अशुभम् तथा एकविंशतेः अग्रे चतुष्कं २२/२३/२४/२५ वा यदि जन्मनक्षत्रञ्चेत् उपग्रहदोषो भवेत्।

अनिष्टं जनुर्भे प्रविद्धे दशर्क्षे हि कर्मक्षयश्चाष्टमे स्यात्प्रभेदः।।

धृतौ द्रव्यनाशस्त्रयोविंशतौ रुक् तथा पंचविंशेऽतिदुःखं खलैः स्यात्।।४५।।

यदि जन्मनक्षत्रं पापग्रहैः विद्धश्चेत् कर्मनाशः, अष्टमे चेत् प्रभेदः, दशमे चेत् द्रव्यनाशः, त्रयोविंशतौ चेत् रोगः, पञ्चविंशतौ चेत् दुःखञ्च भवेत्।

तमोभतः पंचमगं नृपस्य भं पलायते राट् सचिवो निहन्यते।।

भटर्क्षतश्चेद्दशमेऽवनीसुतः स्वपक्षतो भृत्युमवापयान्नृपः।।४६।।

राहोः नक्षत्रात् राज्ञः पञ्चमनक्षत्रं भवेत्तर्हि राजा युद्धात् पलायते तथा मन्त्रिरपि निहन्यते। योद्धुः नक्षत्रात् दशमे नक्षत्रे कुजःस्तितश्चेत् राजा स्वपक्षतः मृत्युमवाप्नुयात्।

विद्धे राज्ञो ज्ञातिभे ज्ञातिनाशो राजर्क्षे स्याद्धनं देशभे च।।

देशत्यागो ह्यूनविंशे प्रवासश्चेदत्रैवोपग्रहो मृत्युहेतुः।।४७।।

यदि राज्ञः ज्ञातिनक्षत्रे कुजश्चेत् जातिनाशः, तथा राज्ञः नक्षत्रे स्थितश्चेत् राजबन्धनं भवेत्। यदि देशनक्षत्रे स्थितश्चेत् देहत्यागः, ऊनविंशे नक्षत्रे चेत् उभयग्रहमरणहेतुः भवेत्।

अथवा तुरङ्गराहुर्विचारणीयः

राहोर्भतः सप्तकमानने स्यात्स्कन्धे ततः सप्त तथोदरे च।।

सप्त त्रिके सप्त यथा क्रमेण लिखेच्च योद्धर्क्षमु तत्र चिन्त्यम्।।४८।।

तुरङ्गराहोः विचारणमेवं करणीयम् यथा राहोः नक्षत्रात् सप्त सप्त नक्षत्राणि मुखे, स्कन्धे, उदरे, कटिभागे लिखेत्। एवं प्रकारेण चक्रे योद्धुः जन्मनक्षत्रविचारः करणीयः, कस्मिन्नङ्गेऽस्तीति विज्ञेयश्च।

मृतिं वक्रे स्कन्धे भयमुदरदेशे हि विजयं।

कटौ घातं स्याद्वै भवति यदि भं योद्धजनिजम्।।

सजीवं मध्यत्वं यदि सशनि मूर्ध्वक्षतिमथो।।

सभौमं तद्घातं सविधु मरणं चेधद्युतम्।।४९।।

मुखे मृत्युः, स्कन्धे भयं, उदरे विजयः, कटिभागे व्रणञ्च भवेत्। यदि तुरङ्गमुखास्थितस्य योद्धुः जन्मनक्षत्रे बृहस्पतिः स्थितश्चेत् मध्यमफलं, शनिश्चेत् शिरसि क्षतः, कुजश्चेत् घातः, चन्द्रश्चेत् मरणं, बुधश्चेत्।

अभव्यं शुक्राढ्यं रणविमुखतां केतुसहितं।

रणे शस्त्रत्यागं सरवि रिपुतामेव तनुते।।

यदांसस्थं सेज्यं दिशति विजयं चेत्कवियुतं।

रणे शस्त्रत्यागं यदि सशिनि भंगं सविधु तत्।।५०।।

तदा शस्त्रभ्रंशं सरवि रिपुवश्यं कुजयुतं।

तनुच्छेदं विद्युक् स्खलनमु सकेत्वात्महनमम्।।

भमौदर्यं सेज्यं दिशति विजयं चेत्कवियुतं।

रिपोर्वैमुख्यं तत्सशनि समतां सार्कमु जयम्।।५१।।

ससौम्यं शूरत्वं सखलविधु चेद्भीतिमतुलां।

सपुच्छं चेत्संधिं यदि रिपुमृतिं भोमसहितम्।।
कटिस्थं भं सेज्यं दिशति विजयं सेन्द्वपचयं।
सशुक्रं तत्साम्यं सशनि हि भयं सेन्दुतनयम्।।
परं क्लेशं सारं मृतिमथ ससूर्यं रिपुवशं।
सकेतु श्रीहानिं समरविमुखत्वं च दिशति।।५२।।

अकल्याणं, शुक्रश्चेत् युद्धे विमुखता, केतुश्चेत् युद्धे शस्त्रत्यागस्तथा सूर्यश्चेत् शत्रुवर्धनञ्च भवेत्। एवं प्रकारेण स्कन्धे, उदरे, करिस्थाने स्थितानां नक्षत्राणां स्थितिफलं चक्रं वीक्ष्य विज्ञेयम्।

मुखफलम्

सूर्यः	चन्द्रः	कुजः	बुधः	बृहस्पतिः	शुक्रः	शनिः	केतुः	ग्रहाः
शत्रृवृद्धिः	मरणम्	घातः	अकल्याणम्	मध्यम फलम्	युद्धात्वि-मुख्तौ	शिर-सिघातः	शस्त्र-त्यागः	फलम्

स्कन्धफलम्

सूर्यः	चन्द्रः	कुजः	बुधः	बृहस्पतिः	शुक्रः	शनिः	केतुः	ग्रहाः
शत्रोः वरागमनम्	शस्त्र भ्राम्श	शरीर छेदनम्	स्खलनम्	विजयः	युद्धे शस्त्रत्यागः	भङ्गः	आत्मघातः	फलम्

उदरफलम्

सूर्यः	चन्द्रः	कुजः	बुधः	बृहस्पतिः	शुक्रः	शनिः	केतुः	ग्रहाः
जयः	अतुलभयम्	शतृमृत्तिः	शूरता	विजयः	शत्रुविमुकता	समता	सन्धिः	फलम्

कटिफलम्

सूर्यः	चन्द्रः	कुजः	बुधः	बृहस्पतिः	शुक्रः	शनिः	केतुः	ग्रहाः
शत्रोः वरागमनम्	अपचयः	मृत्युः	परमक्लेशः	विजयः	समता	भयम्	श्रीहानि तथैव युद्धे विमुखता	फलम्

रवेर्भात्तिथ्यंकत्रिनखमितमिष्टर्क्षमथवा।।
त्रयोविंशं केतोर्मृतिसमुचितोपग्रह इति।।५३।।

सूर्यस्य नक्षत्रात् १५/९/३/२० स्थाने इष्टनक्षत्रमस्ति चेत् वा केतोः त्रयोविंशं वा भवेत्तर्हि मृत्युकारक उपग्रह इति कश्चते।

सेनापतेः शुभाशुभज्ञानम्

राजा मंत्री च सेनानीः कोटपालो यथाक्रमम्।।
शनिः सूर्यस्तथा सोमो बुध एभ्यः फलं वदेत्।।५४।।

राजा – मन्त्री – सेनापतिः – कोटपालानां यथाक्रमम् शनिः – सूर्यः – सोमः – बुधः एतैः शुभाशुभफलं वदेत्।

स्पष्टार्थचक्रम्

ग्रहाः	सूर्यः	चन्द्रः	कुजः	बुधः	बृहस्पतिः	शुक्रः	शनिः
प्रश्नशिरोमणिः	मन्त्रिः	सेनापतिः	*	कोटपालः	*	*	राजा
ताजिकनीलकण्ठीयम्	राजा	राजा	सेनापतिः	युवराजः	मन्त्रिः	मन्त्रिः	दासः

शीघ्रगाश्चरराशिस्थाः पालयन्ति निजाश्चमूम्।।
शनौ नीचगते पौरा रवौ नीचगतेऽध्वगाः।।५५।।

यदि शीघ्रगतिशीलो ग्रहः चरराशिस्थ चेत् स्वपुरुषस्तथा शनिः नीचस्थाने स्थितश्चेत् पुरवासिनः, सूर्यः नीचस्थाने स्थितश्चेत् अध्वगाः मनुष्याः सेनारक्षणं कुर्युः।

बंधनं वाहिसंयुक्ते मृत्युः शत्रुनिरीक्षिते।।

सक्षतो रिपुसंयुक्ते परयुक्तो हि निर्भयः।।५६।।

शनिर्वा सूर्यः राहुणा युक्तश्चेत् बन्धनं, शत्रुणा दृष्टश्चेत् मृत्युः, युक्तश्चेत् क्षतः, शुभग्रहयुक्तश्चेत् सेनापतिः निर्भयः भवेत्।

शीघ्रगा मित्रसंयुक्ता मित्रेणालोकिता यदि।।

तदा संधिं विजानीयात्सेनयोरुभयोरपि।।५७।।

यदि शीघ्रगतिग्रहः मित्रग्रहेण दृष्टयुक्तश्चेत् उभयसेनयोः सन्धिर्जायते।

अबलांशगते चंद्रे स्त्रीखेटप्रविलोकिते।।

अबलर्क्षगते वापि स्त्री स्यात्सैन्यस्य पालिका।।५८।।

यदि स्त्रीग्रहस्य नवांशे चन्द्रः स्त्रीग्रहेण दृष्टो वा स्त्रीराशिगतश्चेत् सेनारक्षणं स्त्रिया एव सम्भवेत्।

कस्यांगस्य घात इति प्रश्ने विचारः

अर्कर्क्षतो भटक्षं दशमं तज्जन्मपादश्च।।

दक्षकरोदरघातो द्वादशभं चेत्तु हस्तयातश्च।।५९।।

यदि सूर्यनक्षत्रात् योद्धुः जन्मनक्षत्रं वा जन्मनक्षत्रचरणं दशमे स्थिते दक्षिणहस्तं तथा उदरे घातो जायते। यदि द्वादशे चेत् हस्ते घातो भवेत्।

जीवति चतुर्दशं चेज्जन्मांघ्रिश्चात्र दोर्निहतिः।।

पंचदशं भुजघाताद्भुपतिर्विंशिं तथैकविंशं चेत्।।

कायहतेर्म्रियते चेत्सिद्धभमादक्षपादपृष्ठहतेः।।६०।।

चतुर्दशे स्थिते जीवेत् तथा भुजाभ्यां प्रहारोऽपि भवेत्। यदि पञ्चदशे स्थिते भुजघातकारणात् मृत्युः भविष्यति। यदि १६/२०/२१ स्थाने स्थितश्चेत् शरीरघातः, चतुर्विंशे स्थिते दक्षिणपादात् पृष्टभागपर्यन्तं घातकारणात् मृत्युः भवेत्।

नक्षत्रात् घातज्ञानचक्रम्

नक्षत्रसङ्ख्या	शरीरस्य अङ्गाः
१०	वामहस्तं तथैव उदरम्
१२	हस्ते
१४	भुजयोः
१५	भुजाघातेन मृत्युः
१६, २०, २१	शरीरघातेन मृत्युः
२४	वामपादादारभ्य पृष्टभापर्यन्तं घातकारणेन मृत्युः

लग्नाद्वा वीरजन्मर्क्षाद्देहेऽर्के शिरसि क्षतिम्।।

चंद्रे व्यये मुखे भौमे लाभे वक्रहृदोर्बुधे।।६१।।

यदि लग्नाद्वा वीरस्य जन्मराशितः सूर्यो लग्ने स्थितश्चेत् शिरसि घातः, चन्द्रो द्वादशे स्थितश्चेत् मुखे, कुजः, एकादशे स्थितश्चेत् मुखे हृदये च घातो भवेत्।

खे स्तने च गुरौ भाग्य ऊर्वोः शुक्रेऽष्टमे गुदे।।

शनौ चुतर्थगे जान्वोर्धियि राहौ भुजद्वये।।६२।।

बुधः दशमे चेत् उरसि, बृहस्पतिः नवमे चेत् जङ्घायां, शुक्रः अष्टमे चेत् गुदभागे, शनिः चतुर्थे चेत् जानुभागे, राहुः पञ्चमे चेत् भुजयोः।

केतौ षष्ठे हनोर्मूले शीर्षे वा भटजन्मतः।

अष्टमेशे मृतौ हस्ते ज्येष्ठे भ्रात्रंगराट् त्रिभे।।

कण्ठे स्वगृहनिर्माणलग्ने शेषे भवेच्छ्रुतौ।।६३।।

केतुः षष्ठमे चेत् हनोर्मूले, शिवसि च, योद्धुः जन्मराशितः अष्टमेशः अष्टमे स्थितश्चेत् दक्षिणहस्ते, तृतीयेशलग्नेशो तृतीये गृहे चेत् कण्ठे तथा स्वगृहनिर्माणलग्ने शेषग्रहश्चेत् कर्णे घातो सम्भवेत्।

दुर्गभङ्गप्रश्ने विचारः

खलेऽबले वा सबले तनौ नो दुर्गस्य भंगोऽष्टमभे हि भंगः।।

भौमे तनौ वादितिजेन भंगो यदा सुरः सप्तम आशु भंगः।।१।।

बलवान् वा निबली पापग्रहो लग्ने स्थितश्चेत् दुर्गभङ्गो नैव सम्भवेत्। यदि अष्टमे शुभग्रहः स्थितश्चेत् भङ्गो जायते। कुजो वा राहुः लग्ने स्थितश्चेत् भङ्गो नैव जायते। यदि राहुः सप्तमे स्थितश्चेत् शीघ्रभङ्गो भवेत्।

तनौ खलो दुर्गशुभाय चौग्री दृष्टिर्न चातः परथाऽन्यथा च।।

विवादसंग्रामरिपुप्रणाशदुर्गप्रभंगादिषु चेत्खलोंऽगे।।२।।

यदि लग्ने शुभपापग्रहाः स्थिताश्चेत् शुभफलं तथा पापदृष्टिश्चेत् अशुभफलं भवेत्। असमात् विपरीतं चेत् अन्यथाफलं भवेत् अर्थात् शुभग्रहो लग्ने स्थितश्चेत् दुर्गभङ्गः तथा शुभग्रहस्य दृष्टिश्चेत् दुर्गरक्षा भवेत्। विवादसंग्रामशत्रुनाशदुर्गभंग इत्यादिषु चेत् पापग्रहो लग्ने।

शुभाय नो दृक् यदि सप्तमूर्त्यौः खलौ षडष्टस्वगतोंऽगनाथः।।

न दुर्गभंगो यदि रिःफवित्तेखला न भंगोऽप्यरिवेष्टितानाम्।।३।।

शुभस्तथा या दृष्टिश्चेत् अशुभफलमिति सम्भाव्यते। यदि लग्नः सप्तमे पापग्रहस्तथा षष्ठमे अष्टमे द्वितीयलग्नेशोऽस्ति चेत् दुर्गभङ्गो भवेत्। यदि द्वादशे द्वितीये च पापग्रहोऽस्ति चेत् अरिवेष्टितानाम् पुरुषाणां भङ्गो नैव भवेत्।

खलैश्चतुः कर्मगतैश्च येन प्रवेष्टितं दुर्गमतोऽस्य नाशः।।

पलायनं वा तनुपुत्रकर्मजीवेऽरिसैन्यं प्रबलं गृहीत्वा।।४।।

यदि पापग्रहः चतुर्थे दशमे स्थितश्चेत् यो दुर्गे प्रविष्टः तस्य राज्ञः नाशो वा पलयनं वा भवेत्। १/५/१० स्थाने बृहस्पतिः स्थितश्चेत् शत्रोः प्रबलसैन्यं क्षणमात्रेण दुर्गं गृहीत्वा

दुर्गक्षणेनैव पराङ्मुखः स्याद्यदा तनुस्थस्तनुवीक्षको वा।।

जीवो हितालोकनतोऽर्कशुक्रौ चंद्रेक्षितौ चोदयिभिः प्रवीर्यैः।।५।।

पराङ्मुखः स्यात्। यदि बृहस्पतिः लग्ने स्थितो वा मित्रदृष्ट्या लग्नं पश्येत्तथा बलवतः उदयस्य शुभग्रहाः तथा चन्द्रात् सूर्यः शुक्रश्च दृष्टौ चेत्

शुभैर्गढस्थस्य जयप्रहर्षक्षेमोद्गमश्चेत्तनुगोंऽगनाथः।।

शुक्रोऽथवेज्यो भवगः शुभं स्यादुर्गस्थितानां शुभमित्रदृष्टः।।६।।

गढपतेः राज्ञः जयः, प्रहर्षः, कल्याणप्राप्तिश्च भवेत्। लग्नेशो लग्ने शुक्रो वा बृहस्पतिः एकादशे शुभमित्रदृष्ट्या दृष्टश्चेत् दुर्गस्थितानां पुरुषाणां शुभदायकं भवेत्।

विशेषतः स्वोदयिसौम्यदृष्टो जयाय चेद्वृश्चिकसिंहसंज्ञे।।

तातारिलग्ने सबलो गढस्थो बहिः स निर्गम्य रणाज्जयाय।।७।।

यदि विशेषरूपेण स्वोदयस्य शुभग्रहेण दृष्टश्चेत् विजयप्राप्तिरेव। यदि दशमे, षष्ठमे, लग्ने, वृश्चिके, सिंहराशौ बलवान् लग्नेशो वा शुक्रो वा बृहस्पतिः स्थितश्चेत् गढपतिराजस्य बहिर्निर्गमनं युद्धात् जयं च निश्चयम्।

स्थिरे केंद्रगे पूर्णवीर्येऽगनाथे पुरेशो बली सप्तपे चैवमन्यः।।

य आपोक्लिमे योऽस्तगो वक्रगो वा बलोनोंऽगसप्तेशयोर्निर्बलोऽसौ।।८।।

यदि लग्नेशः पूर्णबलाधिक्येन केन्द्रे स्थितश्चेत् पुरेशो बली तथा सप्तमेशः एवं प्रकारेण भवेत्तर्हि यायीराजः बली भवेत्। यदि लग्नेशसप्तमेशयोः यः कोऽपि आपोक्लिमे वा अस्तगो वा वक्रगो वा भवेत्तर्हि न्यूनवली चेत् राजा निर्बलो भवेत्।

स्वभेशोऽगमंगेश्वरं मित्रदृष्ट्या ग्रपश्येद्बलीदुर्गपश्चेत्सुखेशः।।

स्मरारीश्वरौ मित्रदृष्ट्या प्रपश्येद्बलीयान् रिपुश्चेत्तनौनाधिकारः।।९।।

यदि खराशिपतिः लग्नं वा लग्नेशं वा मित्रदृष्ट्या पश्येत्तर्हि दुर्गेशो बली, यदि चतुर्थेशसप्तमेशौ षष्ठेशं मित्रदृष्ट्या पश्येत्तर्हि शत्रुः बली भवेत्। यदि लग्ने दशमेशस्य वा सूर्यस्य अधिकारं

दशेशस्य वार्कस्य वै दुर्गभङ्गश्चरेंऽगे खले वोक्तयोगेऽतियत्नात्।।

यदांगे स्वभोच्चादिगानां कबूलं सितेज्येन्दुजाना च वा मुत्तशीलम्।।१०।।

नास्ति चेत् दुर्गभङ्गो जायते। अथवा अस्मिन् उक्तयोगे चरलग्नस्थ पापग्रहोऽस्ति चेत् अतियत्नात् दुर्गभङ्गो भवेत्। यदि लग्ने स्वोच्चराशिगतग्रहाणां कम्बूलं अथवा शुक्रबृहस्पतिबुधानाम् इत्तसालयोगश्चेत्

न दुर्गस्य भंगो रवीन्द्वारमांदेत्तसाले द्विदेहोदये दुर्गभंगः।।

चरर्क्षे विशेषात्प्रयत्नेन भूयाद्यदांगे विधुः पापयुक् कर्मगेन।।११।।

दुर्गभङ्गो नैव भवेत्। यदि द्विस्वभावलग्ने सूर्यचन्द्रकुजशनिग्रहाणां इत्तसालयोगश्चेत् दुर्गभङ्गो भवेत्। यदि चरराशौ स्थितश्चेत् विशेषयत्नेन दुर्गभङ्गो भवेत्। यदि लग्ने पापयुक्तः चन्द्रो दशमस्थ पापग्रहेण दृष्टश्चेत्।

खलेनेक्षिती यत्नतो दुर्गभंगो यदा द्यादयः पापिनः सेन्दवोंऽगे।।

स्मरे वा रणे पार्थिवस्य क्षयः स्याच्छुभस्येक्षणादत्र नूनं जयः स्यात्।।१२।।

यत्नतः दुर्गभङ्गो भवेत्। यदि द्यादयः पापग्रहाः चन्द्रेण सह लग्ने वा सप्तमे स्थिताश्चेत् युद्धे राजस्य नाश एव। यदि शुभग्रहदृष्टिश्चेत् निश्चयेन जय एव लभ्यते।

शुभैर्मंदगैः पूर्णवीर्यैः स्मराम्बास्पदे यायिभिर्नैव भंगश्च भग्नः।।

याय्याशु नश्येद्यदांगे च सँस्थाः पृथग्भानुदैत्यारमंदाभिधानाः।।

शुभाः सप्तमे दुर्गभंगोऽस्य यत्नाच्चरेंऽगेऽत्र दुर्गेट् व्रजेत्त्यक्तदुर्गः।।१३।।

यदि पूर्णबली शुभग्रहो मन्दगतित्वेन सप्तमे चतुर्थे गृहे प्रापश्चेत् दुर्गभङ्गो नैव भवेत् किन्तु यायीराजः भग्नसहितो नाशमेति। यदि लग्ने सूर्यात् भिन्नाः राहुकुजशनैश्चराः तथा सप्तमे शुभग्रहो भवेत्तर्हि गढपतेः दुर्गभङ्गो भवेत्। यदि चरलग्ने उक्तयोगश्चेत् दुर्गपतिः दुर्गं त्यक्त्वा व्रजेत्।

भानौ वा भानुसूनौ कुभुवि तनुगते यंत्रपातोऽतिदुर्गा।

चेदुग्रः केंद्रगो वेष्टकमनुजपतेर्वंधुहा यंत्रघातैः।।

चेल्लग्नेद्वेद्रसंस्थः शुभमुतसिलकृद्दुर्गभंगाय सेनौ।

जोभेदात्पापलग्नांतरलवसमघस्त्राष्टमासैः प्रभंगः।।१४।।

सूर्यो वा शनिर्वा कुजग्रहः लग्ने स्थिताश्चेत् दुर्गात् यन्त्राणामतिपातो भवेत् अर्थात् बहूनि शस्त्राणि युद्धाय गमिष्यन्ति। यदि पापग्रहः केन्द्रे स्थितश्चेत्

वेष्टकमनुजपतेः बन्धूनां यन्त्रपातात् नाशो जायते। यदि लग्नेशः केन्द्रे स्थित्वा शुभग्रहैस्सह इत्तसालं कुर्यात्तर्हि सेनायाः बलभेदनात् दुर्गभङ्गो भवेत्। पापग्रहः तथा लग्नान्तरांशसदृशदिनेषु अष्टमासेषु दुर्गभङ्गो जायते।

तपनेऽनलदाहदुश्च खण्ड्यार्कसुते संगरतः कुजै बुधे च।।

शनिभौमयुते खलार्दिते वा गढभंगो हि बलेन भेदखंड्योः।।१५।।

यदि लग्नेशसूर्यो केन्द्रे स्थितौ चेत् अग्निदाहात्, शनैश्चरश्चेत् खण्डनात्, कुजस्तथा बुधश्चेत् युद्धात्, शनिस्तथा कुजेन युक्तो वा पापग्रहेण पीडितो लग्नेशः स्थितश्चेत् भेदनं तथा खण्डनबलात्

राहौ पाखण्डच्छलाभ्यां च भंगः केतौ दुर्गेडेव दुर्गं हि जह्यात्।।

सार्क्यब्जेऽम्बुक्षयाद्दुर्गलाभः साक्यारि व्रंगे रणाभ्यन्ननाशात्।।१६।।

राहुश्चेत् पाखण्डस्तथा छलात् दुर्गभङ्गो जायते। यदि केतुश्चेत् दुर्गपतिः गढं त्यज्येत्। शनियुक्तश्चन्द्रः चेत् जलक्षयात्, शनियुक्तः कुजः पुरुषराशिगत लग्ने स्थितश्चेत् युद्धाग्निना अन्ननाशकारणात् दुर्गलाभो भवेत्।

तपनदृष्टधनाधिपराज्यता वपुषि वित्तशुभा गढनायकः।।

बहुसहायबलो यदि सदृशा स्मरपदृष्टहिमोंऽगपमुत्सिली।।१७।।

यदि सूर्येण दृष्टो धनेशः स्थितश्चेत् राज्यं करोति। यदि लग्नस्य द्वितीये भावे शुभग्रहः स्थितश्चेत् बुहसहायकेन गढपतिः बलवान् भवेत्। यदि सप्तमेशस्य शुभदृष्ट्या दृष्टश्चन्द्रः लग्नेशेन सह इत्तसालं कुर्यात्तर्हि

अधिगतेट् प्रहिणोति वचोहरं तदुदितं नगरेडभिमानयेत्।।

हितदृशांगपदृष्टविधुः स्मरेण्मुतसिली यद पौरवचोहरम्।।१८।।

यायीराजः स्वदूतं नगरपतिसमीपं प्रेषयेत् तथैव तेनोक्तवाक्यानि नरपतिरपि अङ्गीकुर्यात्। यदि लग्नेशस्य मित्रदृष्ट्या दृष्टश्चन्द्रः सप्तमेशेन सह इत्तसालं करोति चेत् पुरवासी राजः दूतं प्रेषयेत्।

अपर ईरितसंधिमुतानयेद्यदि विधुः शनिभौमयुतस्तदा।।

वचनहृद्रधबंधनिषाडितो यदि सलग्नपवीक्षितसौम्ययुक्।।१९।।

तथैव तस्य सन्धिपत्रमपि यायीराजः अङ्गीकुर्यात्। यदि शनिचन्द्रौ कुजयुक्तौ चेत् वचनवाहको दूतः मरणमेति तथा बन्धनात् पीडितो भवेत्। यदि चन्द्रो लग्नेशेन दृष्टस्तथा शुभग्रहैः युक्तश्चेत्

बहुधनांबरलाभपरोऽथ केंद्रगखलस्तनुलग्नपती यतः।।

यथयति प्रभयं प्रवदेत्ततः खलु गढस्य पुरादिदिशः क्रमात्।।२०।।

बहुधनवस्त्रलाभो भवेत्। यदि केन्द्रस्थ पापग्रहो लग्नं वा लग्नपतिं वा पीडयेत्तर्हि पूर्वादि दिक्षु क्रमेण गढस्य अधिकभयं प्रवदेत्।

लग्नपतिर्यदि षष्ठे रिपुरात्मैव भृत्युभे मृतिकृत्।।

व्ययभे व्ययकृत्सततं प्रश्नकृतोऽन्यर्क्षगऽस शुभः।।२१।।

यदि लग्नेशो षष्ठमभावे स्थितश्चेत् प्रश्नकर्तुः आत्मा एव शत्रुः भवेत्। तथैव अष्टमे चेत् मृत्युः, द्वादशे चेत् व्ययकारकः तथा अन्यस्थाने चेत् शुभं भवेत्।

सखलो यः खलाक्रांत। सूर्ययुक्तश्च यो ग्रहः।।

हतरश्मिः स नष्टः स्यान्नष्टाङ्गोऽत्राङ्गपः पुमान्।।२२।।

यो ग्रहः पापयुक्तः, पापाक्रान्तः, सूर्ययुक्तो वा हतरश्मिवान् चेत् सो ग्रहः नष्टः इति कथ्यते। यदि लग्नेशो नष्टश्चेत् प्रश्नकर्ता नष्टाङ्गो भवेत्।

क्रूरेण जीवमानौ यो राहुपार्श्वे यथा रविः।।

क्रूराक्रान्तः सविज्ञेयः क्रूरयुक्तः समेंऽशके।।२३।।

क्रूरग्रहेण जीवमानो यो ग्रहः यथा राहुपार्श्वे सूर्यः क्रूराक्रान्तस्तथा क्रूरग्रहयुक्तस्तथा समेंऽशके

पूर्णया वीक्षितो दृष्ट्या पापदृष्टः स उच्यते।।

प्रविविक्षुः प्रविष्टो वा सूर्यराशौ विरश्मिकः।।२४।।

स्थिते क्रूरयुक्त इति ज्ञातव्यः। यो पूर्णदृष्ट्या दृष्टश्चेत् सः पापदृष्टः तथा सूर्यस्य राशौ प्रविविक्षुः वा प्रविष्टग्रहो वा विरश्मि नाम्ना अभिधीयते।

अथ वादप्रश्ने विचारः

विवादे खलोंऽगे जयीप्रश्नकृत्स्यात्स्मरे चेत्तदन्यो द्वयोर्यद्बलः स्यात्।।
विवादावसाने बलीयान् जयी चेद्विहायोदयास्ते स्थितौ क्रूरखेटौ।।१।।

प्रश्नलग्ने पापग्रहः स्थितस्तथा प्रश्नकर्ता यदि सप्तमे स्थितश्चेत् प्रतिवादीविवादे जयः प्राप्स्यति। यदि उभयस्थानयोः लग्नः, सप्तमे पापग्रहः स्थितश्चेत् यस्य बलवान् ग्रहो भवति तस्यैव बलं जयश्च सिद्धेत्। लग्नस्तथा सप्तमभावं त्यक्त्वा अन्यस्थानेषु स्थितः पापग्रहः

मिथः शत्रुदृष्टी तदा वादिनौ द्वौ मिथः खड्गपुत्रीप्रहारं विधत्तः।।
स्मरांगेशचंद्रेशराफे विवादः चिरं द्विस्वभावे स्वगेऽन्येशसंसत्।।२।।

परस्परशत्रुदृष्टियुक्तश्चेत् उभयवादिनौ खड्गप्रहारं कुर्यास्ताम्। सप्तमेशलग्नेशयोः चन्द्रेण सह इशराफयोगः भवेत्तर्हि अधिकसमयं विवादो प्रचलिष्यति। तथैव द्वितीयगृहे द्विस्वभावराशौ सप्तमेशलग्नेशौ स्थितौ चेत् अन्यराजस्य स्थाने सभा भेवत्।

अणुभुक्तौ तनुनाथे सबले केंद्रस्थिते बली प्रष्टा।।
एवं मदपे वादी यदि लग्नास्तेशचंद्रमुत्तसिलम्।।३।।

सूक्ष्मभोगवान् अर्थात् यस्य बह्वंशादिनष्टाः तादृश लग्नेशो बलान्वितो केन्द्रे स्थितश्चेत् प्रष्टा बलीति, एवं प्राकरेण सप्तमेशश्चेत् वादी बलीति विज्ञेयम्। यदि लग्नेशसप्तमेशयोः चन्द्रेण सह इत्तसालयोगश्चेत्

तूर्णं झकटकशान्तिर्यद्वा तन्वस्तनाथमित्रदृशा।।
यदि कर्मेश्वरवर्गे लग्नस्मरनाथयोर्हि मुत्तसिलम्।।४।।

शीघ्रमेव विवादस्य शान्तिर्जायते। अथवा लग्नेशसप्तमेशयोः मित्रदृष्ट्या दशमेशस्य वर्गे लग्नेशसप्तमेशयोः इत्तसालयोगश्चेत्

यद्वांबुपयुतदृष्टं तत्पमित्युग्मं विवादहृन्नृपतः।।
वक्री तनुमदपत्योः संसदि विबलः खपेन यो दृष्टः।।५।।

अथवा चतुर्थेशेन युक्तो वा दृष्टस्तथा लग्नेशसप्तमेशौ स्थितौ चेत् राजस्य माध्यमेन उभयोः विवादो शान्तिं गच्छेत्। लग्नेशसप्तमेशयोः यः कोऽपि वक्री चेत् सभायां स एव निर्बलस्तथा यो दशमशेन दृष्टश्चेत् स सभायां विबलः

संसद्यन्यायी स्याद्यश्चार्केणेत्तसालत्कृत्सबली।।

यः स्वर्क्षोच्चे केंद्राधिपमुत्तसिली नृपः सहायः स्यात्।।६।।

तथा यो सूर्येण सह इत्तसालं कुर्यात् स एव बली भवेत्। यो स्वोच्चराशिस्थ केन्द्राधि पतिना सह इत्तसालं कुर्यात् तर्हि नृपः सहायको भवेत्।

चेत्कर्मपे वीर्ययुतेऽर्कपुत्रे क्षोणीजदृष्टे हि चतुष्टयस्थे।।

न्यायस्तदा धर्मपरो न पूर्णदण्डेन युक्तोऽवनिजे दशस्थे।।७।।

यदि २१ शनिदशमेशौ बलान्वितौ तथा कुजेन दृष्टौ केन्द्रे स्थितौ चेत् न्यायो धर्मयुक्तो नैव स्यात् किन्तु पूर्णदण्डयुक्तो भवेत्। यदि कुजबृहस्पतिशुक्राः दशमस्थाने स्थिताश्चेत्

ईज्ये सिते धर्मपरश्च पूर्णो न्यायो बुधे राज्यगते विमिश्रः।।

भानौ सदंड सशुभे हिमांशौ शुभः सदण्डस्त्वशुभेऽशुभश्च।।

तनुमदनपशीतांश्धीशराफे विवादश्चिरमशुभतनौ खे भूपसंसत्ततोऽन्या।।८।।

धर्मयुक्तपूर्णन्यायं भवेत्। यदि बुधो दशमे स्थितश्चेत् विमिश्रन्यायं, सूर्यश्चेत् दण्डसहितन्यायं, शुभयुक्तश्चन्द्रः चेत् शुभं, अशुभयुक्तश्चेत् दण्डसहितं तथा अशुभं भवेत्। लग्नेशसप्तमेशयोः चन्द्रेण सह इशराफयोगश्चेत् विवादः चिरकालपर्यन्तं प्रचलेत्। यदि लग्नस्य दशमभावः अशुभग्रहयुक्तश्चेत् राजस्य अन्यसभा सम्भाव्यते।

रोगप्रश्ने विचारः

वैद्य आद्यं खभं रोगवान् भेषजं तुर्यभं रुग् रिपुः सत्पदं यच्छुभम्।।

पापयुक् चेत्रिकस्थो विधुः पापिनः कोशसप्तान्त्यगा रोगिणो मृत्यवे।।९।।

प्रथमगृहं वैद्यस्य, दशम रोगिणां,चतुर्थगृहं षष्ठमगृहं रोगस्य भवेत्। यत् गृहं शुद्धं वा शुभग्रहयुक्तं चेत् शुभं भवेत्। यदि पापयुक्तचन्द्रः ४/८/१२ स्थाने स्थितस्तथा पापग्रहः २/७/१२ स्थाने स्थितश्चेत् रोगिणां मृत्युर्भवेत्।

यदैवात्र योगे रविर्लग्नयातो बुधः सप्तमे स्याद्भुतं रोगिमृत्युः।।

विरोगस्य कष्टं यदांगे खलः स्याद्विषक् निर्गुणस्तत्कृता रोगवृद्धिः।।१०।।

यदि अस्मिन् योगे सूर्यो लग्ने, बुधः सप्तमे स्थितश्चेत् शीघ्रमेव रोगिणां मृत्युः भवेत्। यदि रोगसहितश्चेत् कष्टं भवेत्। यदि रोगसहितश्चेत् कष्टं भवेत्। यदि लग्ने पापग्रहः स्थितश्चेत् वैद्यः निर्गुणी भवेत्तथा तस्य वैद्यात् रोगवृद्धिः जायते।

शुभेऽस्मिन् सुखी चेत्सुखे स्यादसौम्ये भिषग्भेषजैस्तस्य वै दीर्घरोगः।।

शुभैरत्र सद्वैद्यदत्तौषधीभिः सुखी चेत्स्मरे पापिनोऽन्यः कुरोगः।।११।।

यदि लग्ने शुभग्रहोऽस्ति चेत् सुखी भवेत्। यदि चुतर्थगृहे पापग्रहः स्थितश्चेत् वैद्यस्य औषधेन दीर्घरोगो जायते। यदि चतुर्थगृहे शुभग्रहश्चेत् सद्वैद्यस्य औषधेन रोगी सुखी भवेत्। यदि सप्तमे पापग्रहः स्थितश्चेत् औषधेन तथा वैद्यात् अन्यरोगोद्भवः जायते।

भिषग्भेषजाभ्यां विलोमे सुखी स्यात् खलैः कर्मगै रोगवृद्धिः स्वबुद्ध्या।।

कुपथ्याद्विलोमे सुखं चेद्धिमांशुः शुभैर्दृष्टयुर्केद्रगो लग्नपेन।।१२।।

यद्यस्मात् विलोमश्चेत् अर्थात् सप्तमे शुभग्रहः स्थितश्चेत् रोगी सुखी भवेत्। यो पापग्रहः दशमे स्थितश्चेत् स्वबुद्ध्या कुपथ्यकरणात् रोगवृद्धिर्जायते। यदि विलोमश्चेत् सुखी भवेत्। यदि चन्द्रो शुभग्रहैः दृष्टयुक्तः केन्द्रे स्थितस्तथा लग्नेशेन सह इत्तसालं कुर्यात्तर्हि

विधायेत्तसालं हरेद्रोगजालं यदा केंद्रयातो विधुर्लग्नाथः।।

शुभेः केवलैर्दृष्टयुग्वक्रगास्ताष्टपार्कैर्विहीनो गदानाशु हन्यात्।।१३।।

रोगजलं हरेत्। यदि केन्द्रस्थ लग्नेशस्तथा चन्द्रः केवलशुभग्रहैः दृष्टयुक्तस्तथा सप्तमेशाष्टमेशौ सूर्यात् रहितौ चेत् शीघ्रमेव रोगनाशः भवेत्।

चरे वा द्विदेहे तनौ चंद्रलग्नेट् शुभैर्वीक्षितो वा स्वराशेर्हिगांशौ।।

खभे वा सुखे रोगनाशोऽथ चंद्रांगपत्योः शुभेनेत्तसाले सुदृष्टे।।१४।।

यदि चरे वा द्विस्वभावलग्ने चन्द्रलग्नेशौ शुभग्रहेण दृष्टौ वा स्वराशिस्थ चन्द्रो दशमे वा चतुर्थे वा स्थितश्चेत् रोगनाशो भवेत्। तथैव चन्द्रलग्नेशयोः इत्तसालं शुभग्रहः शुभदृष्ट्या वीक्ष्यते तर्हि

सुखं रोगहानिर्यदेन्दुः स्वभस्थेत्तसाली रुजं हन्ति वक्रेऽत्र गेहे।।

विकारं पुनः कल्पयेत्सत्यपथ्याद्यदीद्वंगपावष्टमे मृत्युरेव।।१५।।

सुखं तथा रोगहानिश्च जायते। यदि स्वराशिस्थ चन्द्रो शुभग्रहेण सह इत्तसालं करोति चेत् रोगनाशकारको भवेत्तथैव चन्द्रस्य गृहे कोऽपि वक्रग्रहः स्थितश्चेत् सत्पथ्यात् विकारो जायते। यदि चन्द्रलग्नेशौ अष्टमे चेत् मृत्युरेव सम्भाव्यते।

लग्नाष्टपमुत्तसिले पापदृशा वाष्टायगे लग्नपतौ।।

निधनस्थे रोगिमृतिश्चेत्सुखादधोंऽगपतिः।।१६।।

लग्नेशाष्टमेशयोः इत्तसालं भवेत् अथवा लग्नेशाष्टमेशौ पापदृष्ट्या युक्तौ अष्टमे एकादशे स्थितौ अथवा लग्नपतिः एकाकी एव अष्टमे स्थितश्चेत् रोगिणां मृत्युरेव। यदि चतुर्थगृहात् नीचस्थाने लग्नश्चेत्।

षष्ठे विधुः स्मरेशा कृतमुत्तसिलो मदेड्रिपौ च मृतिः।।

लग्नपचंद्रौ केंद्रे निधने वा पापमुत्तसिले।।१७।।

षष्ठस्थ चन्द्रः सप्तमेशेन सह इत्तसालं करोति चेत् तथा सप्तमेशो षष्ठमे स्थितस्तथा मृत्युर्भवेत्। यदि लग्नेशचन्द्रौ केन्द्रे वा अष्टमे स्थित्वा पापग्रहैः इत्तसालं कुरुतश्चेत्

अस्तमितौ खलदृष्टौ रोगमृत्तिश्चेत्तनौ हिमगुः।।

मंदो व्ययेऽष्टमेऽर्को भौमः खे रोगिणस्तदा मृत्युः।।१८।।

अथवा अस्तंगतः पापग्रहैः दृष्टश्चेत् रोगिणां मृत्युर्भवेत्। यदि चन्द्रो लग्ने, शनिः द्वादशे, सूर्यः अष्टमे तथा कुजो दशमस्थाने स्थिताश्चेत् रोगिणां मृत्युरेव।

केंद्रे सबले जीवति नो चेन्नो वै यदा खलाः सर्वे।।

तन्वंबुव्ययमृतिधीष्वायुर्नाशो यदा खलाः केंद्रे।।१९।।

केन्द्रे बलवान् शुभग्रहः स्थितश्चेत् जीवत्येव। यदि न भवेत्तर्हि न जीवेत्। यदि सर्वे पापग्रहाः १/४/१२/८/५ स्थाने स्थिताश्चेत् आयुर्नाशो भवेत्। यदि पापग्रहः केन्द्रे

पृष्ठोदयेऽष्टमस्थे चंद्रे मृत्युर्यदाष्टमांगमदे पापाः।।

शुभा विवीर्या रोगिमृतिश्चेद्विधुः सुखाष्टमगः।।२०।।

पृष्टोदशराशौ अष्टमस्थाने चन्द्रः स्थितश्चेत् मृत्युरेव। यदि अष्टमलगनौ तथा सप्तमगृहे पापग्रहः स्थितश्चेत् शुभग्रहो निर्बली इव रोगिणां मृत्युकारको भवेत्। यदि चन्द्रः चतुर्थे तथा अष्टमे

पापद्वयमध्यगतो मृत्युश्चेज्जन्मभे शनिर्विसौम्यदृशा।।

पापेक्षितो मृतिश्चेन्निधने यज्जन्मभं खलैर्दृष्टम्।।२१।।

स्थित्वा द्वयोः पापग्रहयोः मध्ये स्थितश्चेत् मृत्युरेव भवेत्। यदि जन्मराशिस्थ शनिं पापग्रहः पश्चेत्तथा शुभग्रहो न पश्चेत्तर्हि मृत्युरेव। यदि अष्टमे गृहे यस्य जन्मराशिः पापग्रहैः दृष्टश्चेत्

तस्य मृतिर्यदि चंद्रो मंदकुजेर्क्षे तनौ खले मृतिगे।।

मंदे कुजे भृगौ वा सप्तमगे निर्बलैः शुभैर्मृत्युः।।२२।।

तस्य मृत्युर्भवेत्। यदि शनिः कुजस्य राशौ चन्द्रो, लग्ने पापग्रहः, अष्टमे शनिः कुजश्च, सप्तमे शुक्रस्तथा शुभग्रहो निर्बलश्चेत् मृत्युर्भवेत्।

केंद्रे त्रिकोणेषु शुभाः सदंगं सद्वीक्षितं पूर्णविधुश्च केंद्रे।।

त्रिलाभयोर्वा सुखमेति रोगी यदा तनौ वित्सकलश्च चंद्रः।।

केंद्रे स्थितौ शुक्रगुरूखलाश्च षडायगाः सौख्यमुपैति रोगी।।२३।।

यदि १/४/७/१०/९/५ स्थानेषु शुभग्रहः स्थितः, शुभलग्नं शुभग्रहः पश्चेत्तर्हि, पूर्णचन्द्रो १/४/७/१०/३/११ स्थानेषु स्थितश्चेत् रोगी सुखी भवेत्। यदि लग्ने बुधपूर्णचन्द्रौ, केन्द्रे शुक्रबृहस्पती, पापग्रहः षष्ठमे, एकादशे स्थितश्चेत् रोगी सुखी भवेत्।

अथ संततबाधादिषु देवादिदोषज्ञानम्

रवौ हि देवा हिमगौ च देव्यः शुक्रेऽम्बुदेव्यः पितरो गुरौ च।।
शाकिन्य आरे कुलजास्तथा ज्ञे भूताशनौ गोत्रभवाश्च राहौ।।१।।

द्वादशे वा अष्टमे सूर्यः स्थितश्चेत् देवः, चन्द्रश्चेत् देवी, शुक्रश्चेत् जलदेवी, बृहस्पतिः चेत् पितरः, कुजश्चेत् शाकिनी, बुधश्चेत् कुलभूतं, शनिश्चेत् स्वगोत्रदेवी, राहुश्चेत्

प्रेता व्ययाष्टोपगते प्रबाधां कुर्वन्ति चोच्चर्क्षगते प्रवीर्ये।।
साध्यां हिमांशौ च कुजे विवीर्ये साध्यां यदा केंद्रखला सवीर्याः।।
बाधामसाध्यां प्रददत्यपापाः केंद्रे प्रवीर्या जपसाध्यतां च।।२।।

प्रेतबाधा जायते। उच्चराशिस्थ बलवान् चन्द्रश्चेत् साध्यस्तथा कुजो निर्बली चेत् साध्यबाधां कुर्यात्। यदि केन्द्रे पापग्रहो बलान्वितश्चेत् असाध्यस्तथा केन्द्रे शुभग्रहो बली चेत् जपसाध्यबाधां कुर्यात्।

मित्रेण प्रीतिर्वा संगमो भविष्यति न वेति प्रश्ने विचारः
लग्नभवाधिपमुक्तसिले सति संगमतेऽप्यथवेष्टदृशा।।
तनुपे भवगे भवपे तनुगे हितता यदि केंद्रगयोर्ग्रहयोः।।१।।

लग्नेशस्तथा एकादशेशयोः इत्तसालयोगश्चेत् अथवा उभयोः परस्परमित्रदृष्टिश्चेत् संगमो भवेत् तथा लग्नेशः एकादशे, एकादशेशो लग्ने स्थित्वा केन्द्रस्थाने स्थितस्तथा परस्परमित्रदृष्टिश्चेत्

देवदोषज्ञापकचक्रम्

अष्टमभावे	सूर्यः	चन्द्रः	कुजः	बुधः	गुरुः	शुक्रः	शनिः	राहुः
फलम्	देवः	देवी	शाकिनी	कुलभूतः	पितरः	जलदेवी	स्वगोत्रदेवी	प्रेतः

हितदृक् हितता यदि कंटकतो द्वितये च तयोः सुदृढा प्रथमा।।
हितता च ततस्त्रितये स्थितयोर्हितता प्रभविष्यति पूर्णतरा।।२।।

मित्रत्वञ्जायते। यदि केन्द्रात् द्वितीयगृहे स्थित्वा उभयोः मित्रदृष्टिश्चेत् तयोः सुदृढा मित्रता जायते। यदि केन्द्रात् तृतीयगृहे स्थितश्चेत् मित्रता पूर्णतरा भवेत्।

गुप्तकार्यप्रश्ने विचारः

लग्नेशि चंद्रे च शुभेत्तसाले वा सदृशा पूर्णबले च केंद्रे।।

केंद्राद्वितीयेऽपि च गुप्तसिद्धिर्नापोक्लिमस्थे त्वशुभेत्तसाले।।१।।

लग्नेशचन्द्रयोः शुभग्रहेण सह इत्तसालयोगश्चेत् अथवा केन्द्रे शुभदृष्ट्या पूर्णबलवान् चेत् केन्द्रे द्वितीयस्थाने स्थितश्चेत् गुप्तसिद्धिस्तथा आपोक्लिमस्थाने स्थित्वा अशुभग्रहेण सह इत्तसालं करोति चेत् सिद्धिः नैव भवेत्।

व्ययप्रश्ने विचारः

परिणयकुटुंबमित्राद्यर्थं सौम्यैः खलैर्नृपाग्निचौरार्थम्।।

भौमे व्यभिचारार्थं सौम्ये वाणिज्यगोपदाश्वार्थम्।।१।।

यदि द्वादशगृहे शुभग्रहस्थितश्चेत् विवाहः, कुटुम्बं, मित्रादीनामर्थं तथैव पापग्रहश्चेत् राजा – अग्नि – चौरार्थम्, कुजश्चेत् व्यभिचारार्थं, बुधश्चेत् वाणिज्यं, गोपदाश्वार्थम्

जीवे धर्माय भृगौ पत्यर्थं भास्करे नृपस्यार्थम्।।

चंद्रे केलिसुखार्थं शन्यग्वोरन्त्यभे व्ययो नेष्टः।।२।।

बृहस्पतिश्चेत् धर्मस्य अर्थः, शुक्रश्चेत् पतिसम्बद्धार्थः, सूर्यश्चेत् राज्ञः अर्थः, चन्द्रश्चेत् क्रीडासुखस्य अर्थः, शनिराहू चेत् नेष्टव्ययः भेवत्।

स्वामिभृत्यप्रश्ने विचारः

तनुधनुमृतिसप्तमेषु सौम्यैः पतिभृतकौ धनिना सुखार्थयुक्तौ।

इह पापिभिरीशभृत्यनाशो यदि शीर्षोदयभं शुभेक्षितं वा।।१।।

१/२/८/७ एतेषु गृहेषु शुभग्रहोऽस्ति चेत् स्वामी तथा भृत्यश्च केनापि धनीपुरषेण सुखं तथा अर्थयुक्तौ भविष्यतः। एतेषां पूर्वोक्तगृहे पापग्रहः भवेत्तर्हि स्वामिनः भृत्यश्च नाश एव सम्भवेत्। यदि शीर्षोदयराशिः शुभग्रहैः युक्तदृष्टश्चेत्

धनमृत्यरिगैः शुभैस्त्रिलाभारिषु पतितेर्भृतकस्य सौख्यलाभौ।।

तनुकोशमदाष्टमेषु पापाः क्रमतश्चेद्व्ययविभ्रमार्तिनाशाः।।२।।

अथवा २/८/६ स्थानेषु शुभग्रहस्तथा ३/११/६ स्थानेषु पापग्रहोऽस्ति चेत् भृत्याय सुखं, लाभञ्च जायते। १/२/७/८ स्थानेषु पापग्रहोऽस्ति चेत् क्रमात् व्ययः, विभ्रमः, दुःखं, नाशश्च भवेत्।

प्रभोः कीदृश चित्तमिति प्रश्ने विचारः

सौम्येन्दुदृष्टौ तनुसप्तपौ चेत्पापैर्विना भूमिपतिप्रसादः।।१।।

यदि लग्नेशसप्तमेशौ शुभग्रहैर्वा चन्द्रेण वा दृष्टौ तथा पापग्रहैः न दृष्टौ चेत् भूमिपतेः प्रसन्नता विज्ञेया।

अयमन्यो वा प्रभुर्भव्य इति प्रश्ने विचारः

यदांगपः केंद्रगतः षडीशावान्त्याधिनाथेन कृतेत्तसालः।।

परेश्वरोऽर्थाय विलोमतो नो चेद्धर्मसंस्थे नहि वा त्रिगेन।।१।।

लग्नेश्वरे मुत्तसिलं तनोति वा लग्नगोऽन्यः प्रभुरर्थदः स्यात्।।

पापान्तरस्थोऽस्तगतः खलेत्तसाली हि केंद्रेन परः प्रभुः स्यात्।।२।।

यदि केन्द्रगतौ लग्नेशषष्ठेशौ द्वादशेन सह इत्तसालं कुरुतश्चेत् परप्रभुः अर्थदायको भवेत्। तथैव विलोमश्चेत् परप्रभुः न समीचीनः इति ज्ञेयः। यदि नवमेशः वा तृतीयेशेन सह लग्नेशः इत्तसालं कुर्यात् वा लग्ने स्थितश्चेत् द्वितीयप्रभुः अर्थदायको भवेत्। यदि लग्नेशः पापग्रहाणां मध्ये स्थित्वा तथा केन्द्रेऽपि स्थित्वा पापग्रहेण सह इत्तसालं करोति चेत् द्वितीयप्रभुः न समीचीन इति ज्ञेयः।

अथ स्वपतिः शुभो वाऽन्यपतिरिति प्रश्ने विचारः

तनुपे बलिनी शुभक्षितयुक्ते स्वोच्चभगे च चतुष्टयसंस्थे।।

शीतगुमुत्तसिले निजनाथोऽर्थप्रद एव यदा मदनेशः।।१।।

लग्नेशो बलान्वितो शुभग्रहैः दृष्टयुक्तस्तथा स्वोच्चराशौ केन्द्रे स्थित्वा चन्द्रेण सह इत्तसालं करोति चेत् स्वपतेः अर्थदायकाः भवन्ति। यदि सप्तमेशः

स्वोच्चभकेंद्रगतः शुभवीक्षायोगगतो विधुमुत्तसिली च।।

अन्यपतिः फलदो यदि लग्नेट् मुत्सरिफी विधुना फलदोऽन्यः।।२।।

स्वोच्चराशौ केन्द्रे स्थित्वा शुभग्रहैः दृष्टस्तथा चन्द्रेण सह इत्तसालं करोति चेत् अन्यपतिः फलदायको भवेत्। यदि लग्नेशः चन्द्रेण सह इशराफयोगे स्थितश्चेत अन्यपतिः फलदायको भवेत्।

सप्तपतिर्विधुमुत्सरिफी चेत्स्वीयपतिः फलदो यदि लग्ने।।

शीतकरे खलमुत्सरिफेऽन्यो राट् फलदः शुभमुत्सरिफे नो।।३।।

यदि सप्तमेशः चन्द्रेण सह इशराफयोगं करोति चेत् स्वपतिः फलदायको भवेत्। यदि लग्ने चन्द्रः पापग्रहेण सह इशराफयोगं करोति चेत् अन्यपतिः फलदायको भवेत्। तथैव यो शुभग्रहेण सह इशराफयोगं करोति चेत् अन्यपतिः फलदायको नैव भवेत्।

सेन्दुशुभैस्तनुगैर्निजभूपः सप्तमगैरपरोऽर्थितदः स्यात्।।

लग्नपतिस्तनुगो निजभर्त्तार्थाय च सप्तपतिर्मदनेऽन्यः।।४।।

चन्द्रेण युक्तो शुभग्रहो लग्ने स्थितश्चेत् स्वपतिः, अर्थदायकः, सप्तमे चेत् अन्यपतिः अर्थदायकः भवेत्। लग्नेशो लग्ने स्थितश्चेत् निजभर्ता अर्थदायकः तथा सप्तमेशः सप्तमे स्थितश्चेत् अन्यराजः फलदायको भवेत्।

एवं पदगृहवाहनादिप्रश्ने विचारणीयाः

वाटिकाक्षेत्रादिलाभप्रश्ने विचारःतनौ वारिभे

सौम्यखेटैश्च केंद्रे विपापैः स्वभोच्चादिगैः सद्युतीक्षे।।

दधानैः सुखं कर्षकस्यान्नलाभो यदांगे खलो नास्तिरल्पा सबाधम्।।१।।

लग्ने वा चुतर्थे शुभग्रहः पापग्रहरहितः केन्द्रे स्थित्वा स्वोच्चादिराशौ शुभग्रहैः युक्तदृष्टश्चेत् कृषिकाय अन्नलाभो भवेत्। यदि लग्ने पापग्रहश्चेत् अन्नप्राप्तिः नैव भवेत्। यद्यस्ति चेदपि बाधासहितं, राज्ञः वा चोराद्वा हानिर्जायते।

नृपाच्चौरतोऽथोऽम्बुनि क्रूरयुक्ते कृषिं सन्त्यजेद्राजचौरादिभीत्या।।

खलैः सप्तमस्थैरवृष्ट्यान्नशोषो यदाल्पं भवेदन्नमीशस्य भीत्या।।२।।

चतुर्थगृहं क्रूरयुक्तश्चेत् राजभयात् चोरभयात् क्षेत्रं त्यक्त्वा गच्छेत्। यदि सप्तमे गृहे पापग्रहः स्थितश्चेत् वर्षाभावेन अन्नं शुष्कं भवेत्। यत्किञ्चित् अवशिष्यते चेदपि राजभयात्

तथा वैरिचौरा हरन्ति द्रुतं चेद्दशेशे खसप्ताष्टगे सौम्ययुक्ते।।

शुभालोकिते वाटिकाक्षेत्रसिद्धिः खपेशे शुभे वक्रियुक्ते च वक्रे।।३।।

वैरिचौराः हरन्ति। यदि दशमेशः १०/७/८ एतेषु गृहेषु शुभग्रहयुक्तो वा दृष्टश्चेत् वाहिकाक्षेत्रादीनां सिद्धिर्भवेत्। यदि दशमेशो शुभग्रहश्चेत् वक्रग्रहयुक्तः वक्री चेत्

भवेद्वृक्षकक्षेत्रनाशोऽथ तस्मिन्न वक्रेऽस्तगे जीर्णवृक्षाः शुभाः स्युः।।

तनौ मार्गगा बालवृक्षाः शुभाः स्युश्चरे खेशदृष्टे द्रुमाणां क्षयः स्यात्।।४।।

वृक्षक्षेत्रनाशो भवेत्। यदि दशमेशो न वक्रत्वेन अस्तंगतश्चेत् जीर्णवृक्षाः शुभाः स्युः। तथैव लग्ने शुभग्रहः दशमेशः मार्गी तर्हि तालवृक्षाः समीचीनाः भवन्ति अर्थात् फलदायकाः स्युः। तथैव चरलग्नो दशमेशेन दृष्टश्चेत् वृक्षाणां नाश एव।

भूभाटकप्रश्ने विचारः

तन्वम्बुखास्तेषु शुभैर्धनाप्तिर्भूभाटकादत्र खलैर्न चैव।।१।।

१/४/१०/७ एतेषु गृहेषु शुभग्रहः स्थितश्चेत् भूभाटकात् धनप्राप्तिस्तथा यदि पापग्रहश्चेत् नैव प्राप्तिरेव।

भृत्यचतुष्पदप्रश्ने विचारः

षष्ठेश्वरो लग्नपचंद्रमोभ्यां यदेत्तसाली रिपुपोंऽगगो वा।।

षष्ठस्थितौ वा रिपुलग्ननाथौ शुभेक्षितौ वाहनभृत्यलब्धिः।।१।।

यदि षष्ठेशलग्नेशयोः चन्द्रेण सह इत्तसालयोगः चेत् अथवा शुभग्रहैः दृष्टौ षष्ठेशलग्नेशौ लग्ने स्थितौ चेत् वाहनप्राप्तिः, भृत्यप्राप्तिश्च जायते।

अङ्गाङ्गपौ वीर्ययुतौ तदानीं भृत्याश्च वाहाप्तिरथ स्मरे च।।

स्मरेश्वरो वीर्ययुतो हि वाहभृत्यादिलाभो नियतं प्रदिष्टः।।२।।

यदि लग्नस्तथा लग्नेशश्च बलान्वितौ चेत् वाहनप्राप्तिः, भृत्यप्राप्तिस्तथा सप्तमगृहे सप्तमेशो बलवान् चेत् वाहनभृत्ययोः लाभो निश्चयेन भवेत्।

बन्धमोक्षप्रश्ने विचारः

केन्द्रे केद्राधिनाथेन तनुपस्येत्तसालतः।।

बंधमोक्षो न लग्नेशो लग्ने केंद्रखलाश्चिरात्।।१।।

केन्द्रे केन्द्राधिनाथेन सह लग्नेशस्य इत्तसालयोगः चेत् बन्धनात् मुक्तिः नैव साध्यते। लग्नेशः लग्ने, पापग्रहः केन्द्रे स्थितश्चेत् बहुकालानन्तरं मुक्तिः स्यात्।

सतामित्तसालश्च कंबूलयोगो यदा कंटके बन्धमोक्षश्चिरात्स्यात्।।

यदापोक्लिमे लग्नपोऽन्त्येशपापेक्षितो दीर्घबन्धो यदा लग्नपेन्दू।।२।।

यदि केन्द्रे शुभग्रहाणाम् इत्तसालं तथा कम्बूलयोगः चेत् बन्धनात् बहुकालानन्तरं मोक्षो भवेत्। यदि आपोक्लिमस्थाने लग्नेशं पापद्वादशेशः पश्येत्तर्हि बहुकालपर्यन्तं बन्धनं भवेत्। यदि लग्नेशस्तथा चन्द्रः

शुभैः संयुतो स्याच्छुभं केंद्रसस्थांगनाथेत्तसाले न मोक्षोऽर्थितोऽपि।।

यदा केन्द्रगो लग्नपस्त्रन्त्यधर्मारियातेत्तसाली हठाद्बंन्धमोक्षः।।३।।

शुभग्रहैः युक्तौ चेत् शुभफलं तथा केन्द्रस्थ लग्नेशेन सह चन्द्रस्य इत्तसालं भवेत्तर्हि मोक्षोऽर्थितोऽपि नैव लभ्यते। यदि केन्द्रस्य लग्नेशः ३/१२/९/६ स्थानेषु स्थितेन ग्रहेण सह इत्तसालं करोति चेत् हठात् बन्धमोक्षो जायते।

सुखेनाथ चंद्रांगनाथेत्तसाले हि कष्टादथाष्टेशपापांगपत्योः।।

सुखे मुत्सिलं बन्धनान्मृत्युरेवेत्तसाले खलेन्द्वोः सुखे मृत्युरेव।।४।।

चन्द्रलग्नेशयोः इत्तसालं भवेत्तर्हि कष्टेन मोक्षः, अथवा अष्मेशपापग्रहयोः लग्नेशस्य च चतुर्थस्थाने इत्तसालं भवेत्तर्हि बन्धनात् मृत्युस्तथा चतुर्थग्रहे पापग्रहचन्द्रयोः इत्तसालयोगश्चेदपि मृत्युर्भवेत्।

मृतीशक्षपानाथयोरित्तसाले मृतिर्वांगनाथेऽस्तगे क्रूरदृष्टे।।

मृतिश्चैवमारे विनिष्कास्य गुप्तेः समाहन्यते चेद्वपुः शीतरश्मी।।५।।

अष्टमेशचन्द्रयोः इत्तसालयोगश्चेत् मृत्युः, अथवा लग्नेशोऽस्तंगतश्चेत् वा क्रूरदृष्ट्या पश्येत्तर्हि मृत्युरेव। एवं प्रकारेण कुजोऽपि अस्तंगते वा क्रूरग्रहेण दृष्टश्चेत् रक्षास्थानात् बहिरानीय हन्यते। यदि लग्नेशचन्द्रौ

चरे बंधगोक्षश्च कर्के तु कष्टाच्चिराद्बन्धमोक्षोऽथ मत्स्ये हिमांशौ।।

विलम्बाद्रिपुत्वं स्थिरेंदौ चिरात्स्याद्विदेहे न मोक्षो भवेद्बंधकालै।।६।।

चरराशिगतौ चेत् बन्धनात् मुक्तिर्लभ्यते। यदि कर्कराशिस्थ चेत् बहुदिनानन्तरं कष्टेन मुक्तिर्लभ्यते। मीनशशिगत चन्द्रश्चेत् विलम्बेन मुक्तिः भेवत्। यदि स्थिरराशिस्थ चन्द्रश्चेत् बहुकालपर्यन्तं शतृत्वं भवेत्। यदि द्विस्वभावराशिगतश्चेत् बन्धनसमये नैव मोक्षो, बहुकालपर्यन्तं स्थित्वा मोक्षो प्राप्यते।

चंद्रेंऽगपे वा नवमे तृतीयसंस्थेत्तसाले सुखतः प्रमोक्षः।।

चंद्रेंऽगपे वा सहजे त्रिधर्मनाथेत्तसाले सुखतः प्रमोक्षः।।७।।

अथवा नवमस्थ चन्द्रस्य वा लग्नेशस्य वा तृतीयस्थ ग्रहेण सह इत्तसालयोगश्चेत् सुखपूर्वकं मोक्षे जायते। तृतीयस्थ चन्द्रस्य वा लग्नेशस्य वा तृतीयेशस्य वा नवमेशेन सह इत्तसालं भवेत्तर्हि सुखपूर्वकं मोक्षो भवेत्।

चेत्खेऽन्यलग्नाधिपमुत्तसीलं यमस्य गेहं समुपैति बद्धः।।

यदाङ्गराण्मुत्तसिली त्रिपेन धर्मेश्वरेणान्त्यगृहे स नश्येत्।।८।।

यदि दशमगृहे द्वादशेशलग्नेशयोः इत्तसालयोगश्चेत् बन्धपुरुषो यमराजगृहं यास्येत्। यदि द्वादशगृहे लग्नेशः तृतीयेशधर्मेशाभ्यां सह इत्तसालं करोति चेत् बन्धपुरुषो नाशमेति।

स्वर्क्षे खगते चंद्रे लग्नपतौ त्रिस्थमुतसिले मुक्तिः।।

स्यादथ बन्ध्वास्पदगतमुत्तसिलं यदा तृतीयचद्रस्य।।९।।

दशमगृहे स्वाराशिस्थ चन्द्रलग्नेशौ तृतीयस्थ ग्रहेण सह इत्तसालं कुर्यात् तर्हि बन्धनात् मुक्तिर्जायते। यदि शनियुक्तदृष्टश्चेत् तृतीयस्थ चन्द्रस्य

शनियुतदृष्टस्य चिरं गुप्तिस्थितिरङ्गकष्टमाधिरथो।।

कुजयुतदृष्टे केंद्रे चन्द्रे घातश्च बन्धने पीडा।।१०।।

चतुर्थस्थ ग्रहेण सह इत्तसालयोगश्चेत् बहुकालपर्यन्तं गुप्ते स्थित्वा शरीरकष्टं रोगबाधाञ्च प्राप्नुयात्। केन्द्रस्थितं चन्द्रं कुजः पश्येत्तर्हि बन्धने धातः पीडा च भवेत्।

यदाङ्गराणिमत्रदृशाङ्गनेशं संवीक्षते न्यायकरस्तदेशः।।

अरीक्षणो ना यदि लग्ननाथो दुश्चिक्यधर्माधिपतीत्तसाली।।११।।

यदि लग्नेशो मित्रदृष्ट्या सप्तमेशं पश्येत् चेत् राजा न्यायकारक इति विज्ञेयः। यदि पुरुषग्रहः लग्नेशो शत्रुदृष्टिसहितः तृतीयाधिपतिस्तथा धर्माधिपति वा इत्तसालं करोति चेत्

स्वयं हि मोक्षः स चतुष्टये चेच्चिराद्धनेशोऽम्बुनि दीर्घबन्धः।।

सप्ताधिपः सौम्यखगः सुदृष्ट्यालग्नेशदर्शी यदि बंधदायी।।१२।।

स्वयमेव मुक्तो भवेत्। यदि स एव लग्नो केन्द्रे स्थितश्चेत् बहुकालानन्तरं मुक्तो भवेत्। यदि द्वितीयेशः चतुर्थगृहे स्थितश्चेत् दीर्घकालं बन्धने भवेत्। यदि शुभग्रहः सप्तमेशश्च शुभदृष्ट्या लग्नेशं पश्येत्तर्हि बन्धनदायको भवेत्।

दाक्षिण्यकृच्चेद्गुरुभेन चंद्रो विकेन्द्रगः सौम्यशशीशदृष्टः।।

मोक्षः सुखं चेत्स्मरपो नवस्थोऽस्ते सौम्यदृष्टिः स्वयमेव नश्येत्।।१३।।

यदि चन्द्रो बृहस्पतेः राशितः दक्षिणतां करणोत्सुकः चेत् अर्थात् दक्षिणभागे केन्द्ररहितस्थाने स्थितः, शुभग्रहस्तथा स्वस्वामिना दृष्टश्चेत् सुखपूर्वकमुक्तिर्जायते। यदि सप्तमेशः नवमगृहे तथा सप्तमगृहे शुभग्रहदृष्टिः चेत् स्वयमेव नश्येत्।

दिनर्क्षतः चतुर्भान्तर्बद्धर्क्षं बद्धनाशनम्।।

ततस्त्रिभान्तर्मासेन तन्मोक्षश्च भवेत्ततः।।१४।।

अथवा दिनस्य नक्षत्रात् चतुर्णां नक्षत्राणां मध्ये बुद्धपुरुषस्य जन्मनक्षत्रं चेत् बन्धनपुरुषस्य नाशः तथा चतुर्णां नक्षत्राणां पूर्वत्रयनक्षत्रान्तर्गतश्चेत् मोक्ष एव।

आचतुर्भं तस्य मृतिस्ततो दण्डेन चात्त्रिभम्।।

तन्मोक्षश्च ततो नूनमाचतुर्भं रिपुक्षयः।।

ततस्त्रिभान्तरा मासचतुष्केन स मुच्यते।।१५।।

एतेषां त्रिनक्षत्राणां पश्चात् चतुर्णां नक्षत्राणां पर्यन्तं स्थिश्चेत् मृत्युस्तथा तदनन्तरत्रिनक्षत्रपर्यन्तं चेत् दण्डग्रहेणापि मुक्तिं प्राप्स्यति। तस्यानन्तरं नक्षत्राणि चत्वारि भवन्ति चेत् शत्रुनाशस्तथा तदनन्तरं नक्षत्रत्रयाणां मध्ये स्थितश्चेत् मासचतुष्टयेन मुच्यते।

ततश्चतुर्भमध्ये हि तन्मृतिस्तदनन्तरम्।।

आभत्रयं तस्य मोक्षो बलेनैतद्वदेत्सुधीः।।१६।।

तस्यानन्तरं चत्वारि नक्षत्राणि भवन्ति चेत् मृत्युः, तदनन्तरं नक्षत्रत्रयेषु स्थितश्चेत् मोक्षः भवेत्। बुद्धिमान् पुरुषः एवं रूपेण अस्य फलबलविचारणं करणीयम्।

बद्धमोक्षचक्रम्

४	३	४	३	४	३	४	३
नाशः	मोक्षः	मृत्युः	दण्डनमोक्षः	शत्रुनाशः	मासचतुष्टयेमोक्षः	मृत्युः	मोक्षः

सभायां नृपेण गुप्तदत्तो लेखः कीदृश इति प्रश्ने विचारः

विधुर्यस्येशराफेऽस्ति केंद्रे स्वोच्चर्क्षगः स चेत्।।

नृपो लेखप्रदोऽसौ चेदुपकेन्द्रे च्युतः पदात्।।१।।

चन्द्रो यस्मिन् ग्रहे इशराफे भवेत्तथैव स एव चन्द्रः केन्द्रे खोच्चराशिगतश्चेत् लेखप्रदो राजा भवेत्। यदि चन्द्रः केन्द्रस्य समीपवर्तिस्थाने स्थितश्चेत् लेखप्रदः स्वपदात् च्युतो भवेत् अर्थात् राज्यच्युतो भवेत्।

लग्नेशे शशिनि निजोच्चगे सुलेखो लग्नेन्दू स्थिरगृह आदरेण राज्ञा।।

संदिष्टो यदि तनुशीतगुर्निजेशा सन्दृष्टः कपटलिपिर्निरर्थकश्च।।२।।

यदि लग्नपतिः चन्द्रश्च स्वोच्चराशिगतौ चेत् राजा सुलेखो दत्तस्तथा लग्नचन्द्रौ स्थिरराशिगतौ चेत् राजा आदरेण अन्यकार्याय आज्ञां दत्तवानिति यदि लग्नस्तथा चन्द्रः स्वस्वमिना शुभदृष्ट्या दृष्टश्चेत् कटपस्य लेखस्तथा निरर्थको भवेत्।

पापेन्दौ खलमुत्सरिफे कुवृत्तः पूर्णेंदौ शुभकृन्मुत्सरिफे भवेत्सुवृत्तः।।

चेल्लग्ने विधुविधुजेशराफयोगो लेखो वै कुशलहरोऽन्यथाऽन्यथा च।।३।।

पापचन्द्रः शुभग्रहेण सह इशराफे स्थितश्चेत् लेखे निन्दितवृत्तान्तोऽस्तीति ज्ञेयः। यदि चन्द्रः शुभग्रहेण सह इशराफयोगे स्थितश्चेत् लेखः स्वकुलनाशक इति ज्ञेयः। अस्मात् योगात् अन्यथा चेत् कुशलकारक एव।

अनिष्टयोगेऽत्र तनावनिष्टो लेखो विशेषादशुभाय नूनम्।।

कोशादिभे यत्र गते हिमांशौ बुधेशराफोऽस्ति च तद्गृहस्य।।

वार्त्तानुकूला कथिता च शस्ता शुभेक्षमात्सा न च पापदृष्टेः।।४।।

यदि लग्ने अनिष्टयोगश्चेत् लेखोऽपि अनिष्टः, विशेषरूपेण अशुभफलदायक एव। यदि द्वितीयगृहात् यस्मिन् कस्मिन्नपि गृहे चन्द्रेण सह बुधस्य इशराफयोगश्चेत् तस्यैव गृहस्य अनुकूलवार्ता विज्ञेया तथा तं गृहं शुभग्रहः पश्येत्तर्हि अतिनेष्टवार्ता विज्ञेया।

राज्ञो ग्रामादिमुद्रालिखितप्राप्तप्रश्ने विचारः

यदार्कविद्भ्यां दशपेत्तसालस्तदा समुद्रालिखितस्य लाभः।।५।।

यदि सूर्यबुधाभ्यां सह दशमेशस्य इत्तसालयोगः चेत् मुहरसहितवस्तुलाभो भवेत्।

यस्मै लेखो दत्तः सम्प्राप्तस्तेन मानितो न वेति प्रश्ने विचारः

विधुलग्नपमुत्सिली स्मरेट् चेद्यदि वा लग्नपशीतगू कलत्रे।।

ननु यस्मै प्रहितः स तेन लब्धो यदि चंद्रोदयपस्मरेट् कबूलम्।।

शुभमित्रदृशेक्षितं स लेखः प्रहितस्तत्र गतः स मानितश्च।।१।।

चन्द्रस्तथा लग्नेशेन सह यदि सप्तमोशः इत्तसालं करोति चेत् अथवा लग्नेशस्तथा चन्द्रश्च सप्तमगृहे स्थिताश्चेत् प्रेषितलेखः स प्राप्त इति ज्ञेयः। यदि चन्द्रलग्नेशाभ्यां सह सप्तमेशस्य कम्बूलयोगः शुभग्रहस्य मित्रदृष्ट्या दृष्टश्चेत् प्रेषितो लेखः प्राप्तः स मानितश्च। यदि बुधचन्द्रौ शुभरूपेण इत्तसालयोगे स्थितस्तथा स्वोच्चराशौ भवतश्चेत् उत्तरपत्रं शुभमिति विज्ञेयम्।

पत्रोत्तरप्रश्ने विचारः

ज्ञेन्दू यदीत्तसाले स्वोच्चभगौ शुभौ शुभोत्तरं पत्रम्।।२।।

यदि बुधचन्द्रौ शुभमिव इत्तसालयोगे चेत् स्वोच्चराशिगतौ तर्हि उत्तरपत्रं शुभमिति विज्ञेयम्।

लेखग्राही कदैष्यतीति प्रश्ने विचारः

लग्नेश्वरे शीतकरेऽथ केन्द्राद्विनिर्गते सप्तपतीशराफे।।

मार्गं वहत्याशु चरे स्थिरे नो सौम्यैर्ग्रहैर्द्वित्रिगतैस्तथैति।।१।।

लग्नेशो वा चन्द्रश्च केन्द्रात् विनिर्गते सप्तमेशेन सह इशराफयोगे स्थितौ चेत् लेखग्राही मार्गे चलतीति ज्ञेयम्। यदि चरराशिगतश्चेत् बहुशीघ्रमागच्छेत्। स्थिरराशिगतश्चेत् नागच्छेत् तथैव शुभग्रहः द्वितीये तृतीयगृहेऽस्ति चेत् आगच्छतीति विज्ञेयः।

वार्तेऽयं सत्या मिथ्या वेति प्रश्ने विचारः

शुभेत्तसाले विधुलग्ननाथौ केन्द्रे ससौम्यौ किल सत्यवार्ता।।

विपर्ययेणात्र मृषैव वार्ता पापस्य योगे त्वशुभाऽन्यथान्या।।१।।

यदि शुभग्रहस्य इत्तसालयोगे चन्द्रस्तथा लग्नेशः केन्द्रे शुभग्रहेण सह स्थितौ चेत् निश्चयेन वार्ता सत्यम्, यदि अस्मात् योगात् विपर्ययश्चेत् मिथ्या इति ज्ञेया। पापग्रहस्य योगश्चेत् अशुभस्तथा अस्मात् अन्यप्रकारकयोगः चेत् कापि अन्यवार्ता इति ज्ञातव्या।

लग्ने विधुः स्त्यात्प्रबलः खगेनेत्तसालकृच्चेत्प्रकटैव वार्ता।।

आविर्भविष्यत्युदुयोपगेनांबुस्थेन गुप्ता प्रकटास्तगेन।।२।।

लग्ने बलवान् चन्द्रो यदि दशमस्थ ग्रहेण सह इत्तसालं करोति चेत् सा वार्ता अप्रकटिता इति तथैव लग्नस्थ ग्रहेण सह इत्तसालं करोति चेत् वार्ता प्रकटिता इति ज्ञेया। यदि चतुर्थस्थ ग्रहेण सह इत्तसालयोगश्चेत् वार्ता गुप्ता एव। यो सप्तमस्थ ग्रहेण सह इत्तसालं करोति चेत् प्रकटिता इति विज्ञेया।

शीतांश्चवस्थाबलतो ब्रूयाद्वार्ताविनिर्णयम्।।३।।

चन्द्रस्य अवस्थाबलात् वार्तायाः निर्णयः कार्यः।

उत्पातभयनाशो भविष्यति न वेति प्रश्ने विचारः

कृतशुभमुत्तसिले तनुनाथे केंद्रगते सबले शुभदृष्टे।।

नैव भयं यदि पामरभस्थः साऽशुभदृक् तनुपो बहुभीतिः।।१।।

यदि शुभग्रहेण सह इत्तसालयोगकरणः लग्नेशो बलान्वितः केन्द्रे स्थितस्तथा शुभग्रहैः दृष्टश्चेत् भयं न भवेत्। यदि लग्नेशः पापग्रहस्य राशौ स्थितस्तथा अशुभग्रहेण दृष्टश्चेत् बहुभीतिः जायते।

खलोदयपरन्ध्राणमुतसिलं यदा

कण्टके मृतेर्भयमिहैव चेद्विधुखलर्क्षलग्नेशयोः।

भवेन्मुतसिलं सबंधुहितरुग् यदा वित्तराट्

खलोदयपमुत्सिली भवति कण्टके वित्तदृत।।२।।

यदि पापलग्नेशस्तथा अष्टमेशयोः इत्तसालयोगं कुर्वन्तौ केन्द्रे स्थितौ चेत् मृत्युभयं जायते तथैव अस्मिन्नेव योगे चन्द्रस्तथा पापराशिस्थ लग्नेशयोः इत्तसालयोगश्चेत् बन्धुसहित मित्राणां रोगो जायते। यदि द्वितीयेशः पापलग्नेशेन सह इत्तसालं कुर्वन् केन्द्रे स्थितश्चेत् वित्तहृत् भवेत्।

व्ययपतिखललग्नाधीशयोरित्तसालं

व्ययमदनगृहे चेत्पापदृष्टे स नश्येत्।।

यदि तनुहिसरश्मी साशुभौ यत्र गेहे भवति

किल ततो भीश्चेत्खलर्क्षे विशेषात्।।३।।

द्वादशेशस्तथा पापलग्नेशयोः इत्तसालयोगः पापग्रहेण दृष्टस्तथा द्वादशेशः सप्तमग्रहे स्थितश्चेत् तस्य नाश एव। यदि लग्नस्तथा चन्द्रः अशुभग्रहेण सह यस्मिन् गृहे भवेत् तस्मात् गृहादेव भयं जायते। यदि लग्नः चन्द्रश्च पापग्रहराशौ स्थितौ विशेषरूपेण भयं जायते।

जिघांसया व्रजतो मे किं भविष्यतीति प्रश्ने विचारः

लग्नाम्बुचंद्राश्चरभे प्रयातुः पराभवश्चेत्खलमुत्सिलीन्दुः।।

खलेक्षितस्तत्र कृतेऽपि कार्ये विनिसृतो मृत्युवशं प्रयाति।।१।।

लग्नः, चतुर्थग्रहं, चन्द्रः एते सर्वे चरराशिगताः चेत् गमनपुरुषाय पराभवो जायते। यदि पापग्रहेण सह इत्तसालकरणे अनुरक्तः चन्द्रः पापग्रहेण दृष्टश्चेत् कार्यसिद्ध्यनन्तरमपि तस्मात् विनिसृतो भवेत् अथवा मृत्युवशं गच्छेत्।

चरोदये चाशुभदृष्टिवर्जिते शुभेत्तसाले हिमगौ शुभेक्षिते।।

निजेशदृष्टे विजयं च तोषतां समेत्य यायादभयं द्रुतं बली।।२।।

अशुभग्रहस्य दृष्टिः वर्जिते चरलग्ने स्थिते तथा शुभग्रर्हेण सह इत्तसालकरणे रतः चन्द्रः शुभग्रहैः तथा निजेशेन दृष्टश्चेत् विजयं च तोषतां प्राप्य बली भूत्वा निर्भयेन शीघ्रमागच्छेत्।

स्थिरे विलग्ने निधनं च बंधनं खलेत्तसाले हिमगौ मृतिं व्रजेत्।।

खले निजोच्चर्क्षगतेऽत्र भूभुजा प्रगृह्यतेंऽगेऽत्र चरे च मुच्यते।।३।।

यदि स्थिरलग्नश्चेत् मृत्युः वा बन्धनञ्च जायते। यदि चन्द्रस्य पापग्रहेण सह इत्तसालयोगश्चेत् मृत्युप्राप्तिर्जायते। यदि स्थिरलग्ने पापग्रहः स्वोच्चराशिगतश्चेत् राज्ञा बन्धनं भवेत्। यो चलल्ग्ने उच्चपापग्रहश्चेत् मुच्यते एव।

बहुषु कार्येषु कस्य सिद्धिरिति प्रश्ने विचारः

शुभे बलिन्यंगपतौ चतुष्टये पुरोक्तसिद्धिश्च परत्र तत्परा।।४।।

यदि शुभलग्नेशो बालन्वितः केन्द्रस्थाने स्थितश्चेत् पूर्वोक्तकार्यं तथा लग्नेशोऽन्यत्र स्थितश्चेत् तस्मात् परकार्याणां सिद्धिर्ज्ञायते।

निधिवस्तुसिंहादिसंशय प्रश्ने विचारः

केन्द्रेंऽगनाथे शुभमुत्तसीले तत्रास्ति वित्तं खलसद्युतेऽत्र।।

नीतं तदन्यैश्च निखन्य यद्वा वपुःपतौ वा हिमगौ तनुस्थै।।१।।

केन्द्रस्य लग्नेशग्रहेण सह इत्तसालयोगश्चेत् तस्मिन् स्थाने द्रव्यं भवेत्। यदि पापशुभग्रहयुक्तो लग्नेशः केन्द्रे स्थितश्चेत् अन्यजनः खनित्वा परिगृह्णाति। लग्नेशो वा चन्द्रश्च लग्ने स्थित्वा

खगेत्तसाले धनमेति किंच हिमांशुलग्नेश्वरमुत्तसीले।।

विपापकेन्द्रे खननं निधेः स्यादेवं हरिस्तत्र न वेति चिन्त्यम्।।२।।

दशमस्थ ग्रहेण सह इत्तसालयोगं करोति चेत् किञ्चिद्धनं प्राप्यते। चन्द्रस्तथा लग्नेशस्य इत्तसालं चेत् तथा केन्द्रे पापग्रहो न भवेत्तर्हि खननात् निधिः लभ्यते। एवं प्रकारेण अमुष्मिन् स्थाने सिंहोऽस्ति वा न इति प्रश्नस्य विचारः करणीयः।

सुमुत्सिली चेद्धनलाभकेन्द्रे पूर्णेन्दुरस्ति स्वमवाप्यते च।।

तन्वम्बुखास्ते प्रबलेन्दुरिद्रसोमान्तकाम्भः पतिदिक्षु वस्तु।।३।।

यदि शुभग्रहेण सह इत्तसालं कुर्वन् पूर्णचन्द्रः २/११/१/४/७/१० स्थाने स्थितश्चेत् तत्र धनं लभ्यते। यदि १/४/७/१० स्थाने बलवान् चन्द्रः स्थितश्चेत् क्रमेण इन्द्र, चन्द्र, यम, वरुणानां दिक्षु अर्थात् पूर्व – उत्तर – दक्षिण – पश्चिमेषु वस्तुरस्तीति ज्ञेयम्।

क्रमाद्विदध्याद्यदि शीतभानुः पापेत्तसाली सखलश्च केन्द्रे।।

पापैश्च केन्द्राष्टमसंस्थितैः स्यात्तत्रैव वित्तं खननाद्भयं च।।४।।

यदि चन्द्रः पापेन इत्तसालं कुर्वन् पापग्रहेण सह केन्द्रे स्थितस्तथा पापग्रहः १/४/७/८ स्थाने स्थितश्चेत् यस्मिन् स्थाने प्रश्नः कृतः तत्रैव धनं भवेत् परन्तु खननात् भयं जायते।

यावन्तः स्युः खेचरास्तुर्यसंस्थास्तावत्संख्यः स्यान्निधिस्तत्र गेहे।।

यत्संख्यांशैस्तुर्यनाथो गतौ वा चद्रात्तावद्भिः करैः स्याद्धिखातः।।५।।

यावन्तो ग्रहाः चतुर्थगृहे तावन्तो द्रव्यसमूहः तस्मिन् गृहे लभ्यते। चन्द्रात् चतुर्थेशो यावतः अंशान् कृत्वा दूरं गच्छेत् तावद्भिः हस्तैः खननात् द्रव्यं लभ्यते।

इन्दुलग्नेशयोस्तुर्येट् यावदंशान्तरी ततः।।

खातहस्ता निधेर्वाच्या एवं सिंहादिकान्तरम्।।६।।

चन्द्रस्तथा लग्नेशात् चतुर्थेशस्य यावदंशान्तरं भवेत् तावत् हस्तमिता भूमिः द्रव्यार्थं खननीयम्। एवं प्रकारेण सिंहादीनामपि अन्तरं विज्ञेयम्।

क्रियाद्धिमांशोर्गतभानि नेत्राहतानि पूर्णाग्नि दृतानि लब्धम्।।

पूर्वादिदिक् स्याद्विहृतस्य चौरैर्नष्टस्य सिंहस्य निधेश्च नूनम्।।७।।

मेषस्य चन्द्रात् गतराशीनां गुणं कृत्वा तृतीयभागं परिग्रहणे यल्लब्धं तदेव पूर्वादिक्रमात् चौर्यनष्टवस्तुतः तथैव सिंहस्तथा निधिदिशा विज्ञेया।

नौकागमप्रश्ने विचारः

विवीर्यैः खलैः षड्विधर्मान्त्यसंस्थैः सवीर्यैः शुभैः क्षेमतोऽभ्येति नौका।।

चरर्क्षोदये केंद्रगेन्दौ च शीघ्रं यदा पापिनः केंद्रगा वीर्ययुक्ताः।।१।।

निर्बली पापग्रहः ६/३/९/१२ स्थाने स्थितस्तथा शुभग्रहो बलवान् चेत् नौः सम्यग्रूपेण आगच्छेत्। यदि पापग्रहः केन्द्रे बलवान् चेत्

विवीर्याः शुभाः सद्बलेनेशराफी विधुर्जीवकोऽर्कोशुगोमज्जते नौः।।

यदेन्दुः शनेर्मुत्सिले भूमिजोंऽगे मृतौ कण्टके वार्कदृष्टः सपापाः।।

तनुस्त्रीखबन्ध्वीश्वरा मज्जते नौर्नृवस्तुप्रपूर्णा यदा केन्द्रनाथाः।।२।।

शुभग्रहो निर्बली तथा सद् बलेन इशराफयोगकरणे रतः चन्द्रस्तथा बृहस्पतिः अस्तंगतश्चेत् नौः निमज्जेत्। यदि चन्द्रस्य शनिग्रहेण सह इत्तसालं चेत् कुजलग्नौ अष्टमे वा केन्द्रे सूर्येण दृष्टस्तथा १/७/१०/४ गृहेषु अधिपतिग्रहः पापयुक्तश्चेत् मनुष्यवस्तु-सहितनौका निमज्जते।

कुजार्क्यन्विताः केचिदब्धौ म्रियन्ते यदेन्दुर्गुरुर्वाखलाढ्यस्तदा नौः।।

विभग्नैतिकष्टाद्यदा मृत्युयोगोऽत्र साप्तिः सुखदेत्यतो नो विलोमे।।३।।

यदि केन्द्रे स्वामी कुजः शनिना युक्तश्चेत् केचन मनुष्याः समुद्रे म्रियन्ते। यदि चन्द्रो वा बृहस्पतिः पापयुक्तौ चेत् नौः भग्नं तथा अतिकष्टेन बहिरागच्छेत्।

यदि अस्मिन् योगे मृत्युयोगो भवेच्चेदपि प्राप्त्या सुखसहितमागच्छेत्। अस्मिन् योगे विलोमश्चेत् अर्थात् सिद्धयोगश्चेत् सुखेन नैवागच्छेत्।

चेत्कण्टकेशा रविजेन संयुता जयन्ति बध्वा प्लवगाश्च तस्करान्।।

चेत्स्वे कुजो वाडववह्निनाश्धिह प्रदह्यतेऽन्तर्दहनेन चाम्बुनि।।४।।

यदि केन्द्रस्थ स्वामिग्रहः शनिना युक्तश्चेत् नावः चोरान् बध्वा आनयन्ति। यदि द्वितीयगृहे कुजश्चेत् जले बाडवाग्निना शीघ्रमेव भस्मं भवेत्।

चंद्रलग्नपयोः शत्रुदृष्ट्या पोतपयोः कलिः।।

अष्टमे नवमे नीचेऽरिभे चास्ते धनक्षयः।।५।।

यदि चन्द्रस्तथा लग्नेशस्य परस्परं शत्रुदृष्टिश्चेत् उभयनावस्वामिनोर्मध्ये कलहो जायते। यदि चन्द्रलग्नेशौ अष्टमे, नवमे, नीचे, शत्रुराशौ वा अस्तं गतौ चेत् धनक्षयं भवेत्।

सबले लग्ने विबले धनपे संग्रह उचितस्तनुभवनाथौ।।

परमबलौ यदि विक्रियलब्धिर्वा सबलं भवभं शुभयुक्तम्।।६।।

लग्नो बलवान् तथा धनेशो निर्बलश्चेत् धनसंग्रहणं कर्तुमुचितमेव। यदि लग्नेशौकादशेशौ परमबलिनौ अथवा एकादशगृहं बलसहितं तथा शुभग्रहयुक्तः चेत् विक्रयणे लाभो जायते।

शशांकलग्नाधिपमृत्युनाथैरेकर्क्षसंस्थैरशुभैर्विशेषात्।।

मृत्योर्भयं पोतपपोतयोः स्याद्वयोश्च दैवादिह बंधभीतिः।।७।।

चन्द्रलग्नेशाष्टमेशाः एकस्यां राशौ स्थिताश्चेत् नावस्तथा नावपतिरुभयोः मृत्युर्वा बन्धनभयं वा भवेत्। यदि तस्य स्थानस्वामी पापग्रहश्चेत् विशेषरूपेण उक्तफलं भवेत्।

उत्पातप्रश्ने विचारः

आसन्नघस्रं ग्रहणाद्रवीन्द्वोर्भूकंपनिर्घातरजोऽतिपाताः

भवन्ति चोल्कापरिवेषचापा यत्रैव तद्देशपतेः प्रणाशः।।१।।

सूर्यचन्द्रग्रहणात् सप्तदिनपर्यन्तं भूकम्प – निर्घात – रजोऽतिपातः वा उल्कापात – परिवेष – इन्द्रधनुः एताः यस्मिन् देशे सम्भवेयुः तस्य देशराजस्य नाशः भवेत्।

केतोः शिखा यद्दिशि यत्र चैति लब्धोदया यत्र च यानि भानि।।

शिखा स्पृशेत्तन्नृपतीन् सदेशान् हन्याद्यदा भौमशनिप्रदृष्टः।।२।।

केतोः शिखा यस्याम् दिशायां तथा यस्मिन् देशे उदयते, तस्मिन् देशे नक्षत्राणां स्पर्शनात् तत्रस्थ राज्ञां नाशो भवेत्। यदि कुजस्तथा शनिना दृष्टः

राहुः शनिर्वोदितधूम्रकेतुर्ज्येष्ठास्थितो युद्धरुजे प्रभंगम्।।

भूपस्य कुर्याद्यदि वाप्यकाले निरन्तरं सप्त दिनानि वृष्टिः।।३।।

राहुर्वा शनिरथवा ज्येष्ठानक्षत्रे धूम्रकेतोः उदयश्चेत् राज्ञः युद्धे तथा रोगे भङ्गो जायते। अथवा यस्मिन् देशे विना समयः निरन्तरं सप्तदिनपर्यन्तं

अल्पाऽथवा भूरितराऽस्थिमांसांगाराज्यरक्तस्य च यत्र देशे।।

भंगश्च तद्देशनृपस्य यद्वा वर्षासु वर्षा दिनसप्तकं चेत्।।४।।

अस्थि – मांस – अग्नि – घृत – रक्तवृष्टिः भवेत् तस्य देशस्य राज्ञः भङ्गो भवेत्। अथवा वर्षर्तौ सप्तदिनपर्यन्तं वृष्टिर्जायते चेत्

क्षोभो ध्वजिन्यास्त्वचिरेण धान्यं चेद्यत्र वृक्षा अरुणादिवस्त्रैः।।

वृता इवेक्ष्या हरिताः पतन्ति शुष्काः प्ररोहन्त्यथवेशभंगः।।५।।

सेनायाः क्षोभः, यावति काले धान्यं पक्वं भवेत् तस्मात् अर्धो वा चतुर्थभागकाले वा धान्यं पक्वं भवेत्। यस्मिन् देशे वृक्षाः अरुणादिवस्त्रैः दृश्यन्ते तथा हरिताः पतन्ति अथवा शुष्काः भवन्ति चेत् राज्ञः भङ्गो जायते।

नद्यो विलोमयाना रोदनहास्यप्रलापिता वाप्यः।।

शुष्यन्ति चेदशोष्याः कूपा नश्यन्ति भूपभंगभिये।।६।।

नद्यः विलोमरूपेण प्रवहेयुः, वापिषु रोदनहसनादि शब्दाः श्रूयन्ते अथवा रात्रिकाले सर्वदा रोदनशब्दश्चेत् देशस्य भङ्गो जायते। अथवा यस्मिन् देशे विना जलेन भूमिः विदारितो भवेत् तथा

अकस्माद्यदा तोरणाङ्गारकेतुप्रपातोऽथवा निश्य भीक्ष्णं च रोदः।

भवेद्यत्र तद्देश भंगोऽथ भूमीविदारो विना वारिपातं च यत्र।।७।।

यस्मिन् देशे अकस्मात् तोरण – अग्नि – केतुपतनम् वा रात्रौ नित्यरोदनं चेत् देशभङ्गः, अथवा विना जलवृष्ट्या भूभङ्गः

अकस्माज्जलस्यागमो निर्जले वारुणे वापि भूर्भूपभंगः समृद्धात्।।

दिवा वन्यसत्वो विशेषादभीतो विशेद्यत्र तत्रत्यभूपक्षयः स्यात्।।८।।

अकस्मात् निर्जलस्थानात् जलोद्भवः, जलस्थाने पृथ्वी विदारितश्चेत् राज्ञः अन्यसमृद्धिराजात् भङ्गो जायते। यदि दिवा कोऽपि अरण्यजन्तवः अत्यन्तः निर्भयत्वेन देशे, पत्तने, ग्रामादिषु प्रविशेयुः तथाऽपि राज्ञः नाशहेतव एव।

द्विपदपशुखगानां वामराणामकस्मात्तुमुलरणनिनादो वा परस्त्रीरतिश्च।।

भवति च दिनभंगो वा रवेः सम्भवोऽस्ते सलिलसुरपकाष्ठायां तथा फेरुशब्दः।।९।।

मनुष्येषु, पशुषु, पक्षिषु वा देवतानाम् अकस्मात् तुमुलयुद्धशब्दः सम्भवेत् अथवा परस्त्रिया रतिः, दिनभङ्गः, अस्ते सूर्यस्य सम्भवः, पश्चिमदिशायां फेरुशब्दः तथैव

यस्मिन् देशे वासरेशोऽतिकृष्णः खण्डो रूक्षो वा हितद्देशनाशः।।

सन्ध्यायुग्मे रक्तमेघावृतोऽर्को वृत्यायुक्तो यत्र नूनं रणाय।।१०।।

यस्मिन् देशे सूर्यनारायणः अत्यन्तकृष्णवर्णो वा खण्डितस्तथा रूक्षो इव दृश्यते चेत् तस्य देशस्य नाश एव। उभयसन्ध्ययोः अरुणवर्णमेघे सूर्यनारायणः परिवेशयुक्त इव दृश्यते चेत् देशे निश्चयेन युद्धं सम्भाव्यते।

ग्रस्तं विधुं वाप्युदयस्थमर्कं लग्नस्थमिन्दुं परिवेषगं वा।।

निरीक्ष्य तत्रत्यनृपस्य भंगो नूनं मृतिर्वा सुयशःक्षयश्च।।११।।

ग्रस्तं चन्द्रं वा उदयस्थ सूर्यं अथवा परिवेषसहित लग्नस्थं चन्द्रं राजा पश्येत् तर्हि तस्य देशराजस्य भङ्गः, मृत्यु स्तथा सुयशनाश एव भवेत्।

यत्र भानोर्ग्रहे वास्ते केतुका वा कबंधकाः।।

श्यामकीलादयो दृश्या मण्डले भूपसंक्षयः।।१२।।

ग्रहणसमये वा अस्तकाले सूर्यमण्डलस्य मध्ये केतुर्वा कबन्धस्य श्यामकीलादीनां दर्शनं भवेत्तर्हि राज्ञः क्षयहेतुरेव।

सुनिर्मलेऽर्के चेच्छाया न प्रतीपारिभीतिदा।।

देवपातप्रभंगाद्या दुर्भिक्षान्त्यार्तिभंगदाः।।१३।।

यदि सुनिर्मलसूर्ये छायप्रतीतश्चेत् प्रतिकूलशत्रुभिः भयं नैव भवेत्। यदि देवमूर्तिः स्वस्थानात् अधः पतन्ति वा प्रभंगो वा, भग्नं जायते तर्हि दुर्भिक्षं तथा अग्निकारणात् भङ्गो जायते।

आसप्ताष्टदशाहं चेच्चण्डवायुः सशर्करः।।

निरन्तरं याम्यरक्षः पश्चिमोत्थसदारिभिः।।१४।।

यदि सप्त वा अष्टो वा दशदिनपर्यन्तं सशर्करः, प्रचण्डपवनकारणात् अर्थात् अर्धं भवेत्तर्हि दक्षिण – नैर्ऋति – पश्चिमदिशावासिनः शत्रुभिः सङ्कटं प्राप्स्यन्तीति विज्ञेयम्।

हस्त्यश्वगावो निशि हर्षहास्यारावार्त्तिपूर्णा व्यशना नृपार्त्यै।।

धूमो विनाग्निं यदि वा गृहादिदाहो भवेद्यत्र तदीशभंगः।।१५।।

यदि रात्रिसमये गजः, अश्वः, गौः इत्यादि जन्तवः प्रसन्नचेष्टा कुर्वन्ति नाम हसन्ति, रुदन्ति, दुःखमनुभूय तृणादिकं न खादन्ति चेत् राज्ञः सङ्कटप्राप्तिरेव। यस्मिन् देशे विना अग्निः सर्वत्र अहोरात्रम् धूमो, गृहादि ज्वलनकारणेन तस्य देशस्य राज्ञः भङ्गो भवेत्।

अहतवाद्यरवो यदि वादकूपगिरिकुञ्जरवो नृपभंगदः।।

अमलिनेऽन्हिविभाति भमण्डलं निशि नवाकणधूमवदीशहृत्।।१६।।

विना वादनेन वाद्यशब्दः, कूपेषु, पर्वतेषु कुंजनेषु भयानकशब्दाः भवन्ति चेत् राज्ञः भङ्गो जायते। निर्मलदिवसे नक्षत्रमण्डलप्रकाशः, रात्रौ अप्रकाशश्चेत् अथवा सूक्ष्मधूमात् चेत् राजहानिरेव।

अन्हीन्द्रचापं जलदैर्विना यदा निशीन्द्रभागे सपयोधरं च तत्।।

नृपस्य हानिं तनुते विशेषतो जलेतरा वृष्टिविनाशनं परम्।।१७।।

विना मेघं दिने इन्द्रधनुषो वा रात्रौ पूर्वदिशायां मेघसहितः इन्द्र धनुषश्चेत् राज्ञः हानिरेव। तथैव विना जलं अन्यवस्तुनः विशेषवृष्टिश्चेत् अधिकनाश एव।

मेघैर्विना गर्जितवृष्टिविद्युतो भवन्ति वा स्थावरजंगमात्मनोः।।

विलोमता तत्र पतिच्युतिर्यदाऽथनिर्झरादेः स्थिरतातथाफला।।१८।।

विना मेघं गर्जितवृष्टिः तथा विद्युद्भावे वा स्थावराणां दशा जंगमा तथा जंगमानां दशा स्थावराणां इव यदा भवेत् तदा तस्य देशस्य राज्ञः पदच्युतिः भवेत्। अथवा निर्झरादीनां स्थिरता चेत् निष्फलमिति वक्तव्यम्।

चेद्गन्धर्वपुरं प्रधूमितदिशायां कोटकोचादिम।

द्रक्तं स्यानृपनाशनं यदि सितं शातादिशायां भवेत्।।

सूर्यास्तोदययोर्नृपार्थजयसिद्ध्यर्द्धिप्रदं चेध्वजः।

सौरो वावनिजो विधातृशकटं भिन्द्याज्जगत्संक्षयः।।१९।।

यदि सूर्यस्य उदयास्तमयसमये धूमयुक्तदिशायां गन्धर्वपुरस्य कोटकस्य पुरतः रक्तवर्णः दृश्यते चेत् राज्ञः नाश एव। यदि शान्तदिनेषु श्वेतवर्णदर्शनात् राज्ञः अर्थ – जय – सिद्धि – ऋद्धिश्च लभ्यते। यदि शनिर्वा कुजः च रोहिण्याः शकटभेदनं करोति चेत् जगद्विनाश एव सम्भवेत्।

नक्तं दिनं प्राक् प्रहरद्वये चद्भूमीप्रकंपोऽनिलवन्हिभागे।।

दुःखाग्निदुर्भिक्षरुगीशयुद्धैः प्रजाक्षयो भूमिपतेश्च भंगः।।२०।।

रात्रिसमये वा दिने मध्याह्नसमये वा वायव्यदिशायां वा अग्निकोणे भूकम्पो जायते तर्हि दुःखं, अग्निभयं, दुर्भिक्षं, राजयुद्धात् प्रजानाशः राजभङ्गश्च सम्भाव्यते।

नक्तं दिनं तूर्यतृतीययामे कंपो घरिण्या वरुणेन्द्रभागे।।

स्याद्भूरिवर्षा बहुसस्यसंपत्कंठास्यरोगैर्ज्वरतश्च पीडा।।२१।।

रात्रौ वा दिनस्य तृतीयचतुर्थयामे पश्चिमदिशायां वा पूर्वदिशायां वा भूकम्पो जायते तर्हि अधिकवृष्टिकारणात् सस्यसम्पद्वृद्धिर्भवेत्। तथैव कण्ठमुखरोगौसद् ज्वरपीडाऽपि स्यात्।

कार्तिकाश्विननभस्सु रवीन्द्वोरर्द्धपादलववद्ग्रहणं चेत्।।

सेज्यदृग्हिशुभसस्यसमृद्धिर्दक्षिणेहि सकलं ग्रहणं चेत्।।२२।।

ग्रस्तवत्समुदयास्तमये सच्चात्र भौमशनिदृगादिभिः क्षुत्।।

चेत्तमोवददुयास्तमये स्याद्भास्करस्य तिथिभानुदशाहात्।।२३।।

यदि कार्तिकाश्विन भाद्रपदमासेषु सूर्यचन्द्रयोः अर्धपादलववद् ग्रहणं बृहस्पतिना दृष्टश्चेत् सम्यक् सस्यवृद्धिर्भवेत्। यदि दक्षिणभागे सकलग्रहणं वा ग्रहणग्रस्तं उदयं वा अस्तं वा भवेत्तथा तस्मिन् कुजशनिग्रहयोः क्षुत् दृष्टिस्तथा सूर्यस्य उदयास्तकाले अन्धकारयुक्तग्रहणं स्थिते १५/१२/१० दिनपर्यन्तं।

भूरिधूलिरवनीपतिभंगश्चेद्दिनग्रहणतो ग्रसितेन्दुः।।

पक्षकान्त इह भूपतयो नाशं व्रजन्ति सुखमेति च लोकः।।२४।।

भूरिधूलियुक्ता वृष्टिः सम्पद्यते। तस्मात् राजभङ्गोऽपि जायते। यदि सूर्यग्रहणात् पञ्चदशदिनपूर्वं चन्द्रग्रहणं जायते तर्हि राजनाशः प्रजासुखञ्च भविष्यति।

चंद्रग्रहणतः पक्षावसाने ग्रहणं रवेः।।

तदा कोपात् क्षयं यान्ति भूपाः कष्टं तथा जनाः।।२५।।

यदि चन्द्रग्रहणात् पञ्चदशदिनपूर्वं सूर्यग्रहणं सम्भक्तेर्हि क्रोधवशात् राजनाशः, प्रजानां कष्टञ्च सम्पद्यते।

आसप्तघस्रं ग्रहणास्तयुद्धभूमीविदारात्परिवेषचापात्।।

दिग्दाहकंपौक्षुदवृष्टियुद्धरोगास्तदातः प्रशमोऽम्बुपातात्।।२६।।

सप्तदिनपर्यन्तं ग्रहणं, अस्तसमये ग्रहयुद्धं, भूमिविदारस्तथा परिवेशः, इन्द्रधनषः कारणात् दिशादाहः, भूकम्पः, अकान्तः, अवृष्टिः, युद्धं, रोगाः, सम्भवन्ति। तस्मिन् समये नाम उत्पातसमये वृष्टिकारणात् शान्तिः सम्प्राप्यते।

स्निग्धः सुवेषः परिवेष इन्दोर्भानोर्यदा माक्षिकशंखजाभः।।

अखण्डितो रूप्यसमोऽथवास्याद्वर्षासु कल्याणसमर्घवृष्ट्यै।।२७।।

यदि चन्द्रस्य परिवेषः सुन्दरवेषस्तथा सूर्यस्य शङ्खकान्तिस्तथा अखण्डितरूपः चन्द्रसदृशश्चेत् वर्षासमये सम्यक्कल्याणकारी वर्षा, समर्घवर्षा मज्ञायते।

रूक्षा रक्तश्यामसर्पप्रभोल्का या भूतायां सो निशायां दिवैकः।।

दीप्तो नूनं भूपभंगाय यद्वा भानोरग्रे स्याद्विनिर्घातपातः।।२८।।

रूक्षा, अरुणवर्णयुक्ता, श्यामसर्पसहशकान्तियुक्ता उल्का गतरात्रौ यदि पतितश्चेत् तद्दिनं दीप्तदिनमिति कथ्यते। राजभङ्गः भवेत्तथैव सूर्यस्याग्रेनिर्घातपातश्चेत्।

घस्रे रात्रौ वा सभूमीप्रकंपोऽथोल्कायुग्वै वा स्वयं भूपभंग-।।

भूमीकंपाच्चेत्रितुर्याश्विघस्रे पक्षे मासेऽसौ पुनर्भूपभंगः।।२९।।

रात्रौ वा दिवासमये भूकम्पसंहिता वा उल्कायुक्तनिर्घातपातश्चेत् स्वयमेव राज्ञः भङ्गो भवेत्। यदि भूकम्पात् ३/४/२ दिने, पक्षे वा मासे निर्घातपातश्चेत् राजभङ्गो जायते।

आषाढपूर्णिमायां सन्ध्यायां पूर्वरुद्रसौम्यदिशाम्।।

वायुः सुभिक्षमतुलं वृष्टिं कुर्यात्समीरवारिदिशः।।

मध्यं सस्यं हतुभुग्यमरक्षोभूदवृष्टिदुर्भिक्षम्।।३०।।

आषढस्य पूर्णिमायां सन्ध्यासमयात्पूर्वं ईशान्ये तथा उत्तरदिशायां वातेन वीयते चेत् सुभिक्षं तथा अतिवृष्टिः स्यात्। वायव्ये पश्चिमस्य पवनश्चेत् मध्यं सस्यं भवेत्। अग्निकोणे दक्षिणे तथा नैर्ऋत्यस्य भवेत्तर्हि दुर्भिक्षम्, अवृष्टिश्च सम्भाव्यते।

अथ सत्यजातकम्

वृषार्कवेशेवृषकुंभसिंहालिगैः शुभैः स्त्रीमृगतौलिकर्के।।

पापैर्भवेच्छारदधान्यवृद्धिर्गोभानुवेशे च हिमांशुजीवौ।।१।।

वर्षार्कप्रवेशसमये २/११/५/८ एतासां राशिषु शुभग्रहस्तथा कन्या – मकर – तुला – कर्केषु पापग्रहश्चेत् शरहृतुकारणात् धान्यवृद्धिभवित्। यदि वृषार्कप्रवेशसमये चन्द्रबृहस्पती।

वीर्यान्वितो सिंहघटालियातो शुक्रेन्दुजौ मेषनृयुग्मयातौ।।

स्याच्छारदान्नस्य परं समृद्धिर्गोभानुवेशे त्वबलैः शुभैश्च।।२।।

बलान्वितौ सिंहकुम्भवृश्चिकेषु स्थित्वा शुक्रबुधौ मेषमिथुनराशिषु स्थितौ चेत् शरत्कालीनान्नस्य परमसमृद्धिः सम्भवेत्। वृषार्कप्रवेशे शुभग्रहो निर्बलस्तथा।

पापैर्मृगेन्द्रालिवृषे च तुंगे स्याच्छारदान्नस्य परं विनाशः।।

वृषार्कवेशेऽलिधनुर्वृषस्थैः पापैः शरज्जं परिशुष्यतेऽन्नम्।।३।।

पापग्रहः सिंहवृश्चिकवृषराशिषु उच्चस्थाने स्थितश्चेत् शारदान्नस्य अत्यन्तनाशो सम्भवेत्। वृषार्कस्य प्रवेशसमये वृश्चिकधनुवृषराशिषु पापग्रहः स्थितश्चेत् शरत्कालोत्पन्नम् अन्नं शुष्कं भवेत्।

वृषार्कवेशे मिथुनालिमेषे पापैः सदीक्षायुतिवर्जितैश्च।।

संशुष्यतेऽन्नं शरदोऽथ भानोर्वृषस्य वेशे ज्ञभृगू च मीने।।४।।

वृषार्कप्रवेशसमये मिथुनवृश्चिकमेषराशिषु शुभग्रहस्य दृष्टिस्तथा युत्यावर्जितश्चेत् शारदीयान्नं शुष्कं भवेत्। वर्षार्कप्रवेशकाले बुधशुक्रमीनराशिषु।

केन्द्रे शशीज्यौ सबलौ सदीक्षायुत्यन्वितौस्याच्छरदोऽन्नवृद्धिः।।

अल्यर्कवेशेऽलिमृगेन्द्रकुम्भवृषेषु सौम्यैर्मृगमेषकेन्द्रे।।५।।

तथा केन्द्रे चन्द्रबृहस्पती बलन्वितौ इव शुभग्रहैः दृष्टयुक्तौ चेत् शरदान्नस्य वृद्धिर्जायते। यदि वृश्चिकार्कप्रवेशकाले वृश्चिकसिंहकुम्भवृषराशिषु शुभग्रहः मृगमेषौ तथा केन्द्रे।

पापैः परं ग्रैष्मिकसस्यवृद्धिरल्यर्कवेशे यदि सोमजीवौ।।

कुंभस्थितौ वा वृषसिंहयातौ पृथग्ज्ञशुक्रौ तुलवृश्चिकस्थौ।।६।।

पापग्रहः स्थितश्चेत् ग्रीष्मतौः सस्यवृद्धिः जायते। वृश्चिकार्कप्रवेशकाले यदि चन्द्रबृहस्पती कुम्भराशौ वा वृषराशौ वा तथा बुधशुक्रौ पृथग्यूपेण तुलवृश्चिकराशिषु स्थितौ चेत्।

स्याद्ग्रैष्मिकान्नस्य परं समृद्धिरल्यर्कवेशे ज्ञभृगू कुमार्याम्।।

केन्द्रे शशीज्यौ सबलौ सदीक्षायुत्यन्वितौ ग्रैष्मिकसस्यवृद्धिः।।७।।

ग्रैष्मिकान्नस्य परमसमृद्धिर्भवेत्। वृश्चिकार्कप्रवेशकाले बुधशुक्रकन्याराशिषु केन्द्रे च बलान्वितौ चन्द्रबृहस्पती शुभग्रहैः दृष्टयुक्तौ चेत् ग्रैष्मिकसस्यवृद्धिर्जायते।

अल्यर्कवेशे शनिभूमिजौ चेन्नृयुग्मगौ स्थौ भवते हि किं वा।।

धनुस्तुलावृश्चिककुम्भयातौ तदा भवेद्ग्रैष्मिकसस्यनाशः।।८।।

यदि वृश्चिकार्कप्रवेशकाले शनिकुजौ मिथुनवृषराशिषु वा धनुतुलावृश्चिकराशयः कुम्भे स्थिताश्चेत् ग्रैष्मिकसस्यनाशो भवेत्।

अल्यर्कवेशे हरिकुंभगौ चेत्कुजार्कजौ कुम्भमृगालिगोऽगुः।।

ग्रीष्माऽन्नशोषः शुभवीक्षणेन नो सर्वशोषः परथाऽन्यथा स्यात्।।९।।

यदि वृश्चिकार्कप्रवेशकाले सिंहकुम्भराशिषु कुजशनैश्चरौ तथा कुम्भवृषराशिषु राहुःस्थितश्चेत् ग्रीष्मान्नं शुष्कं भवेत्। यदि शुभग्रहः पश्येत्तर्हि सर्वं नैव शोषतीत्यर्थः। अन्यथा भवेत्तर्हि अन्यथा फलं वक्तव्यम्।

अथ प्रतिवर्षशुभाशुभज्ञानम्

मेषार्कवेशे लग्नेशः शुभः शुभयुतेक्षितः।।

समर्घसुखदो नूनं विलोमे रुग्महर्घदः।।१।।

मेषार्कप्रवेशसमये शुभलग्नेशो शुभग्रहेण युक्तो वा दृष्टश्चेत् समर्घसुखदायकं भवेत्। यदि अस्मात् योगात् विलोमश्चेत् अर्थात् पापलग्नेशो पापयुक्तो वा दृष्टश्चेत् रोगस्तथा महर्घदायकं भवेत्।

अथ मृगयाप्रश्ने विचारः

कुजबुधौ सबलौ मृगयाकरौ न गदितौ यदि वा पतितांशगौ।।

न परथा खलविद्धदिनेऽपि वा न मृगया तनुसप्तमपौ यदा।।१।।

यदि कुजबुधौ सबलौ चेत् मृगयाभिलाषिणौ इति वक्तव्यम्। अथवा कुजबुधौ पापग्रहस्य नवांशे स्थितौ चेत् मृगयाविनोदः नैव भवेत्। अन्यथा पापग्रहात् विद्धदिनेष्वपि मृगयाविनोदः नैव साध्यते। यदि लग्नेशसप्तमेशौ।

हतबलौ हि चतुष्टयगौ विपद्भयकरौ सबलौ हि शुभौ तु तौ।।

उदयसप्तमनाथयुतौ भवेन्न मृगया तनुपे शुभखेचरे।।२।।

नष्टबलौ केन्द्रे स्थितौ चेत् विषद्भयकरौ भवतः। तथैव येषु दिनेषु बलान्वितौ भवतः तदा शुभमिति वक्तव्यम्। यदि लग्नेशसप्तमेशौ उभौ युक्तौ चेदपि मृगयाखेटः नैव साध्यते। यदि लग्नेशः शुभग्रहः तथा सप्तमपतिः बलवान् चेत् मृगयाखेटः नैव भवेत्।

स्मरपतौ सबले न च सा भवेदिह महाबलिनि प्रभयोद्गमः।।

बुधभृगू जलभे जलचारिणां तदपरत्र भवेत्स्थलचारिणाम्।।३।।

यो सप्तमेशो महाबली चेत् भयं भवेत्। बुधशुक्रौ जलराशिगतौ चेत् जलचराणां आखेटं तथा अन्यराशिषु स्थिते स्थलचराणां आखेटं भवेत्।

प्रकुरुतो मदने खलु यावतां तनुसदां द्युसदां च सतां दृशः।।

मृतिपथोत्सुकतत्समजन्तवो द्विगुणिताः स्वगृहांशगतैर्ग्रहैः।।४।।

सप्तमगृहे यावन्तो लग्नदशमस्थशुभग्रहाणां दृष्टिस्तावन्तो जीवाः स्वयमेत्य म्रियन्ते। यदि ते ग्रहाः स्वगृहे नवांशे।

अनृजुतुंगखगैस्त्रितया हताः प्रकथिता मृगयास्विति पण्डितैः।।

हितदृशा तनुसप्तपमुत्सिले सुसुलभारिदृशा बहुकष्टतः।।५।।

अथवा वक्रस्तथा उच्चस्थाने स्थिताश्चेत् मृगयासु त्रिगुणजीवाः म्रियन्ते। वार्तेऽयं पण्डितैः एव उक्तमस्ति। यदि मित्रदृष्ट्या लग्नेशसप्तमेशयोः इत्तसालयोगश्चेत् सुलभतया मृगयाखेटः तथा वैरिदृष्ट्या योगश्चेत् कष्टेन च आखेटो जायते।

द्यूनेश्वरेंऽगे तनुपे स्मरस्थे नूनं प्रभूताऽथ समंदखेदे।।

जायेश्वरे मित्रदृशाऽतिलघ्वी कुजेऽथवा भौमगृहे नभःस्थे।।६।।

यदि सप्तमेशो लग्ने तथा लग्नेशःसप्तमे स्थितश्चेत् निश्चयेन अधिकमृगलाभो भवेत्। यदि सप्तमेशो मन्दग्रहेण सह तिष्ठेत् तर्हि किञ्चिदेव आखेटो भवेत्। कृजो वा कुजशशिः दशमस्थाने।

जीवज्ञदृष्टे मृगयाऽतिगुर्वी ज्ञेया हि वा ज्ञेज्यभमम्बरे चेत्।।

गुर्वी यदा सप्तपतिश्चतुर्थे खे चेत्तदा स्वल्पतराऽपि न स्यात्।।७।।

बृहस्पतिबुधाभ्यां दृष्टश्चेत् भूरिमृगयाखेटो विज्ञेयः। अथवा बुधबृहस्पत्योः राशिः चतुर्थगृहे स्थितश्चेत् बृहत् आखेटः, यदि सप्तमेशः चतुर्थे वा दशमे वा स्थितश्चेत् खल्पतराऽपि न स्यात्।

स्मराधिनाथेन निशाकरेण यद्वेत्तसाली भृगुदृष्टभौमः।।

जले चरर्क्षे यदि वा सितेन्दू जले चरर्क्षे मृगया झषानाम्।।८।।

सप्तमेशेन वा चन्द्रेण वा इत्तसालयोगं कुर्वन् कुजः शुक्रेण दृष्टश्चेत् जलराशौ अस्तीति, अथवा शुक्रचन्द्रौ जलशशौ स्थितौ चेत् मत्स्याखेटः स्यात्।

बुधशनी मृगकुम्भगतौ खभे बुधगृहे यदि वा हिमरोचिषा।।

मुतसिलं कुरुतस्तनुपेन वा खलु तदा मृगयाऽस्ति पतत्त्रिजा।।९।।

यदि बुधशनिमृगकुम्भराशिषु दशमगृहे बुधराशिश्चेत् अथवा चन्द्रलग्नेशाभ्यां सह बुधशनिग्रहयोः इत्तसालयोगं चेत् पक्षीणामाखेटो भवेत्।

ताराबलेन मृगया शुभमशुभं वा वदेदथो तारा।।

सत्यपि विद्धा पापै सिंहादिभ्यो ददाति भयम्।।१०।।

ताराणां बलेन मृगयायाः शुभाशुभफलं निर्णीयते। यदि ताराः अपि पापग्रहैः विद्धाश्चेत् भयदायका एव।

स्खलनं जनुषि च विपदि प्रदृढं दुःखं तथा भवेन्निधने।।

अंगविभेदः पतनं प्रत्यरिनाम्न्यां परासु शुभम्।।११।।

जन्मतारासु स्खलनं, विपदि बहुदुःखं, निधने अङ्गच्छेदः, प्रत्यारिषु पतनं तथैव अन्यतारासु शुभफलं भवेत्।

अन्तरा मृगयुभेन्दुभयोर्यावन्त्युडूनि यदि वापि गृहाणि।।

पापयुजि निजजातिसमस्तावन्त एव मृतये किल जीवाः।।१२।।

यदि मृगयुभेन्दुराशीनां मध्ये यावान्ति नक्षत्राणि वा गृहाणि वा प्रापग्रहयुक्तानि भवन्ति तथा तेषां राशिसम्बद्धजीवाः, नक्षत्राणां जातिसहराजीवाः तावन्तः हन्यन्ते।

सौम्ययुंजि यदि तानि च तावन्तः पलायनपरा इह जीवाः।।

यद्वा – तिथिरारपुरोवर्गो दलितः परिभाजितः।।

इष्टनाडीभिरुच्छिष्टं प्राणिसंख्या स्मृता बुधैः।।१३।।

यदि तानि नक्षत्राणि वा गृहाणि शुभग्रहयुक्तानि चेत् तावन्तः जीवाः पलायन्ते। अथवा तिथिवारपुरोवर्गसंयोजनेन तस्मात् अर्धभागं कृत्वा इष्टनाडीभिः भागदानेन योऽवशिष्टः भवेत् तत्सदृशप्राणीनां संख्या पण्डितैः कथिता।

अथवा वर्त्तमानर्क्षवारौ यातितिथिं तथा।।

एकीकृत्य त्यजेदेकं वर्गितं दलितं भजेत्।।

त्रिघनेन च शेषाङ्कसं प्राणिवधं वदेत्।।१४।।

अथवा वर्तमाननक्षत्रवाराभ्यां गतितिथिं संयोज्य तस्मादेकं न्यूनीकृत्य वर्गंकृत्वा तस्यार्धभागं तृतीयघनेन नाम नवभागेन करणात् शेषाङ्कसदृशजीवानां वधं वक्तव्यम्।

शेषेऽत्र दलिते त्वेकशेषे ह्येकः पलायते।।

वक्रग्रहेण विद्धे भे त्रिगुणो हि पलायते।।१५।।

तथैव शेषार्धकरणात् योऽवशिष्टः एकः जीवः पलायते। यदि राशिः वक्रग्रहेण विद्धश्चेत् त्रिगुणो जीवाः पलायन्ते।

अथ राशिजातयः

मृगमहिषवानराद्याः कीटकनखवानरप्रमुखाः।।

कपिसर्पगवयवाद्याः जलचरचक्राण्डजाः क्रमतः।।१६।।

मृगमहिषवानरादीनां, कीटनखजातीनां, वानरसर्पसुरागवादीनां तथा जलचक्राण्ड-जादिजातीनां सम्बद्धविषयाः मेषराशिक्रमात् विज्ञेयः।

अथ नक्षत्रजातयः

हयगजाजभुजंगमपन्नगश्ववृषदंशकमेषबिडालकाः।।

तदनु मूषकमूषकधेनवो महिषरुर्वरिगोमृगभक्षकाः।।१७।।

मृगमृगौ श्वकपी नकुलद्वयं कपिमृगेन्द्रहयाश्च मृगाधिपः।।

पशुगजाविति योनिरुदीरिता प्रथमभक्रमतो मृगयोचिता।।१८।।

अख – गज – अज – सर्प – शुनक – मार्जार – मूषक – गौ – महिष – रुर्वरि – सिंह – मृग – श्वा – वानर – नकुल – सिंह – अख – सिंह – गौ – गाजादि योगीनां संग्रहः अश्विन्यादि नक्षत्रक्रमात् वक्तव्यः। मृगयायाः विचारः उचितमेव।

भग्नशृंगौ बुधादित्यौ शृंगहीनो हि चंद्रमाः।।

तीक्ष्णशृंगः कुजो जीवशुक्रौ स्तो दीर्घशृंगकौ।।

शनिराहू वक्रशृंगौ शृंगिणां शृंगनिश्चये।।१९।।

बुधसुर्यौ श्रुङ्गभङ्गौ, चन्द्रश्च श्रुङ्गहीनः, कुजः तीक्ष्णश्रुङ्गः, बृहस्पतिशुक्रौ दीर्घश्रुङ्गौ, शनिराहू वक्रश्रुङ्गौ इति श्रुङ्गज्ञानं विज्ञेयम्। एतस्मादेव श्रुङ्गजीवानां श्रुङ्गनिश्चयकरणविचारः करणीयः।

कुत्राङ्गे घात इति प्रश्ने विचारः

लग्नादिशङ्कगैः पापै पूर्वार्द्धे मदनस्थितैः।।

पृष्ठे शेषर्क्षगैरुत्तरार्द्धे घातं वदेत्सुधीः।।२०।।

लग्नादि षट्गृहेषु पापग्रहः स्थितश्चेत् पूर्वार्द्धे, सप्तमगृहे चेत् पीठे तथा शेषगृहेषु स्थितश्चेत् उत्तरार्द्धे घातमिति वक्तव्यम्।

सपापनामनक्षत्रचरणस्य क्रमेण हि।।

प्राक् च पार्श्वे पृष्ठतले प्रहारं प्रवदेत्सुधीः।।२१।।

यदि नामनक्षत्रस्य पादं पापयुक्तं चेत् तस्य क्रमेण एव शरीरस्य उपर्यङ्गे, पार्श्वे, पृष्टभागे प्रहारमिति पण्डितैरुक्तमस्ति।

शत्रुरस्ति न वेति प्रश्ने विचारः

रिपुप्रश्ने रिपोर्लग्नाद्वैरकृच्च रिपुस्थितात्।।

रिपुः कीदृक् च किं जातिः कथमित्यादिकं वदेत्।।१।।

शत्रुविषये प्रश्नकरणसमये षष्ठमगृहलग्नात् तथा षष्ठमगृहात् वैरी कथं भवेत्? का जातिः? केन प्रकारेण वैरं भवेदित्यादि फलं वक्तव्यम्।

अथ धातुवादप्रश्ने विचारः

लग्नेशो धातुरूपः स्याद्धातुवादी स्मराधिपः।।

भानुशीतद्युती लाभकर्त्तारावितिचिन्तयेत्।।१।।

लग्नेशो धातुरूपः, सप्तमेशो धातुवादी च। तथैव सूर्यचन्द्रौ लाभकर्तारौ इति प्रश्नकरणे विज्ञेयः।

खलो लग्ने शुभः पापेक्षणं नो यदि लग्नपः।।

तनुं पश्येद्विना पापैः कर्त्तुः सौख्यं न चान्यथा।।२।।

यदि पापग्रहस्य दृष्टिः न भवेत्तर्हि लग्ने पापग्रहः शुभयुक्तो भवेत्। यदि लग्नेशो लग्नं पश्येत्तर्हि पापग्रहेण न दृष्टश्चेत् धातुवादी सुखी भवेत्। अन्यथा चेत् सुखं न भवेद्येव।

तन्वीशोऽन्त्यधनारिस्थो मृतौ वा विखलेक्षणः।।

यथाक्रमं मृत्युहानिबंधनक्षयकृन्मतः।।३।।

पापदृष्टिवर्जितो लग्नेशः १२/२/६/८ स्थानेषु स्थितश्चेत् यथाक्रमं मृत्युः, हानिः, बन्धनं तथा नाशकृदिति विज्ञेयम्।

कांचनं कुजरवी सितचंद्रौ रूप्यकं बुधगुरू मणियुक्तम्।।

कांचनं त्वगुशनी खलु लोहं लग्नगौ प्रकुरुतो बलयुक्तौ।।४।।

कुजसूर्यौ काञ्चनयुक्तौ, शुक्रचन्द्रौ रजतौ, बुधबृहस्पती मणियुक्तौ, शहुशनैश्चरौ लोहयुक्तौ, लग्ने बलयुक्तश्चेत्।

धातुं वित्ताद्वादसंस्थां च मृत्योर्ब्रूयात्त्र्यन्त्याभ्यां तयोः संस्थितिं च।।
चेत्केन्द्रे वा ये शुभाः सोजसः स्युर्धातुज्ञः स्याद्धातुवाद्यन्यथा नो।।
चेल्लग्नेन्दुः सौम्यपापैः समेतः शीर्षोत्थर्क्षे वाहितज्ञानलाभः।।५।।

द्वितीयगृहात् धातुः, अष्टमात् वादस्थितिः वक्तव्या। एवं सप्तमगृहात् एकादशगृहात् उभयोः स्थितिः वक्तव्या। यदि केन्द्रे वा एकादशस्थाने शुभग्रहः सबलश्चेत् धातुवादिनः, धातूनां अभिज्ञानकारको भवेत्। अन्यथा चेत् धातुज्ञानं न भवेद्येव। यदि सौम्यपापग्रहयुक्तौ लग्नचन्द्रौ शीर्षोदयराशिगतौ चेत् धातुज्ञानलाभं भवेत्।

मूकमुष्टिप्रश्ने विचारः

धातुर्मूलं जीव ओजर्क्षगेंऽगे जीवो मूलं धातुरन्यत्र चेति।।
नंदांशौस्त्रिः स्यात्क्रमाद्वोर्ध्वदृष्टिः प्रष्टा प्रश्ने स्यात्तदा जीवचिन्ता।।१।।

विषमराशौ (१/३/५/७/९/११) लग्नश्चेत् नवांशस्य त्रिगुणकरणात् धातुमूल-जीवानां प्रश्नः क्रमात् वक्तव्यः यथा विषमलग्नस्य प्रथमनवांशकश्चेत् धातुः, द्वितीये मूलस्य, तृतीये जीवस्य, चतुर्थे धातोः, पञ्चमे मूलस्य षष्ठमे जीवस्य सप्तमे धातोः, अष्टमे मूलस्य नवमे जीवप्रश्नविचारणं करणीयम्। एवमेव प्रकारेण अन्यत्र समराशौ (२/४/६/८/१०/१२) लग्नस्थितश्चेत् नवांशाना त्रिगुणगणनाकरणात् जीवमूलधातुप्रश्नाः क्रमेण वक्तव्याः। यथा समराशिस्थ प्रथमनवांशे जीवस्य द्वितीये मूलस्य, तृतीये धातोः, चतुर्थे जीवस्य, पञ्चमे मूलस्य, षष्ठमे धातोः, सप्तमे जीवस्य, सप्तमे मूलस्य, नवमे धातुचिन्ता करणीया। अथवा प्रष्टा ऊर्ध्वदृष्टिवान् चेत् जीवचिन्ता करणीया।

मध्यालोकी धातुचिन्ता त्वधोदृक् मूले चिन्ता वाङ्नवच्चन्द्रतोऽपि।।
मूके मुष्टौ वा बुधांशेशयोनिं नूनं ब्रूयादेव सत्योक्तमेतत्।।२।।

समदृष्टिश्चेत् धातुचिन्ता तथा अधोदृष्टिः चेत् मूलचिन्ता करणीया। अथवा लग्नसदृशः चन्द्रादपि वक्तव्या। अथवा मूकस्तथामुष्टिप्रश्ने बुधस्य नवांशपतेः या योनिः सा योनिरेव वक्तव्या। वार्तेयं निश्चयेन सत्यमेव।

धातुः कुजार्कौ मूलं च शनीन्दू जीवसंज्ञकौ।।

जीवशुक्रौ बुधो यत्र चांशे योनिं ततो वदेत्।।३।।

कुजार्कौ धातुसंज्ञकौ, शनिचन्द्रौ मूलसंज्ञकौ, बृहस्पतिशुक्रौ जीवसंज्ञकौ भवतः। बुधः यस्मिन् नवांशे स्थितः तस्मात् योनिं वक्तव्यम्।

लग्नत्र्यंशे यदा धातौ धातुखेटयुतेक्षिते।।

धातुचिंता तदा वाच्या जीवमूलादिकं तथा।।

द्विपदादिविभागश्च जीवे तत्वांशगात् खगात्।।४।।

लग्नस्यांशः द्रेष्काणधातुश्चेत्तथा धातुग्रहेण दृष्टयुक्तश्चेत् धातुचिन्ता करणीया। एवमेव प्रकारेण जीवमूलादीनां चिन्ताऽपि वक्तव्या अर्थात् लग्नस्य नवांशः जीवसंज्ञकश्चेत् तथैव जीवग्रहेण दृष्टयुक्तश्चेत् जीवचिन्ता, मूलसंज्ञको मूलग्रहेण दृष्टश्चेत् मूलचिन्ता करणीया। जीवप्रश्ननिश्चयानन्तरं द्विपद - चतुष्पद - अपद इत्यादीनां विभागः नवांशस्थ ग्रहात् करणीयः।

अथ सुगमोपायः

रविभौमौ बलयुक्तौ केंद्रे धातुप्रदौ शनीन्दुसुतौ।।

मूलकरौ शशिशुक्रामरगुरवो जीवकारकाः प्रश्ने।।५।।

यदि कुजार्कौ सबलौ केन्द्रे स्थितौ चेत् धातुप्रश्नकारकौ, शनिबुधौ केन्द्रे स्थितौ चेत् मूलप्रश्नकारकौ, चन्द्रशुक्रबृहस्पतयः केन्द्रे स्थिताश्चेत् जीवप्रश्नकारकाः भवेयुः।

मैषालिसिंहलग्ने हि कुजार्काभ्यां युतेक्षिते।।

धातुचिंता मृगन्द्वङ्कन्याकुम्भे युतेक्षिते।।६।।

१/८/५ स्थाने लग्नः कुजार्काभ्याम् दृष्टयुक्तश्चेत् धातुचिन्ता करणीया। १०/३/६/११) स्थाने लग्नः शनिबुधाभ्याम् दृष्टयुक्तश्चेत्।

मंदविज्ञां मूलचिन्ता कर्कमीनधनुस्तुले।।

वृषे च भृगुचन्द्रेज्यैर्दृष्टे जीवस्य चिन्तना।।७।।

मूलचिन्ता करणीया। ४/१२/९/७/२ स्थाने लग्नः शुक्रचन्द्रबृहस्पतिभिः दृष्टश्चेत् जीवचिन्ता वक्तव्या।

यस्य ग्रहस्य यद्वस्तु तद्वर्गे तद्युतेक्षिते।।

धाम्यं धातुं मृतं जीवं शुष्कं मूलं वदेत्तनोः।।८।।

यस्य ग्रहस्य यद् वस्तु तदेव वक्तव्यम्। यदि तस्य ग्रहस्य वर्गः तेनैव ग्रहेण दृष्टयुक्तश्चेत् धाम्य – धातु – मृतजीव – शुष्कमूमेतेषां चिन्तनं लग्नात् वक्तव्यम्।

स्ववर्गेऽबुचरे लग्ने वांशे स्वामियुतेक्षिते।।

धातुष्वधाम्यं जीवेषु सजीवं मूल आर्द्रकम्।।

खलैर्निंद्यं शुभैः श्रेष्ठं मिश्रैर्मिश्रं च तद्वदेत्।।९।।

जलचरराशिगतो लग्नः अथवा जलचरराशिगतो नवांशश्च स्वस्वामिग्रहेण दृष्टयुक्तौ चेत् धातुषु अधाम्य – धातु – सजीव – मूलार्द्रचिन्ता करणीया। यदि लग्नस्य वा लग्ननवांशः पापग्रहैः दृष्टयुक्तश्चेत् निन्दित इति, शुभग्रहैः दृष्टयुक्तश्चेत् श्रेष्ठ इति, मिश्रग्रहैः दृष्टयुक्तश्चेत् मिश्रधात्वादि वस्तुरिति वक्तव्या।

चेज्जीवचिन्ता द्विपदश्चरेंशे स्थिरे चतुष्पाद्वितनौ विपाच्च।।

चरांशके पुंग्रहदृष्टियुक्ते पुमान् भवेदत्र वधूग्रहेण।।१०।।

यदि जीवचिन्ता चेत् चरनवांशके द्विपदः स्थिरे चतुष्पाद, द्विस्वभावे अपदजीवानां चिन्ता ज्ञातव्या। यदि चरनवांशकः पुरुषग्रहेण दृष्टयुक्तश्चेत् पुरुषजीवेति, स्त्रीग्रहेण युक्तश्चेत् स्त्रीजीवेति।

दृष्टान्विते स्त्रीद्वितयांशके च नपुंसकैर्दृष्टयुते हि खंडः।।

चेन्मूलचिन्ताऽथ रवेः क्रमेण मूलाणुमूलोद्धृतमूलसंज्ञा।।११।।

यदि द्विस्वभावनवांशकः नपुंसकग्रहैः, दृष्टयुक्तश्चेत् नपुंसकजीवेति वक्तव्यः। यदि मूलचिन्ता चेत् सूर्यस्य क्रमेण मूल, अणुमूल, उद्धृतमूलानां नाम वक्तव्यः अर्थात् चरनवांशकः सूर्येण दृष्टयुक्तश्चेत् मूलमिति, चन्द्रेण दृष्टयुक्तश्चेत्

अणुमूलमिति, कुजेन दृष्टयुक्तश्चेत् उद्धृतमूलमिति वक्तव्यम्। एवमेव प्रकारेण बुधादि ग्रहैः दृष्टयुक्तश्चेत् मूलादिसंज्ञा वक्तव्या।

चेद्धातुचिन्ता शुभवर्गदृष्टियुतेत्यधाम्यः परथास्ति धाम्यः।।

लग्नग्रहत्र्यंशकतः क्रमेण स्वर्भूमिपातालगतास्ति चिन्ता।।१२।।

यदि धातुचिन्ताकरणावसरे चरलग्नो वा चरनवांशो वा शुभग्रहस्य वर्गे स्थितौ वा शुभग्रहेण दृष्ययुक्तश्चेत् अधाम्यधातुरिति वक्तव्या। लग्नग्रहद्रेष्काणात् क्रमेण स्वर्गभूमिपातालानां चिन्ता करणीया इत्युक्ताऽस्ति।

लग्नोदितांशे लवलग्नपाभ्यां दृष्टे युते खं हितसौम्ययोश्च।।

दृग्योगतो भूः खलवैरिदृष्ट्याधस्तत्र लोकः खगलोकतश्च।।१३।।

लग्नस्य उदितनवांशः, नवांशेशस्तथा लग्नेशेन दृष्टयुक्तश्चेत् आकाशस्य, मित्रशुभग्रहयोः दृष्टियोगात् पृथिव्याः, पापग्रहस्य वैरिदृष्टिश्चेत् पाताललोकस्य अथवा ग्रहलोकात् चिन्ता करणीया।

केचिच्छशांकार्कजराहुभौमैर्धातुं च शुक्रार्कवशेन मूलम्।।

शुष्कं तदा स्यादुभयोर्बलीयस्त्वादंकुरं जातमिति प्रदिष्टम्।।१४।।

केचन ज्योतिर्वेत्तारः चन्द्रशनिराहुकुजेभ्यः धातुवर्णनं, सूर्यशुक्रवशात् शुष्कमूल-वर्णनं करणीयम्। यदि शुक्रार्कौ उभावपि सबलौ चेत् अङ्कुरजातमिति वक्तव्यम्।

द्रव्यबहुत्वे चिन्त्यम्

रक्तौ सूर्यकुजौ पीतो गुरुरिन्दुभृगूसितौ।।

हरितो हि बुधः श्यामः शनिर्लग्नांशयोरिति।।१५।।

एवमेव प्रकारेण द्रव्यस्य बहुत्वविचारः करणीयः। लग्ने तथा लग्ननवांशे सूर्यकुजौ स्थितौ चेत् रक्तवर्णमिति, बृहस्पतिश्चेत् पीतवर्णमिति, चन्द्रशुक्रौ स्थितौ चेत् श्वेतवर्णमिति, बुधश्चेत् हरितवर्णमिति, शनिश्चेत् श्यामवर्णमिति विज्ञेयम्।

राहुयुक्ते तनौ वांशे वर्णं श्यामिकया वदेत्।।

वैडूर्यमुक्तापाषाणं ताम्रस्फटिकवद्रवौ।।१६।।

लग्नो वा नवांशो राहुयुक्तश्चेत् श्यामवर्णमिति, वक्तव्यम्। सूर्ययुक्तश्चेत्, वैढूर्य – मौक्तिक – पाषाण – ताम्र – स्फटिकवर्णवस्तु वक्तव्यम्।

रूप्यक्षीरकपालेलीमुक्ताजलजवद्विधोः।।

ताम्रवैडूर्यरत्नाश्मेष्टकाशृंगकशृंखलाः।।१७।।

चन्द्रस्य चेत् रूप्य – क्षीर – कपाल – मौक्तिक – खड्गकमलसदृशवस्तुरिति वक्तव्या। कुजस्य चेत् ताम्र – वैढूर्य – रत्न – पाषाण – इष्टिका – श्रुङ्ग – श्रुङ्खलादीनां वस्तुरिति वक्तव्यम्।

सीसधाम्याग्निभृत्यादिशस्त्रभेदाः कुजे मताः।।

काचचित्रसुवर्णानि गरुडोद्गारवद्बुधे।।१८।।

सीसधाम्याग्नि भृत्यादि शस्त्राणि अर्थात् तोपबन्दूकानि शस्त्रभेदा इत्यभिधीयन्ते। बुधस्य काचचित्रसुवर्णानि हरिन्मणियुक्तानि द्रव्याणि इति कथ्यन्ते।

गोमेदस्वर्णमणयः पीतधातुश्च पुस्तकम्।।

सूतशास्त्रादिवार्त्ता च गंधवद्वस्तु वाक्पतेः।।१९।।

बृहस्पतेः गोमेद – स्वर्ण – मणि – पीतधातु – पुस्तक – सूतशास्त्रवार्ता – गन्धवत् वस्तु इति कथ्यते।

रौप्यालंकारवैडूर्यस्फटिकाम्बुजमौक्तिकम्।।

लक्ष्यस्वर्णादिपात्रं च प्रतिमा शुक्रशुची भृगोः।।२०।।

शुक्रस्य रौप्य – अलङ्कार – वैढूर्य – स्फटिक – कमल – मौक्तिक – चिह्न – स्वर्णपात्र – प्रतिमा – पवित्र – श्वेतवस्तु इति कथ्यते।

नीलाश्मलोहमहिषीचर्मसीसकचामरम्।।

दंतशूकरसौवीरमद्यांवुजतिलं शनेः।।२१।।

शनेः नीलपाषाण – लोह – महित – चर्म – सीसकच – चामर – शूकरदन्त – मद्य – कमल – तिलवस्तु इत्यादयः कथ्यन्ते।

कण्टकास्थिविषं चौर्यं राहोर्लग्नेशदृग्युतेः।।

चंद्रेऽतिनिर्बले कांस्यं रूप्यवर्णसमं यतः।।२२।।

राहुग्रहस्य कटक – अस्थि – विष – चौर्यादि वस्तु उच्यते। निर्मलचन्द्रे लग्नेशस्य दृष्टियोगश्चेत् रजतवर्णसदृश कांस्यमिति कथ्यते।

एवमतिनिर्बलानां बहु मौल्यं वस्तु

हित्वाल्पमौल्यं तत्सवर्णं वस्तु वदेत्।।

एवमेव प्रकारेण अतिनिर्बलग्रहाणां बहुमूल्यवस्तु विहाय अल्पमूल्यसदृश वस्तु वक्तव्यम्।

किं धात्वाद्यस्ति विज्ञानमिति यत्तदृकाणतः।।

विशेषो हेमरत्नादि द्विपदान्नादि भागतः।।२३।।

का धातुः किं वस्तु इति ज्ञानं द्रेष्काणात् विशेषरूपेण ज्ञेयम्। सुवर्णरत्नादि द्विपदादि वा अन्नदि वा भवेत्। एवं प्रकारेण विभागो विज्ञेयः।

कविसुरवन्द्यौ द्विपदौ तूर्यपदावर्कभूमिजौ ज्ञशनी।।

पत्रधरौ वी कथितौ राहुहिमांशू सरीसृपावपदौ।।२४।।

शुक्रबृहस्पती द्विपद इति, सूर्यकुजौ चतुष्पद इति, बुधशनिग्रहौ पक्षसहितपक्षीति, राहुचन्द्रौ सर्प इति च कथ्यते।

पुंस्त्रीकृशानुक्षितिवायुवारिचरस्थिरद्व्यंगगृहाश्च मेषात्।।

मेषो हरिर्गौर्धनुषः परार्द्धं मृगार्द्धमाद्यं चतुरंघ्रयः स्युः।।२५।।

पुरुष – स्त्री – अग्नि – पृथ्वी – वायु – जल – तत्व – चर – स्थिरादीनां द्विस्वभावसंज्ञा मेषात् ग्राह्या। मेष – सिंह – वृष – धनुषः परार्द्ध – मकरस्य पूर्वार्थश्च चतुष्पदसंज्ञकाः भवन्ति।

कुंभश्च मीनो विपदौ प्रभूतपादौ स्मृतौ वृश्चिककर्कटौ च।।

तुला च कन्या मिथुनं हयाद्यं नरा मृगान्त्यं पदवर्जितं च।।२६।।

कुम्भमीनौ अपदौ, वृश्चिककर्कौ बहुपदौ, तुलाकन्यामिथुनधनुषानां पूर्वार्द्धनरः, मकरस्य तु परार्द्धपदवर्जितस्स्यात्।

द्विजौ गुरुभृगू भूपौ भूजार्कौ शुद्र इन्दुजः।।

वैश्यश्चन्द्रोऽर्कजो राहुर्द्वावेतौ म्लेच्छसंज्ञकौ।।२७।।

बृहस्पतिशुक्रौ ब्राह्मणजातिरिति, कुजार्कौ क्षत्रियौ, बुधः शूद्रजातिः, चन्द्रः वैश्यजातिः, राहुः म्लेच्छजातीति विज्ञेयः।

चतुरस्रौ भौमरवी खण्डः काव्यश्च विद्रुरू।।

वर्त्तुलौ हिमकृत्स्थूलो दीर्घौ राहुदिनेशजौ।।२८।।

कुजार्कौ चतुरस्रौ, शुक्रः खण्डः, बुधबृहस्पती वतुलौ, चन्द्रः स्थूलः, राहुशनी दीर्घौ इति विज्ञेयौ।

लोहितसितहरिताभाः पाटलपांड्वाभचित्रकृष्णाभाः।।

हेमभपिंगलकर्बुरबभ्रुस्वच्छाः क्रियादितो वर्णाः।।२९।।

रक्त – श्वेत – हरित – पाटल – पाण्डु – चित्रवर्ण – श्याम – पीत – पिङ्गल – कर्बुर – बभ्रु, मलिनवर्णाः मेषादि राशीनां वर्णाः इति ज्ञेयाः।

शुक्रेन्दू जलचारिणौ बुधगुरू ग्राम्यौ कुजार्कार्कयो।

राहुश्च प्रथिता अरण्यविवरे प्रीत्याभिसंचारिणः।।

पूर्वाह्णे बलिनौ तनौ बुधगुरू मध्याह्नकेऽर्कावनी-।

सूनू द्वावपराह्ण इन्दुभृगुजौ सायं हि राह्वर्कजौ।।३०।।

शुक्रचन्द्रौ जलचारिणौ, बुधबृहस्पती ग्रामीणौ, कुजार्कशनिराहवश्च अरण्यविवराः इति प्रथिताः। लग्ने बुधबृहस्पती पूर्वाह्णबलिनौ, कुजार्कौ मध्याह्नबलिनौ, चन्द्रशुक्रौ अपराह्णबलिनौ, राहुशनी च सायंबलिनाविति विज्ञेयौ।

पित्तं दिनकरभौमौ श्लेष्माशुक्रामृतद्युती ज्ञगुरू।।

समधातू शनिराहू वातकरौ कीर्त्तितौ मुनिभिः।।३१।।

सूर्यकुजौ पित्तप्रकृतिकारकौ, शुक्रचन्द्रौ कफप्रकृतिकारकौ, बुधबृहस्पती समधातुकारकौ, शनिराहू च वातप्रकृतिकारकाविति मुनिभिः प्रतिपादितम्।

कटुकौ दिनकरभौमौ मधुरो जीवस्तथा बुधो मिश्रः।।

चंद्रभृगू लवणाम्लौ तीक्ष्णौ राह्वर्कनंदनौ गदितौ।।३२।।

सूर्यभौमौ कटुकौ, बृहस्पतिः मधुरः, बुधः कटुमधुरमिश्रः, चन्द्रशुक्रौ लवणाम्लौ, राहुशनैश्चरौ तीक्ष्णौ इति विज्ञेयौ।

दिनेशभौमजीवाख्याः पुरुषा अपरे स्त्रियः।।

बुधसौरीस्मृतौ केषांचिन्मते च नपुंसकौ।।३३।।

सूर्यकुजबृहस्पतयः पुरुषा इति, अन्यग्रहाः स्त्रीसंज्ञका इति, केषाञ्चित् आचार्याणां मते बुधशनी च नपुंसकाविति विज्ञेयौ।

तरुणः कुजो हिमसुतश्च शिशुः हिमकृत्कवी सुदृढमध्यनिभौ।।

शनिसूर्यवाक्पतिभुजंगखगाः स्थविरा मतास्तु नियतं मुनिभिः।।३४।।

कुजः तरुण इति, बुधो बालक इति, चन्द्रशुक्रौ दृढमध्यमावस्थे इति, शनिसूर्यबृहस्पतिराहवश्च स्थविरा इति मुनिभिः कथितम्।

भृगौ चंद्रे ह्रदे देववसतौ वाक्पतौ रवौ।।

चतुष्पदपथे सौम्ये चेष्टकानिचये कुजे।।३५।।

दग्धस्थाने शनौ राहौ बाह्यभूमौ चतुर्थके।।

अमीभिर्नष्टवस्तूर्वी दैवज्ञो हि विमर्शयेत्।।३६।।

शुक्रचन्द्रयोः निवासस्थानं ह्रदे, बृहस्पतेः देवतानां निवासस्थाने, सूर्यस्य चतुष्पदे, बुधस्य चेष्टकानिचये, कुजस्य दग्धस्थाने, राहुशनैश्चर्योः बाह्यभूमौ चतुर्थके इति ज्ञेयम्। दैवज्ञाः नष्टवस्तुनः निवासभूमिः अनेन प्रकारेण निश्चीयन्ते।

नृपः सूर्यस्तपस्वीन्दुः कुजो हेमप्रियो बुधः।।

वणिग्गुरुः कविर्वैश्यः शनिश्च वृषलोऽथवा।।३७।।

अन्यजातिश्चासुरौ च निषादधिपती स्मृतौ।।३८।।

सूर्यः राजा, चन्द्रः तपस्वी, कुजः स्वर्णकारः, बुधः व्यावसायिकः, बृहस्पतिः शुक्रश्च वैश्यौ, शनिशूद्रौ अन्यजातीयौ, राहुकेतू च निषादाधिपती इति कथ्यते।

धातुनामेन्दुशुक्राभ्यां भृषणं गुरुसूर्ययोः।।

भाजनं वित्कुजाभ्यां च शस्त्रं शेषेषु कीर्तितम्।।३९।।

इन्दुशुक्राभ्यां धातुविशेषाः, बृहस्पतिसूर्याभ्यां भूषणानि, बुधकुजाभ्याम् पात्राणि तथा शेषग्रहैः शस्त्राणि च विज्ञेयानि।

मूर्द्धभूषणमिन्द्वर्कौ वाक्पतिः कर्णभूषणम्।।

भूमीजकाव्ययोर्बाहुभूषणं च तथा बुधे।।४०।।

हस्तस्य भूषणं राहौ चरणस्य प्रकीर्तितम्।।४१।।

चन्द्रसूर्यौ शिरोभूषणं, बृहस्पतिः कर्णभूषणं, कुजशुक्रौ बाहूभूषणं, बुधः हस्तभूषणं, राहुः चरणभूषणमित्यभिधीयते।

बुधेन्दुजीवभृगुभिः सरसं नीरसं परैः।।

तैरेवभक्षणीयं स्यादभक्ष्यं परथा ग्रहैः।।४२।।

बुधचन्द्रबृहस्पतिशुक्राः रसयुक्ताः अन्यग्रहाः नीरसा इति विज्ञेयाः। पूर्वचतुर्भ्यः ग्रहेभ्यः भक्षणीयवस्तु तथा अन्यग्रहेभ्यः अभक्षणीयवस्तु विज्ञेयम्।

दीर्घवर्तुलयोः कंदमूले तुर्यत्रिकोणयोः।।

तृणं सगन्धि निर्गन्धि दीर्घवर्तुलयोः क्रमात्।।४३।।

चतुर्थनवमपञ्चमस्थानेषु दीर्घवर्तुलसंज्ञकग्रहाश्चेत् कन्दमूले, एवमेव दीर्घवर्तुलक्रमात् सगन्धनिर्गन्धित्वं ज्ञेयम्।

सौम्यैः फलिता वृक्षाः क्रूरैः स्युः फलवर्जिताः।।

पुंखगैस्तु तरुर्नारीग्रहैरुक्ता लताः क्रमात्।।४४।।

शुभग्रहैः फलिता वृक्षः, क्रूरग्रहैः फलरहितवृक्षाः, पुरुषग्रहैः वृक्षाः, स्त्रीग्रहैः लता क्रमेण विज्ञेयाः।

धान्यगोधूमकौलत्थयवा घासोद्भवानि च।।

धान्यमुद्राश्च माषाश्च ग्रहाणां सूर्यतः क्रमात्।।४५।।

धान्य – गोधूम – कुलत्थ – यवा – घासोद्भवान्न – धान्य – मुद्रा – माषादीनां विषयः सूर्यग्रहात् ग्राह्यः।

सूर्ये चंद्रे गुरौ सौम्ये पक्वं शुक्रे शनैश्चरे।।

अपक्वं च कुजे साम्बु शेषेषु कवलं मतम्।।४६।।

सूर्यचन्द्रबृहस्पतिबुधग्रहेषु पक्वं, शुक्रशनैश्चर्योः अपक्वं, कुजे जलयुक्तं, शेषग्रहेषु कवलमिति विज्ञेयम्।

भानोः किंशुकशाखाद्याश्चंद्रे राजादनीमुखाः।।

भौमे कटंकिनः सौम्ये शनौ बदरिकादयः।।४७।।

सूर्यस्य किंशुकशाखाद्याः, चन्द्रस्य राजादनीमुखाः, कुजस्य कण्टकवृक्षाः, शनिबुधयोः बदरिकादि वृक्षाः विज्ञेयाः।

क्षीरिणौ वाक्पतौ शुक्रे रम्भाद्याः शनिसूर्ययोः।।

शुष्काश्च खण्डिता वृक्षा विज्ञातव्या विवेकिभिः।।४८।।

विवेकजनैः बृहस्पतिः क्षीरः इति, शुक्रः कदलीति, शनिसूर्यौ खण्डितावि‌ति शुष्काविति कथितमस्ति।

वामां चंद्रे रणं भौमे व्यवहारं बुधे गुरौ।।

स्वजनं योषितं शुक्रे कलिं मंदे विचिन्तयेत्।।४९।।

चन्द्रौ स्त्रीणां, कुजे युद्धस्य, बुधे व्यवहारस्य, बृहस्पतौ स्वजनस्य, शुक्रे स्त्रीणां, शनिग्रहे कलिविचारश्च करणीयः।

मज्जास्थि भास्करे चित्तमिन्दौ रक्तं कुजे बुधे।।

चैतन्यशुद्धी वागीशे प्राणाः शुक्रे च शुक्रकम्।।५०।।

सूर्ये मज्जास्थि, चन्द्रे चित्तं, कुजे रक्तं, बुधे जीवशुद्धिः, बृहस्पतौ प्राणः शुक्रे वीर्यं

शनौ मांसत्वचा रोमवसा अस्थि वदेदगौ।।

शशिशुक्रौ जलाधारावार्किभौमदिनाधिपाः।।५१।।

शनिग्रहे मांसस्य, त्वचा, रोमस्य च राहुग्रहे मज्जास्थि इति उक्तं वर्तते। चन्द्रशुक्रौ जलाधारौ, शनिभौमसूर्याः

निर्जला ज्ञगुरू स्वल्पजलौ नूनं प्रकीर्त्तितौ।।

सौम्यो भूमेर्जलस्येन्दुर्वह्नेः काव्योऽर्कभूमिजौ।।

वायोर्मन्दासुरौ व्योम्नो गुरुः स्वाम्यन्तराब्दहिः।।५२।।

निर्जलाः, बुधबृहस्पती स्वल्पजलौ इति विज्ञेयौ। बुधः भूमेः स्वामीति, चन्द्रः जलस्य स्वामीति, शुक्रः अग्निस्वामीति, सूर्यकुजयोः वायोस्स्वामीति, शनिराहुग्रहयोः आकाशस्वामीति, बृहस्पतिः स्वाम्यन्तराब्दहिः स्वामीति विज्ञेयः।

अजगोयुग्मधनुस्तुलसिंहाः शब्दभृतः प्रमदाघटसंज्ञौ।।

अर्द्धरवावपरे हि विशब्दा गोतुलकर्कवधूघटमीनाः।।५३।।

मेष – वृष – मिथुन – धनु – तुला – सिंहराशयः पूर्णशब्दभृतः, कन्या – कुम्भौ – अर्द्धशब्दभृतौ, शेषराशयः शब्दरहिताः इति विज्ञेयाः। वृष – तुला – कर्क – कन्या – कुम्भ – मीनस्तथा

मत्स्ययुताः सजलाश्च तदन्ये स्युर्विजला अथ मूकनियोगे।।५४।।

मकरराशयः सजलाः, अन्यराशयः निर्जलाः इति ज्ञातव्याः। एते विषयाः मूकप्रश्ने विचारिताः आसन्।

स्वर्क्षेऽर्के स्वीयचिंतात्र च परगृहतो मातताताीयचिन्ता।

स्वेन्दौ चिन्ता वधूनां त्वपरभ इत पुंसः कुजे जीवचिन्ता।।

सौम्ये भ्रातृव्यचिन्ता सचिव उ पतिचिन्ता च शुक्रे सपिण्डी-।

चिन्ता मंदेऽन्यचिंता भवति पितृपितृव्यादिचिन्ता च राहौ।।५५

यदि सूर्यः स्वराशिगतश्चेत् स्वस्य, अन्यराशिगतः चेत् माततातीयचिन्ता करणीया। यदि चन्द्रः स्वराशिगतश्चेत् बन्धुजनानां चिन्ता, अन्यराशिगतश्चेत् विदेशगत पुरुषचिन्ता करणीया। कुजश्चेत् जीवचिन्ता, बुधः स्वक्षेत्रे स्थितश्चेत् पितृव्यस्य चिन्ता, अन्यथा चेत् सचिवस्य स्वामिनश्च चिन्ता करणीया। शुक्रः स्वक्षेत्री चेत् सपिण्डस्य चिन्ता, शनिः स्वक्षेत्री चेत् अन्यजनचिन्ता तथैव राहुः स्वक्षेत्री चेत् पितृपितृव्यादि चिन्ता करणीया।

चंद्रो मर्त्ये दिवि ज्ञेज्यौ वासिनोऽधः परे ग्रहाः।।

ज्येष्ठः शुक्रोऽर्क आषाढश्चंद्रः श्रावणमासकः।।५६।।

चन्द्रो मर्त्यलोके, बुधबृहस्पती आकाशे, अन्यग्रहाः पातालवासिनो भवन्ति। शुक्रस्य ज्येष्ठं, सूर्यचन्द्रयोः श्रावणं

कुजो भाद्रपदः सौम्य आश्विनः कार्तिको गुरुः।।

मार्गपौषौ भृगुर्मंदो माघफाल्गुनकावगुः।।५७।।

कुजस्य भाद्रं, बुधस्य आश्विनः, बृहस्पतेः कार्तिकं, शुक्रस्य पौषः, शनेः माघं, फाल्गुनं तथा राहोः चैत्रविशाखमासाः कथिताः।

चैत्रवैशाखकौ मासाश्चैत्राद्या मेषतः क्रमात्।।

मेषालितुलकुम्भैश्च कर्केण प्राङ्निवासभूः।।५८।।

मेषतः चैत्रादि मासक्रमः विज्ञेयः। मेषात्, वृश्चिकात्, तुलायाः, कुम्भात्, कर्कात् पूर्वनिवासभूमिविषये ज्ञातव्या।

वृषेण पश्चिमे सिंहमृगयोरुत्तरे भवेत्।।

गुरुसौम्यग्रहैर्दक्ष एवं शय्यासनेष्वपि।।५९।।

वृषात् पश्चिमनिवासः, सिंहमकराभ्यां उत्तरनिवासः, बृहस्पतिबुधाभ्याम् धनु – मीन – कन्या – मिथुनेभ्यः दक्षिणनिवासभूमिः वक्तव्या। एवमेव प्रकारेण शय्याविचारः, आसनविचारश्च करणीयः।

रविसितकुजागुमंदाः शशिबुधजीवाः पुराक्रमात्पतयः।।

अजगोमिथुनकुलीरास्त्रिः परिवर्त्तेन पूर्वतः पतयः।।६०।।

सूर्य – शुक्र – कुज – राहु – शनि – चन्द्र – बुध – बृहस्पतिग्रहाः क्रमेण पूर्वादि दिशास्वामिनः भवन्ति। मेष – वृष – मिथुन – कर्कराशीः त्रिगुणकरणात् पूर्वादि दिशास्वामिनः इति कथ्यते।

अजगोमिथुनकुलीरा हयमकरौ रात्रिपाः परे दिनपाः।।

रविराशेः क्रियतो वा क्रमतोऽन्धो बधिरमूकपंगू च।।६१।।

मेष – वृष – मिथुन – कर्क – धनु – मकराः रात्रिस्वामिनः इति अन्यराशयः दिनस्वामिन इति विज्ञायते। सूर्यस्य राशितः वा मेषात् क्रमतः अन्ध – बधिर – मूक – पङ्गू इति विज्ञेयः।

वह्नेः कुजार्कावुपरिस्थितौ ज्ञो मध्ये भुवः खे सकले गुरुश्च।।

अधः सितेन्दू पयसो निरुक्तौ तिर्यक् शनिः केतुतमोयुगं च।।६२।।

कुजार्कौ अग्नेः उपरिस्थाने, बुधः पृथिव्याः मध्यमस्थाने, बृहस्पतिः समस्ताकाशे, शुक्रचन्द्रौ जलस्याधो भागे, शनिकेतुराहुग्रहाः तिर्यक् स्थाने भवन्तीति विज्ञेयम्।

मीनक्रियवृषकुम्भा ह्रस्वा मध्या युग्ममृगाश्च कुलीराः।।

शेषा दीर्घा अथ झषयुग्मालीन्दुगृहाण्यतिसंततिवन्ति।।६३।।

मीन – मेष – वृष – कुम्भाः ह्रस्वाः, मिथुन – मकर – कर्काः मध्याः, शेषराशयः दीर्घा इति विज्ञेयाः। मीन – मिथुन – वृश्चिक – कर्कादि राशयः अतिसन्तानशीला इति

वृषमृगहयकलशाः समसंताना अपरे लघुसंततिभाजः।।

यो मिथुनाश्वनवांशविभागः सन्ततिहीनतरः खलदृष्टः।।६४।।

वृष – मकर – धनु – कुम्भराशयः समसन्तानशीला तथैव अन्यराशयश्चेत् लघुसन्तानशीला इति ज्ञेया। मिथुनधनुराशी नवांशे पापग्रहेण दृष्टश्चेत् सन्तानहीन इति वक्तव्यम्।

मेषो हरिर्धनुश्चेति पित्तोष्णाः पूर्वदिग्भवाः।।

शनिः स्वामी सदा चैषां जीवो रात्रौ दिवा रविः।।६५।।

मेषसिंहधनुराशयः पित्तप्रकृतिकाः, उष्णस्वाभाविकाः, पूर्वदिशायां स्थिताः इति स्वामी तु शनिरेव। बृहस्पतिः रात्रिस्वामी, सूर्यः दिवास्वामी इति विज्ञेया।

कन्यावृषमृगा याम्या रूक्षोष्णशीतवातुलाः।।

कुजः स्वामी सदा चैषां चंद्रः सितो दिवा।।६६।।

कन्यावृषमकरराशयः दक्षिणभागे तिष्ठन्ति, रूक्ष – उष्ण – शीतल – वातप्रकृतिकाः भवन्ति। एतेषां स्वामी कुजो भवति। रात्रौ चन्द्रस्तथा दिवा शुक्रः स्वामी भवतः।

राशिसंज्ञा चक्रम्

मेषः	वृषभः	मिथुनः	कर्कः	संहः	कन्या	तुला	वृश्चिकः	धनुः	मकरः	कुम्भः	मीनः	राशि-नामणिः
पुरुषः	स्त्री	पुरुषः	स्त्री	पुरुषः	स्त्री	पुरुषः	स्त्री	पुरुषः	स्त्री	पुरुषः	स्त्री	पुरुषस्त्री-संज्ञा
अग्निः	पृथ्वी	वायुः	जलम्	अग्निः	पृथ्वी	वायुः	जलम्	अग्निः	पृथ्वी	वायुः	जलम्	तत्त्वसंज्ञा
चरः	स्थिरः	द्वि-स्वभावः	चरः	स्थिरः	द्वि-स्वभावः	चरः	स्थिरः	द्वि-स्वभावः	चरः	स्थिरः	द्विस्वभावः	चरस्थिर-दिसंज्ञा
चतुष्पदः	चतुष्पदः	द्विपदः	बहुपदः	चतुष्पदः	द्विपदः	द्विपदः	बहुपदः	पूर्वार्धे द्विपदः, अपरार्धे चतुष्पदः	पूर्वार्धे द्विपदः, अपरार्धे द्विपदः	अपदः	अपदः	चतुष्पदादि संज्ञा
रक्तः	श्वेतः	हरितः	पाटलः	पांडुः	चित्रः	कृष्णः	पीतः	पिङ्गलः	पर्बुरः	बभ्रुः	मलीनः	वर्ण-संज्ञा
पूर्णशब्दः	पूर्णशब्दः	पूर्णशब्दः	शब्द-रहितः	पूर्णशब्दः	अर्धदशब्दः	पूर्ण-शब्दः	शब्द-रहितः	पूर्णशब्दः	शब्द-रहितः	अर्ध-शब्दः	शब्द-रहितः	शब्दसंज्ञा
निर्जलं	सजलं	निर्जलं	सजलं	निर्जलं	सजलं	सजलं	निर्जलं	निर्जलं	सजलं	सजलं	सजलं	सजल-निर्जल-संज्ञा
चैत्र	वैशाख	ज्येष्ठ	आषाढ	श्रावण	भार्दो	क्कार	कार्तिक	आगहन	पौष	माघ	फाल्गुण	माससंज्ञा
पूर्व	पश्चिम	दक्षिण	पूर्व	उत्तर	दक्षिण	पूर्व	पूर्व	दक्षिण	उत्तर	पूर्व	दक्षिण	गृहद्वारादि विचारे दिशाज्ञानम्
पूर्व	दक्षिण	पश्चिम	उत्तर	पूर्व	दक्षिण	पश्चिमा	उत्तर	पूर्व	दक्षिण	पश्चिम	उत्तर	पूर्वादि दिशाज्ञानम्
रात्रि	रात्रि	रात्रि	दिन	दिन	दिन	दिन	दिन	रात्रि	रात्रि	दिन	दिन	रात्रिदिन स्वामिसंज्ञा
अन्ध	बधिर	मूक	पङ्गुं	अन्ध	बधिर	मूक	पङ्गुं	अन्ध	बधिर	मूक	पङ्गु	अन्धादिसंज्ञा
ह्रस्व	ह्रस्व	मध्य	मध्य	दीर्घ	दीर्घ	दीर्घ	दीर्घ	दीर्घ	मध्य	ह्रस्व	ह्रस्व	ह्रस्वादिसंज्ञा
अल्प-संन्तान	सम-सन्तान	अति-सन्तान	अति-सन्तान	अल्प-सन्तान	अल्प-सन्तान	अल्प-संतान	अति-सन्तान	समसन्तान	सम-सन्तान	सम-संतान	अति-सन्तान	अल्पसन्तानादि संज्ञा[1]

[1] मिथुन तथा धनोः नवांशः पापग्रहेण दृष्टश्टेत् सन्तानहिनो भवेत्।

पित्त	वात	वात	कफ	पित्त	वात	वात	कफ	पित्त	वात	वात	कफ	पित्तादिप्रकृतिसंज्ञा
उष्ण	उष्ण शितल	उष्ण	शीतल	उष्ण	उष्ण शीतल	उष्ण	शीतल	उष्ण	उष्ण शीतल	उष्ण	शीतल	उष्णादिसंज्ञा
सम	रूक्षा	मृदु	मृदु	सम	रूक्षा	मृदु	चिकना	सम	रूक्षा	मृदु	मृदु	रूक्षादिसंज्ञा
शनि	कुज	बृहस्पति	चन्द्र	शनि	कुज	गुरु	चन्द्र	शनि	कुज	गुरु	चन्द्र	नित्यस्वामिनो ग्रहाः
बृहस्पति	चन्द्र	बुध	कुज	बृहस्पति	चन्द्र	बुध	कुज	बृहस्पति	चन्द्र	बुध	कुज	रात्रौ स्वामिनो ग्रहाः
सूर्य	शुक्र	शनि	शुक्र	सूर्य	शुक्र	शनि	शुक्र	सूर्य	शुक्र	शनि	शुक्र	दिने स्वामिनो ग्रहाः

ग्रहसंज्ञाचक्रम्

सूर्यः	चन्द्रः	कुजः	बुधः	बृहस्पतिः	शुक्रः	शनिः	राहुः	ग्रहनामानि
धातु	मूल	धातु	मूल	जीव	जीव	मूल	-	साधारणधात्वदि-संज्ञा
धातु	जीव	धातु	मूल	जीव	जीव	मूल	-	केन्द्रस्थ-बली-धात्वादि-संज्ञा
रक्त	श्वेत	रक्त	हरित	पीत	श्वेत	श्याम	-	वर्णसंज्ञा
चतुष्पद	सर्प	चतुष्पद	पक्षी	द्विपद	द्विपद	पक्षी	सर्प	चतुष्पदादि संज्ञा
क्षत्रिय	वैश्य	क्षत्रिय	शूद्र	ब्राह्मण	ब्राह्मण	म्लेच्छ	म्लेच्छ	क्षत्रियादि-संज्ञा
चौकोर	स्थूल	चौकोर	वर्तुल	वर्तुल	खण्ड	दीर्घ	दीर्घ	चतुरस्रादि संज्ञा
वनचर	जलचर	वनचर	ग्रामचर	ग्रामचर	जलचर	वनचर	वनचर	वनचरादि-संज्ञा
मध्याह्नव	अपराह्न	मध्याह्न	पूर्वाह्न	पूर्वाह्न	अपरान्न	संयंवलि	सायंब	कालबलि-

लि	बलि	बलि	बलि	बलि	बलि		लि	संज्ञा
पित्त	कफ	पित्त	समधातु	समधातु	कफ	वात	वात	पित्तादि
कटु	लवणाम्ल	कटु	कटुमिष्ट	मिष्ट	लवणाम्ल	तीक्षण	तीक्षण	कटुकादिसंज्ञा
पुरुष	स्त्री	पुरष	नपुंसक	पुरुष	स्त्री	नपुंसक	स्त्री	पुरुषादिसंज्ञा
वृद्ध	मध्यमायु	युवा	शिशु	वृद्ध	मध्यमायु	वृद्ध	वृद्ध	वृद्धादिसंज्ञा
यौराहा	जलाशय	दग्धस्था	ईठोंकठेर	देवस्थान	जलाशय	बह्यभूमि	बह्यभूमि	नष्टवस्तुनिवास-स्थान[1]
राजा	तपस्वी	सुनार	बलिया	वैश्य	वैश्य	शूद्र वा अन्य	निषाद	जातुसंज्ञा
भूषण	धातु	पात्र	पात्र	भूषण	धातु	शास्त्र	शास्त्र	भूषणादिसंज्ञा
शिरो-भूषणम्	शिरो-भूषणम्	बाहु-भूषणम्	हस्त-भूषणम्	कर्णभू-षणम्	बाहुभू-षणम्	चरण-भूषणम्	चरण-भूषणम्	अंगभूषणसंज्ञा
निरस	सरस	नीरस	सरस	सरस	सरस	नीरस	नीरस	सरसादिसंज्ञा
अभक्ष्य	भक्ष्य	अभक्ष्य	भक्ष्य	भक्ष्य	भक्ष्य	अभक्ष्य	अभक्ष्य	भक्ष्यादिसंज्ञा
फलरहित	फलयुक्त	फलरहित	फलयुक्त	फलयुक्त	फलयुक्त	फलरहित	फलरहित	फलवद्वृक्षसंज्ञा
वृक्ष	लता	वृक्ष	लता	वृक्ष	लता	लता	लता	वृक्षादिसंज्ञा
सूर्य	चन्द्र	कुज	बुध	बृहस्पति	शुक्र	शनि	राहु	ग्रहानामानि
धान्य	गोधूम	कौलत्थ	यवा	धासोद्वान्न	धान्य	मुद्गा	मषा	अन्नसंज्ञा
पक्व	पक्व	जलयु	पक्व	पक्व	अपक्व	अपक्व	कवल	पक्वादिसंज्ञा

[1] चतुर्थभागे एतेः ग्रहैः दैवज्ञ नष्टवस्तुनः निवासभूमिविचारः क्रियते।

		क्त						
शुष्कपलाश-शाखादि	खिन्नी आदि	कण्ठक वृक्ष	बेरी आदि	दूधवाले	कदली	बेरी आदि वृक्ष	बेरी अख-ण्डित शुष्क	वृक्षनामसंज्ञा
युद्ध	स्त्री	युद्ध	व्यवहार	स्वजन	स्त्री	कलि	कलि	युद्धादिसंज्ञा
मज्जा अस्थि	चित्त	रक्त	जीवशुद्धि	प्राण	वीर्य	मांसत्वचारोम	मज्जा अस्थि	मज्जादिसंज्ञा
निर्जल	जलाधार	निर्जल	स्वल्प जल	स्वल्प जल	जलाधार	निर्जल	निर्जल	निर्जलादिसंज्ञ
वायु	जल	वायु	भूमि	बाह्य स्थान	अग्नि	आकाश	आकाश	स्थानाधिपतयः
पाताल	मर्त्यलोक	पाताल	आकाश	आकाश	पाताल	पाताल	पाताल	लोकसंज्ञा
आषाढ	श्रवण	भादौं	क्वार	कार्तिक आगहन पौष	ज्येष्ठ	माघ फल्गुन	चैत्र वैशाख	मासादिसंज्ञा
पूर्व	वायव्य	दक्षिण	उत्तर	ईशान	अग्निकोण	पश्चिम	नैऋत्य	दिशाधिपतयः
अग्निस्थाने स्थियमाना	जलाधभागे स्थियमाना	अग्नौ स्थिय माना	भूमे मध्य भागे स्थ्यमाना	आकाशमे स्थिय माना	जलाधभागे स्थियमाना	अधोभागे स्थियमाना	निचेभागे स्थिय माना	निवासस्थानम्

कुंभयुग्मतुलासज्ञा स्निग्धोष्णा वातुलास्तथा।।
एषां स्वामी सदा जीवो रात्रौ सौम्यो दिने शनिः।।६७।।

मिथुनकुम्भतुलाराशयः स्निग्धाः, उष्णीभूताः, वातप्रकृतिकस्वभावशीलाः भवन्ति। एतेषां ग्रहाणां स्वामी सदा बृहस्पतिः, रात्रौ बुधः, दिने शनिः इति ज्ञेयः। एते ग्रहाः पश्चिमदिशायां भवन्ति।

मीनालिकर्कटाः स्निग्धाः शीता उत्तरसम्भवाः।।

दिने शुक्रः कुजो रात्रौ राशी नित्यं च तत्पतिः।।६८।।

मीनवृश्चिककर्कराशयः स्निग्धाः, शीतलयुताः च। एते उत्तरदिशायां भवन्ति। दिने शुक्रः, रात्रौ कुजः, सदा चन्द्रः एतेषां राशीनां स्वामी भवति।

सप्तवर्गे तु लग्नस्य शुभवर्गो यदा भवेत्।।

चिन्तितार्थे शुभं वाच्यं ग्रहयोगेक्षणं विना।।

परथा त्वशुभं मिश्रो वर्गश्चेत्समता फले।।६९।।

यदि लग्नस्य सप्तमवर्गे शुभग्रहस्य वर्गश्चेत् चिन्तितार्थे शुभं वक्तव्यम्, परन्तु कस्यापि ग्रहस्य योगस्तथा दृष्टिः न भवेत्तर्हि, अन्यथा अशुभग्रहस्य वर्गश्चेत् अशुभं, मिश्रग्रहाः चेत् फलम् समतेति वक्तव्यम्।

यद्वा – चेच्छुक्रचंद्रशनयोऽम्बुनि जातीफलं तथा।।

धातुश्च मृत्तिका चाथ बुधमंदारराहवः।।७०।।

यदि शुक्रचन्द्रशनिग्रहाः चतुर्थगृहे सन्ति चेत् जायफलस्य, धातोः मृत्तिकाविषये वक्तव्यम्। बुधशनिराहुग्रहाः

लाभे च नवमे सेतं फलं स्यादथ वाक्पतिः।।

तृतीये च धने चांद्रिर्मुष्टौ पद्यं वरं वदेत्।।७१।।

एकादशे नवमे स्थिताश्चेत् सेतफलमिति, बृहस्पतिः तृतीये, बुधः द्वितीये चेत् मुष्टौ पद्यं वरं वदेत्।

भौमो विद्रुमकृत्केन्द्रे ताम्रकृद्वाहिमासुरौ।।

केन्द्रे शंखादिदौ केन्द्रे सौम्यो लवणकारकः।।७२।।

कुजः केन्द्रे स्थितश्चेत् ताम्रकृत् इति राहुचन्द्रौ केन्द्रे स्थितौ चेत् शङ्खादीनां, बुधः केन्द्रेऽस्ति चेत् लवणकारक इति वदेत्।

कर्के शुक्रो यदा केंद्रे रुक्ममुद्रां तदा वदेत्।।

गुरुर्दशनवस्थाने सप्तमे वा समागतः।।७३।।

कर्कस्थ शुक्रः यदा केन्द्रे स्थितस्तथा रक्तमुद्रां वदेत्। बृहस्पतिः नवमे दशमे तथा सप्तमे स्थितश्चेत्

सुवर्णं रत्नसंयुक्तं वस्त्रं चैव सुवर्णकम्।।

भौमे शुक्रे त्रिकोणे च मृत्तिका मुष्टिगा भवेत्।।७४।।

रत्नयुक्तसुवर्णं तथा सुवर्णकवस्त्रं भवेत्। कुजशुक्रौ त्रिकोणे (९/५) स्थितौ चेत् मुष्टौ मृत्तिका भवेत्।

कर्मस्थाने गुरुर्नूनमाम्रादिफलकारकः।।

निशापतिः शुक्रदृष्टः केन्द्रे क्षाराम्लवत्फलम्।।७५।।

दशमस्थाने बृहस्पतिरस्ति चेत् आम्रादिफलकारकः, शुक्रदृष्टः चन्द्रः केन्द्रे स्थितश्चेत् क्षाराम्लवत्फलम् वक्तव्यम्।

रविः केन्द्रे बुधो भाग्ये पंचमे भूमिजः फलम्।।

मिष्टं यदा रिपौ चंद्रः पिप्पलीफलमत्र चेत्।।७६।।

सूर्यः केन्द्रे, बुधो भाग्ये, कुजः पञ्चमे चेत् मिष्टं फलं भवेत्। यदि चन्द्रः षष्ठमगृहे स्थितश्चेत् पिप्पलीफलमिति विज्ञेयम्।

शुक्रयुक्तश्चंद्रमा स्यादेलाफलमथो रिपौ।।

मंदश्च नवमे भौमो रक्तकृष्णं च वर्तुलम्।।७७।।

यदि षष्ठमगृहे शुक्रयुक्तश्चन्द्रश्चेत् ऐलाफलं, शनिः षष्ठमगृहे कुजः नवमे चेत् रक्तकृष्णवर्णं गोलाकारञ्च वस्तु वक्तव्यम्।

श्यामास्तिला मसूराद्या यदा लाभे भृगोः सुतः।।

गोधूमान्नं यवश्चैव यदा गुणपदे रविः।।७८।।

अथवा श्यामास्तिला मसूराद्याः इति कथनीयाः। यदि एकादशे शुक्रश्चेत् गोधूमान्नं तथा तृतीये गृहे सूर्यश्चेत्

अर्कपत्रं यदा केन्द्रे राहुः शस्त्रायसी स्मृते।।

केन्द्रे शनिः श्यामपुष्पं यदा वित्कें द्रगस्तदा।।७९।।

अर्कपत्रं, केन्द्रे राहुश्चेत् शस्त्रलोहः, केन्द्रे शनिश्चेत् श्यामपुष्पाणि इति विज्ञेयानि। यदि बुधः केन्द्रे स्थितश्चेत् कमलमिति वक्तव्यम्।

पद्मं यदा राहुचंद्रशुक्राः केन्द्रे हि दाडिमम्।।

शनिराहुबुधाः केन्द्रे फलमेरण्डजं यदा।।८०।।

राहुचन्द्रशुक्राः यदि केन्द्रे तिष्ठन्ति चेत् दाडिमफलं, शनिराहुबुधाः केन्द्रे भवन्ति चेत् एरण्डफलं वक्तव्यम्।

बुधेक्षितो गुहः केन्द्रे मालतीपुष्पमादिशेत्।।

चंद्रो भौमबुधद्रष्टा धनस्थानं निरीक्षति।।८१।।

बुधेन दृष्टः राहुः केन्द्रे स्थितश्चेत् मालतीपुष्पं, कुजबुधग्रहयोः द्रष्टा चन्द्रः धनस्थानं पश्येत् तर्हि

रक्तपीतं तदा वस्त्रं यदा राह्वारकेतवः।।

तनुं पश्यन्ति धूम्रं च रक्तं वस्त्रं च विद्रुमम्।।८२।।

रक्तपीतवस्त्रं तथा गृहं कुजकेतवः लग्नं पश्यन्ति चेत् धूम्ररक्तवस्त्रं, विद्रुमम् च वक्तव्यम्।

बुधात्पञ्चमं यत्रिकोणं च पश्येद्भृगुश्चापि चंद्रो रिपौ तत्फलं स्यात्।।

त्रिकोणे हिमांशुश्च केन्द्रे महीजस्तदा मृत्तिका रक्तगुंजाफलं वा।।८३।।

बुधेन पञ्चमे स्थाने शुक्रः त्रिकोणं पश्येत् तथा चन्द्रः षष्ठमस्थाने स्थितश्चेत् पूर्वोक्तं धूम्ररक्तवस्त्रं विद्रुममेव वदेत्। त्रिकोणे चन्द्रस्तथा केन्द्रे कुजश्चेत् मृत्तिका, रक्तगुंजाफलं वा वक्तव्यम्।

अथ चिन्ताप्रश्ने विचारः

रवौ स्वभे भूपतिराज्यचिन्ता विधौ जलक्षेत्रनिखातचिन्ता।।

कुजेऽरिभूपालभयस्य चिन्ता बुधेकृषिक्षेत्रखलायुधानाम्।।८४।।

सूर्यः स्वराशिगतश्चेत् राज्ञः राज्यचिन्ता, चन्द्रः स्वक्षेत्री चेत् क्षेत्रनिखातचिन्ता, कुजश्चेत् शत्रुराजभयस्य चिन्ता, बुधश्चेत् क्षेत्रखलायुधानां चिन्ता वक्तव्या।

चिन्ता गुरौ धर्मसुहृन्नृपाणां भृगौ स्वभे वाऽखिलसौम्यचिन्ता।।
शनौ नृपागारविवादचिन्ता भवेदथो लग्नगते दिनेशे।।८५।।

बृहस्पतिश्चेत् धर्म – मित्र – राज्यचिन्ता, शुक्रश्चेत् सकलशुभचिन्ता, शनिश्चेत् राजद्वारे विवादचिन्ता इति वक्तव्या।

पाखंडिकूटानृतमंत्रचिन्ता धने भवेत्कार्यबलस्य चिंता।।
त्रये चतुर्थे च विवादचिंता सुते सुतानां रिपुगेध्वनश्च।।८६।।

यदि लग्ने सूर्यः स्थितश्चेत् पाखण्डीजनानां कपटासत्यं तथा मन्त्रचिन्ता भवेत्। सूर्यः द्वितीये गृहे स्थितश्चेत् कार्यवलस्य चिन्ता, तृतीये चतुर्थे स्थितश्चेत् विवाहचिन्ता, पञ्चमे पुत्रचिन्ता,

कार्यस्य चिंता मदनेंऽगनाया मृतौ च नावः सुकृते हि चिन्ता।।
विदेशसंस्थस्य नृपे नृपार्थकार्यस्य लाभे द्रविणस्य रिःफे।।८७।।

कार्यस्य च चिन्ता, सप्तमे स्त्रीणां चिन्ता, अष्टमे नौकायाः चिन्ता, नवमे विदेशस्थ जनस्य चिन्ता, दशमे राज्ञः अर्थकार्यस्य चिन्ता, एकादशे चेत् धनलाभस्य चिन्ता वक्तव्या। द्वादशे चेत्

मार्गारिचिंताऽथ तनौ हिमांशौ क्षेंत्रार्थभोज्यस्य भवेद्धने च।।
वित्तप्रवासस्य तथा तृतीये वृष्टेश्चतुर्थे च गृहाम्बयोश्च।।८८।।

मार्गस्य तथा शत्रुचिन्ता वक्तव्या। यदि लग्ने चन्द्रश्चेत् क्षेत्रस्य, अर्थस्य, भोज्यवस्तुनः चिन्ता, द्वितीये चेत् धनस्य तथा परदेशचिन्ता, तृतीये चेत् वर्षायाः चिन्ता, चतुर्थे चेत् गृहस्य मातुः चिन्ता वक्तव्या।

सुते सुतानां च रिपौ गदानां मदे युवत्या निधने मृतेश्च।।
भोज्यस्य वा धर्मगते च पुण्याध्वगप्रयाणस्य खभे हि चिन्ता।।८९।।

पञ्चमे पुत्राणां चिन्ता, षष्ठमे रोगाणां चिन्ता, सप्तमे युवत्याः चिन्ता, अष्टमे चेत् मृत्युस्तथा भोज्यवस्तुनः चिन्ता, नवमे चेत् पुण्यस्तथा पथिकचिन्ता, दशमे चेत्

क्षेत्रस्य धूर्त्तस्य च लाभयाते चिन्ता हि वासुः शुचिवस्तुनोश्च।।
व्यये हृताप्तेश्च तनौ च भौमे भीवादयोः स्याच्च धने गताप्ते।।९०।।

क्षेत्रस्य तथा धूर्तमनुष्यस्य चिन्ता, एकादशे चेत् वस्त्रस्य, पवित्रवस्तुनः चिन्ता, द्वादशे चेत् चौर्यवस्तुप्राप्तिचिन्ता वक्तव्या। यदि लग्ने कुजश्चेत् भयस्य तथा वादचिन्ता, द्वितीये कुजश्चेत् गतवस्तुचिन्ता,

दुश्चिक्यगे भ्रातृसुहृत्कलेश्च तुर्ये सुहृद्वैरिपशुप्रपादेः।।
पुत्रे सरोषानुनयस्य षष्ठे चिंता च वन्ह्यायसरूप्यहेम्नाम्।।९१।।

तृतीये चेत् भ्रातृमित्रकलहचिन्ता, चुतर्थे चेत् मित्र – वैर – पशूनां चिन्ता, पञ्चमे चेत् क्रोधसहितानुनयचिन्ता, षष्ठमे चेत् अग्नि – लोह – रूप्य – सेनाचिन्ता वक्तव्या।

द्यूने विनष्टार्थतुरंगदासीचिन्ता मृतौ मंदिरमंदुरादेः।।
धर्मेऽध्वनः स्याद्दशमे च वादिप्रवादिनां लाभगते च चिन्ता।।९२।।

सप्तमे चेत् विनष्टद्रव्यचिन्ता, अश्वदासीजनचिन्ता च, अष्टमे चेत् गृहस्य मन्दिरस्य च चिन्ता, नवमे चेत् मार्गस्य चिन्ता, दशमे चेत् वादप्रतिवादीनां चिन्ता, एकादशे चेत्

विश्वासबुद्ध्या रिपुपातचिन्ता व्यवस्थिते वैरिरणस्य चिन्ता।।
बुधे तनौ शास्त्रसुखादिकानां चिन्ता धने वस्त्रधनात्मजानाम्।।९३।।

विश्वासबुद्ध्या शत्रुपातचिन्ता, द्वादशे चेत् वैरिणा युद्धचिन्ता करणीया। बुधो लग्ने स्थितश्चेत् शास्त्रसुखादीनां चिन्ता, द्वितीये चेत् वस्त्रधनपुत्राणां चिन्ता,

तृतीयगे स्वसृसहोदराणां सुखेऽम्बुपानां कृषिवाटिकानाम्।।
सुते सुतानां च रिपौ हि सुप्तनार्यश्च कार्यस्य मदेंऽगनायाः।।९४।।

तृतीये चेत् सोदरसोदरीणां चिन्ता, चतुर्थे चेत् जलपानां कृषिवाटिकानां चिन्ता, पञ्चमे चेत् पुत्राणां चिन्ता, षष्ठमे चेत् गुप्तस्त्रीकार्यचिन्ता, सप्तमे चेत् स्त्रीचिन्ता,

विहंगमस्यापि मृतौ नपाज्ञाहृतादिकानां नवमे च चिंता।।

पतत्रिणां कर्मणि शास्त्रसौख्यकथानकानां च बुधे भवे च।।९५।।

पक्षिचिन्ता च करणीया। अष्टमे चेत् राजाज्ञाहृतादिकानां चिन्ता, नवमे चेत् पक्षीणां चिन्ता, दशमे चेत् शास्त्रशौख्यकथानकानां चिन्ता,एकादशे चेत्

निजार्थकार्यस्य च संशयानां पाखण्डिविद्रोहिसुखस्य चान्त्ये।।

गुरौ तनौ व्याकुलताविनाशिसौख्यस्य कोशेकुशलार्थकानाम्।।९६।।

अर्थकार्यस्य चिन्ता, द्वादशे चेत् संशय - पाखण्डी – विद्रोहिमनुष्याणां मुखचिन्ता करणीया। यदि बृहस्पतिः लग्ने स्थितश्चेत् व्याकुलताविनाशिसौख्यस्य चिन्ता, द्वितीये गृहे बृहस्पतिः स्थितश्चेत् कुशलस्य द्रव्यस्य च चिन्ता करणीया।

तृतीयगे स्वसृकुलान्वितानां सुखे विवाहस्य कुलोद्भवां च।।

सुते सुतोद्वाहरतेश्च षष्ठे वधूतुरंग्यादिकदोहदस्य।।९७।।

तृतीये चेत् स्वसृकुलमनुष्याणां चिन्ता, चतुर्थे चेत् कुलोद्भवानां मनुष्याणां विवाहचिन्ता, पञ्चमे चेत् विवाहप्रीतिचिन्ता, षष्ठमे चेत् वध्वाः, अश्वगर्भस्य चिन्ता करणीया।

स्मरस्थिते स्यादुहितार्थसिद्धौ मृत्यौ तथा स्यात्कृपणस्य पुंसः।।

धर्मेऽन्यदेशस्य धनध्वजानां स्वस्थे सुहृद्विग्रहसौख्यतश्च।।९८।।

सप्तमे बृहस्पतिरस्ति चेत् पुत्रस्य अर्थसिद्धिचिन्ता, अष्टमे चेत् कृपणपुरुषस्य चिन्ता, नवमे चेत् परदेशस्य, धनस्य, ध्वजानां चिन्ता, दशमे चेत् मित्रविवादस्य सुखस्य च चिन्ता करणीया।

लाभे स्थिरत्वादिसुखस्य रिःफे पशोश्च चिन्ता तनुगे भृगौ च।।

नृत्येष्टगीतादिसुखस्य कोशे रक्ताम्बरस्वस्य तृतीयसंस्थे।।९९।।

एकादशे चेत् स्थिरतादीनां सुखस्य चिन्ता, द्वादशे चेत् पशुचिन्ता करणीया। यदि शुक्रः लग्ने स्थितश्चेत् नृत्येष्टिकागीतादीनां सुखचिन्ता, द्वितीयगृहे चेत् रक्तवस्त्राणां तथा धनस्य चिन्ता, तृतीये चेत्

स्वदारगर्भस्य सुखे विवाहसौख्यस्य सूनौ हितवाहनानाम्।।

षष्ठे प्रसूतेर्मदने वधूटीमेलाय सुस्नेहसुखाय चिन्ता।।१००।।

स्वस्त्रीगर्भस्य चिन्ता, चतुर्थे चेत् विवाहसुखचिन्ता, पञ्चमे चेत् मित्रस्य, वाहनस्य च चिन्ता, षष्ठमे चेत् प्रसूतिचिन्ता, सप्तमे चेत् वधूटीमेलनचिन्ता, प्रेमस्तथा सुखाय चिन्ता करणीया।

मृतौ परस्त्रीजनिताऽथ भाग्ये सुप्तस्य खे कर्मण औपयाते।।

शुक्रे च नारीझकटस्य चिन्ता व्यये स्थितिस्वर्गतवस्तुचिन्ता।।१०१।।

अष्टमे गृहे चेत् परस्त्रीकृतचिन्ता, नवमे चेत् सुप्तस्य पुरुषस्य चिन्ता, दशमे चेत् कर्मणः चिन्ता, एकादशे चेत् नारीझकटस्य चिन्ता, द्वादशे चेत् स्थितिचिन्ता, स्वर्गगतवस्तुचिन्ता करणीया।

शनौ तनुस्थे गददारचिन्ता धने भवेत्स्वात्मजपाठचिन्ता।।

तृतीयगे भ्रातृविनाशचिंता सुखे स्त्रियाः स्तन्यविवृद्धिचिन्ता।।१०२।।

शनिः लग्ने स्थितश्चेत् रोगस्तथा स्त्रीचिन्ता, द्वितीये चेत् पुत्रपाठचिन्ता, तृतीये चेत् भ्रातृविनाशचिन्ता, चतुर्थे चेत् स्त्रियाः स्तन्यवृद्धिचिन्ता करणीया।

सूनौ च मर्त्यद्वयकार्यचिन्ता चिन्ता रिपौ प्राक्तनजारिकायाः।।

द्यूने च वध्वा झकटस्य मृत्यौ गतार्थदासी मृतवस्तुनां च।।१०३।।

पञ्चमे चेत् मनुष्यद्वयकार्यचिन्ता, षष्ठमे चेत् पूर्वजारिकायाः चिन्ता, सप्तमे चेत् वध्वा विवादचिन्ता, अष्टमे चेत् गतधनचिन्ता, दासीजनचिन्ता, मृतवस्तूनां च चिन्ता करणीया।

भाग्ये शनौ निन्दितदुर्मतीनां दशस्थितेऽस्या झकटस्य भीतेः।।

आये शनौकुत्सितकार्यचिन्तारिः फेशनौ वैरिगणस्यचिन्ताः।।१०४।।

नवमे शनिश्चेत् निन्दित – दुर्मतिमनुष्याणां चिन्ता, दशमे चेत् झकटभीतेः चिन्ता, एकादशे चेत् कुत्सितकार्यचिन्ता, द्वादशे चेत् वैरीणां चिन्ता कार्या।

शुक्रेत्तसाले च बुधेत्तसाले जीवेत्तसाले हिमगौ प्रकर्षात्।।

सूर्येत्तसाले मदने विशेषात्स्त्रीणां विवाहस्य भवेच्च चिन्ता।।१०५।।

शुक्रस्य इत्तसाले, बुधस्य इत्तसाले, बृहस्पतेः इत्तसाले यदि चन्द्रश्चेत् अधिकस्त्रीणां विवाहचिन्ता, तथैव सप्तमगृहे सूर्यस्य इत्तसाले चन्द्रः स्थितश्चेदपि विशेषात्स्त्रीणां विवाह चिन्ता भवेत्।

यद्वेन्दुनन्दांशतः फलम्

यदा चंद्रो मेषभागे कनकं गुरुशुक्रयोः।।

एकेन दृष्टोऽसौ रत्नं वृषांशे चेन्निशापतिः।।१।।

यदि चन्द्रः मेषस्य नवांशे स्थितश्चेत् स्वर्णमिति, यदि गुरुशुक्रयोः एकेन दृष्टश्चेत् रत्नमिति वक्तव्यम्। यदि चन्द्रः

पुष्टशुक्रेक्षिते भूषामयोऽसौ वक्रिणो दृशा।।

अतीचारिभृगोश्च स्वं जीर्णं मिथुनकर्कयोः।।२।।

वृषस्य नवांशे पुष्टः शुक्रेण दृष्टश्चेत् भूषणयुक्तरत्नानि तथैव वृषनवांशस्थ चन्द्रो वक्रीग्रहस्य वा अतिचारिशुक्रस्य दृष्ट्या वीक्षते चेत् पुरातनधनं लभ्यते। यदि चन्द्रः मिथुनकर्कयोः

नवांशगः शशी वारिजानि सिंहांशगः शशी।।

सूर्यदृष्टो हेमरूप्ये कन्यांशेन्दुरवीक्षितः।।३।।

नवांशेऽस्ति चेत् वारिजानि वक्तव्यानि। यदि चन्द्रः सिंहस्य नवांशे सूर्येण दृष्टश्चेत् सुवर्णरूप्ये लभतः। यदि कन्यायाः नवांशे चन्द्रः सूर्येण अदृष्टश्चेत्

रूप्यं सौम्येक्षितश्चायं कांस्यं सौम्येक्षणं विना।।

मुद्रां शुक्रेक्षितो वस्त्रं कुद्दालं शनिवीक्षितः।।४।।

रूप्यं तथा बुधेन दृष्टश्चेत् कांस्यमिति, बुधेन अदृष्टश्चेत् मुद्रा, शुक्रेण चेत् वस्त्र, शनैश्चरेण दृष्टश्चेत् कुद्दालं वक्तव्यम्।

तुलांशे चंद्रमाः शुक्रदृष्टश्चेद्गंधवाससी।।

अशुक्रवीक्षितो जीर्णं वासो वृश्चिकभागगः।।५।।

यदि चन्द्रः तुलायाः नवांशे शुक्रेण दृष्टश्चेत् गन्धवस्त्राणि, यदि शुक्रेण अदृष्टश्चेत् जीर्णवस्त्रमिति वक्तव्यम्। यदि चन्द्रः वृश्चिकस्य नवांशे

शुक्रदृष्टो विधुर्लोहं स्वर्णरूप्ये कुजेक्षितः।।

धनुर्लवे विधुर्जीवदृष्टो रत्नं मृगांशके।।६।।

शुक्रेण दृष्टश्चेत् लोहं, कुजेन दृष्टश्चेत् सुवर्णरूप्ये वक्तव्ये। यदि धनस्य नवांशे चन्द्रः बृहस्पतिना दृष्टश्चेत् रत्नं, मकरस्य नवांशे चन्द्रः

जीवदृष्टः शशी चाल्पभास्करं मंदवीक्षितः।।

काचादिकल्पितं रत्नं जातिं चंद्रांशतो वदेत्।।७।।

बृहस्पतिना दृष्टश्चेत् अल्पप्रकाशमानं रत्नं, शनैश्चरेण दृष्टश्चेत् काचादिकल्पितरत्नम् इति वक्तव्यम्। एवं प्रकारेण चन्द्रस्य नवांशात् जातिर्वक्तव्या।

अथ तात्कालेन्दुः

इष्टा नक्षत्रघटिकाः सूर्योदयगतेष्टगाः।।

पञ्चत्रिंशोत्तरशतेनाप्ता राश्यादिको विधुः।।१।।

सूर्योदयात् गतेष्टपर्यन्तं वर्तमाननक्षत्रस्य घटिकासु अर्थात् गतर्क्षे पञ्चत्रिंशोत्तरशतेन भागदानात् यो लब्ध स एव राश्यादिको चन्द्र इति विज्ञेयः।

गतनक्षत्रसंख्यांकान् षष्ट्या संगुण्य संभजेत्।।

पञ्चत्रिंशोत्तरशतेनाप्तो राश्यादिको विधुः।।

द्वयोर्योगे स्पष्टचंद्रस्तात्कालीनोऽभिजायते।।२।।

गतनक्षत्रस्य सङ्ख्यां षष्ठ्या संगुण्य पञ्चत्रिंशोत्तरशतेन भागदानात् राश्यादिकचन्द्रो विज्ञेयः। उभयोः योगकरणेन तात्कालिकचन्द्रः स्पष्टरूपेण अभिजायते।

यद्वा – षष्टिघ्नं गतभं द्विघ्नं नंदभक्तं लवादि यत्।।

उदितर्क्षेष्टनाडीभिर्द्विगुणाभिस्तथा कृतम्।।

त्रिंशद्भक्तं हि राश्यादि चंद्रस्तात्कालिको भवेत्।।३।।

अथवा गतनक्षत्रं षष्ठ्या सगुण्य द्विगुणेन नवभागदानात् यत् अंशादिकं लभ्यते तं पृथक् लेखनीयम्। तथैव उदितनक्षत्रस्य इष्टपर्यन्तघटिकासु अर्थात् गतर्क्षं द्विगुणं कृत्वा नवभागदानात् यल्लब्धांशः तस्मात् पूर्वलिखितपङ्क्तौ संयोज्य अंशे तृतीयभागदानात् राश्यादि तात्कालिकचन्द्रः स्पष्टं भवेत्।

जीवज्ञशशिभिर्जीवं धातुं पातार्किभूसुतैः।।४।।

बृहस्पतिबुधचन्द्रेभ्यः जीवस्य राहुशनिकुजेभ्यः धातु

मूलमादित्यशुक्राभ्यां मिश्रैर्मिश्रं विनिर्दिशेत्।।

तत्कालचंद्रं नंदांशचक्रे पश्यति यो बली।।५।।

सूर्यस्तथा शुक्रेण मूलफलं, मिश्रग्रहैः मिश्रफलमिति वक्तव्यम्। तत्कालचन्द्रस्य नवांशचक्रे चन्द्रं यः कोऽपि बलवान् ग्रहः पश्येत्तर्हि तस्य ग्रहस्य द्रव्यमिति विज्ञेयम्।

तद्द्रव्यं स्याद्बलिष्ठाश्चेद्बहवो द्रव्यभूरिता।।

मंदजीवेक्षिते चंद्रे सजीवं जीवमादिशेत्।।६।।

यदि बलिष्ठग्रहः पश्येत्तर्हि भूरिद्रव्यम् ग्रहानुसारेण विज्ञेयम्। यदि शनिबृहस्पतिभ्यां दृष्टः चन्द्रश्चेत् सजीवजीव इति वक्तव्यः।

बुधेक्षिते च निर्जीवं जीवं भौमशनीक्षिते।।

स्वर्णादि धाम्यं धातुं च केवलागुनिरीक्षिते।।७।।

बुधेन दृष्टश्चेत् निर्जीवजीवः, कुजशनिभ्यां दृष्टश्चेत् सुवर्णादि धाम्यधातुरिति, केवलराहुणा दृष्टश्चेत्

रत्नाद्यधाम्यं सूर्येण दृष्टे शुष्कं च मूलकम्।।

आर्द्रं शुक्रेक्षिते मूलं मिश्रैर्मिश्रफलं वदेत्।।८।।

रत्नादि अधाम्यवस्तुरिति, सूर्येण दृष्टश्चेत् शुष्कमूलं, शुक्रेण दृष्टश्चेत् आर्द्रं मूलं तथा मिश्रग्रहैः दृष्टश्चेत् मिश्रफलं वक्तव्यम्।

तात्कालिकदिनचंद्रः स्त्रीतुलमिथुनांशके तदा द्विपदम्।।

कुंभधनुर्नवमांशे ब्रूयाद्वै पादवर्जितं जीवम्।।९।।

यदि तात्कालिकदिनस्य चन्द्रः तुला – कन्या – मिथुनराशीनां नवांशे तिष्ठेत्तर्हि द्विपद, कुम्भधनुराशिगतश्चेत् पादवर्जितजीवमिति वदेत्।

कर्कझषालिनवांशे बहुपदजीवं सदा वदेत्कुशलः।।

मेषमकरवृषसिंहेष्वत्र विशेषं परं ब्रूमः।।१०।।

कर्कमीनवृश्चिकानां नवांशे स्थितश्चेत् बहुपदजीव इति कथ्यते। मेषमकरवृष-सिंहराशिषु अधिकविशेषमधुना ब्रूयते।

चतुर्द्धा द्विपदा देवनरवायसराक्षसाः।।

भ्रमत्रयेण मेषादिचंद्रे तात्कालिके मताः।।११।।

द्विपदाः चतुर्द्धा भवन्ति देवनरवायसराक्षा इति। मेषादिचक्रे भ्रमत्रयेण तात्कालिमिति विज्ञेयम्।

चतुष्पदादयश्चान्ये द्विधा स्थलजलोद्भवाः।।

ते च राशेः स्वभावेन तात्कालेन्दोः परिस्फुटाः।।१२।।

यथा मेषस्य तात्कालिकचन्द्रः मेषस्य नवांशे स्थितश्चेत् देव इति, वृषस्य नवांशे चेत् नर इति, मिथुनस्य नवांशे चेत् वायस इति, कर्कस्य नवांशे चेत् राक्षस इति, सिंहस्य नवांशे चेत् देवेति प्रकारेण कन्यादीनां नवांशेऽपि विज्ञेयः। तथैव वृषादिकेष्वपि विज्ञेयः। अन्य चतुष्पदादिकजीवः द्विप्रकारको भवतः स्थलचारी जलचारी चेति। एतौ तात्कालिकचन्द्रस्य राशेः स्वभावात् विज्ञेयौ।

स्वर्णं रूप्यं तथा ताम्रं वंगं नागारलोहकम्।।

नागं कास्यं च विज्ञेयं नंदांशस्य क्रमेण वै।।१३।।

स्वर्ण – रूप्य – ताम्र – वंग – नागार – लोहक – कांस्य – नागधातवः नवांशक्रमात् विज्ञेयाः।

गुल्मवल्लीलताकंदा मेषाद्येन्दोर्भ्रमत्रयात्।।

पत्रं पुष्पं फलं मूलं त्वचा त्रिंशांशकाद्विधोः।।१४।।

गुल्मं – वल्ली – लता – कन्दाः मेषादि चन्द्रस्य भ्रमत्रयात् क्रमपूर्वकरूपेण विज्ञेयाः। पत्र – पुष्प – फल – मूल – त्वचाः चन्द्रस्य त्रिंशांशस्य क्रमानुसारेण विज्ञेयाः।

यतिविप्राधिकारिस्त्रीष्टान्त्यदस्यव ईरिताः।।

सूर्याद्यर्क्षगते चंद्रे चिंतितः पुरुषो भवेत्।।१५।।

यति – विप्र – अधिकारि – स्त्री – इष्टमित्र – अन्त्यज – चौराः सूर्यादि ग्रहाणां राशौ चन्द्रस्थितत्वात् क्रमानुसारेण विज्ञेयाः। परन्तु एतेषु चिन्तितः पुरुषः भवेत्।

सूर्याद्यर्क्षे वदेच्चंद्रे कुष्ठं चिह्नं च दद्रु च।।

मसकं तिलकं स्फोटघातं चिन्तितचौरयोः।।१६।।

सूर्यादि ग्रहाणां राशौ चन्द्रः स्थितश्चेत् चिन्तितपुरुषः तथा चौरशरीरे क्रमेण कुष्ठ – चिह्न – दद्रु – मसक – तिलक – स्फोटघातानि भवन्ति।

गौरोऽतिगौरः श्यामश्च श्यामो वानरसन्निभः।।

त्रिंशांशकाद्व्याव्यवर्णो नृणां व्युत्क्रमतस्त्वितः।।१७।।

गौर – अतिगौर – श्याम – वानरसमानश्याम इत्येवं प्रकारेण त्रिंशांसात् द्रव्यस्य वर्णं क्रमेण विज्ञेयः। परन्तु मनुष्याणां वर्णम् अस्माद्विपरीतं वदेत्। यथा वानरसमानश्यामवर्णं, श्यामवर्णं, अतिगौरवर्णं, गौरवर्णमिति

बालो युवा तथा वृद्धो द्रेष्काणस्य वशान्मताः।।

सप्ततित्रिचतुःसूर्याः पंचाशद्रदवत्सराः।।१८।।

बाल – युवा – वृद्धानां द्रेष्काणवशात् विज्ञेयः। ७०/३/४/१२/५०/३२ स्थानेषु वर्षसूर्यादि ग्रहाणां अवस्था वक्तव्या।

सूर्यादीनां च वयसो वार्धक्यं बहु भास्करेः।।

राजा भानुस्तपस्वीन्दुः स्वर्णकारः कुजो बुधः।।१९।।

द्विजो गुरुर्वणिक् शुक्रो वैश्यः शूद्रः शनैश्चरः।।

राहुर्निषाद इत्येते सर्वकार्येषु संमताः।।२०।।

परन्तु शनैश्चरस्य अतिवृद्धावस्था, सूर्यस्य राजा, चन्द्रस्य तपस्वी, कुजस्य स्वर्णकार, बुधस्य ब्राह्मण, बृहस्पतेः वणिक्, शुक्रस्य वैश्यः, शनेः शूद्र, राहोः निषाद इति सर्वकार्येषु अङ्गीकुर्वन्ति।

भूपराज्ञीमण्डलेशकुमारसचिवाभिधाः।।

नेतृपत्यभिधाः सूर्यान्नवांशेशाद्विधोर्वदेत्।।२१।।

राजा – राज्ञी – मण्डलेश – कुमार – मन्त्री – नेता – पत्यभिधाः चन्द्रस्य नवांशात् सूर्यादि ग्रहैरुच्यते।

वर्गे शादत्र भूमाने मूर्द्धा हस्तो निवर्तनम्।।

अर्द्धक्रोशस्तथा क्रोशो द्विक्रोशो योजनं भवेत्।।२२।।

अस्मिन् प्रश्ने पृथिव्याः प्रमाणविज्ञानाय सूर्यादि वर्गेशग्रहस्य क्रमानुसारेण मूर्द्धा – हस्त – गज – अर्द्धकोश – कोश – द्विकोश – योजनज्ञानं विज्ञेयम्।

नाड्यहःपक्षमासर्त्तुषण्मासाश्च समाः क्रमात्।।

वर्गाक्षरगे चंद्रे वाच्यं चैवान्तराग्रहात्।।२३।।

नाडी – दिन – पक्ष – मास – ऋतु – षाण्मास – वर्ष एतेषां वर्गस्य अक्षरेषु चन्द्रः स्थितश्चेत् मध्ये सूर्यादिग्रहश्चेत् तस्मात् क्रमानुसारः विज्ञेयः।

अथ तात्कालिकर्क्षचरणानयम्

ग्रहलिप्ताः खखाष्टाप्ता गतर्क्षं यदि चैव ताः।।

शतद्वयहृता याताश्चरणाद्दस्रभादितः।।२४।।

ग्रहस्य कलासु अष्टशतभागदानात् गतनक्षत्रसंख्या तथैव तासु कलास्वेव द्विशतभागदानात् यल्लब्धः तस्मात् अश्विनीतःगतचरणं भवेत् परन्तु ग्रहस्य राशि – अंश – कला इति सर्वं करणीयं भवति।

सप्तविंशतिभिर्निघ्ना उदितर्क्षेष्टनाडिकाः।।

षष्ट्याप्ता गतभैर्युक्ता दिने तत्कालभं गतम्।।२५।।

उदितस्य नक्षत्रस्य इष्टनाडिकाः अर्थात् गतार्क्षं सप्तविंशतिभिः गणनेन षष्टिभागदानात् यल्लब्धं तस्मात् गतनक्षत्रयोजनात् तात्कालिकगतराशिः भवेत् परन्तु ज्ञातव्यम् यत् लब्धे गतनक्षत्रयोजनात् सप्तविंशतिसंख्यापेक्षया अधिकश्चेत् सप्तविंशनाडिकाः देयाः, ततः तात्कालिका गतराशिः भवेत्।

तत्कालचंद्रराशोर्दिक्स्थाने च तदनन्तरम्।।

तत्कालचंद्रभाद्धयाद्धृतनष्टपदं सुधीः।।२६।।

तात्कालिकचन्द्रस्य राश्याः दिशा तथा स्थानविचारानन्तं चन्द्रस्य राशितः हृतनष्टवस्तुस्थानं विज्ञेयमिति बुधैः पण्डितैरुक्तमासीत्।

पुष्यार्द्राश्रुतिरोहिणीशतधनिष्ठाश्चोत्तराणां त्रयं।

स्यादूर्ध्वास्यगणो नलान्तकमघारक्षोविशाखाहयः।।

पूर्वाणां त्रितयं त्वधोमुखगणो ज्येष्ठादितिस्वातय-।

श्चित्राहस्तहयाश्च मित्रविधुरेवत्यः समास्यो गणः।।२७।।

पुष्य – आर्द्रा – श्रवण – रोहिणी – धनिष्ठा – उत्तरत्रय नक्षत्राणि ऊर्ध्वमुख-नक्षत्राणि भवन्ति। कृत्तिका – भरणी – मघा – मूला – विशाखा – आश्लेषा – पूर्वत्रयनक्षत्राणि अधोमुखनक्षत्राणि भवन्ति। ज्येष्ठा – पुनर्वसु – स्वाति – चित्रा – हस्त – अश्विनी – अनुराधा – मृगशिर – रेवत्यदि नक्षत्राणि समानमुखनक्षत्राणि भवन्ति।

ऊर्ध्ववक्रर्क्षगे चंद्रे धृतमूर्ध्वमधोमुखे।।

भे बिलादौ धरायां हि माध्यर्क्षे च तिरोधृतम्।।

नक्षत्रयोनितो योनिं पश्वादीनां वदेद्बुधः।।२८।।

यदि चन्द्रः ऊर्ध्वमुखनक्षत्रे स्थितश्चेत् उपरिकस्मिन्नपि स्थाने, अधोमुखं भवेत्तर्हि बिलादि नीचस्थानेषु पृथिव्यां, तथैव समानमुखं भवेत्तर्हि नक्षत्रस्थाने भवेत्तर्हि तिरोस्थाने हृतनष्टवस्तुधरीति चिन्त्यम्। नक्षत्रयोनितः पश्वादीनां योनिं वदेत्।

अथ नवांशस्पष्टसाधनम्

खेटांशाँस्त्रिभिराहत्य दशभिश्च विभाजयेत्।।

ततो भयातशेषेण भादिर्नंदांशक स्फुटः।।२९।।

ग्रहस्य अंशानां त्रिगुणकरणेन दशभागदानात् यल्लब्धं तस्मात् भयातदानात् या अवशिष्टराशिः, पूर्वे दशभागदानेन योऽवशिष्टः सोऽशं विज्ञेयः। अस्मादेव राश्यादीनां नवांशं स्पष्टं भवेत्।

तत्कालराशिनक्षत्रे द्रेष्काणे च नवांशके।।

दृष्ट्वा स्फुटतरं चंद्रं ततोऽवस्थां निरीक्षयेत्।।३०।।

तत्कालस्य राशौ नक्षत्रे द्रेष्काणे, नवांशे चन्द्रः अतिस्पष्टरूपेण दृष्ट्वा ततोऽवस्थां निरीक्षयेत्।

विभचंद्रलवा द्विघ्नाः पंचभक्ताः फलं गताः।।

अवस्थाभोग्यकायाश्च फलं ब्रूयान्निरन्तरम्।।३१।।

राशिरहितचन्द्रस्य अंशाद्विगुणं कृत्वा पञ्चभागदानेन यल्लब्धं सा एव चन्द्रस्य गताऽवस्था भवेत्। एतं त्यक्त्वा वर्तमानावस्थाफलं वक्तव्यम्।

प्रवासनाशौ मरणं जयश्च हास्यारतिः क्रीडितसुप्तभुक्ताः।।

ज्वरप्रकंपस्थितयः क्रायदिचंद्रक्रमात्स्युः प्रथमा अवस्थाः।।३२।।

प्रवास – नाश – मरण – जय – हास्य – रति – क्रीडित – सुप्त – भक्त – ज्वर – प्रकम्प – स्थितिः एताः अवस्थाः मेषादि चन्द्रस्य क्रमात् प्रथमाः अवस्थाः भवन्ति यथा मेषगतचन्द्रस्य प्रथमावस्था प्रवासः वृषगत चन्द्रस्य प्रथमावस्था नाशः मिथुनगत चन्द्रस्य प्रथमं मरणं, द्वितीयो जयः इति विज्ञेयः।

प्रवासादिज्ञानचक्रम्

चन्द्रस्थितराशिः	अवस्था	फलम्
मेषः	प्रवासः	गमनागमनचिन्ता वा प्रवासचिन्ता, पृच्छको वा धनोद्देशचिन्ता
वृषभः	नाशः	बन्धनम्, राजभयम्, वैरिणां क्रोधः, गमनम्, नष्टम्, उद्वेगः, भयानकः
मिथुनम्	मरणेम्	मरणम्, मृत्युः, क्रूरकर्मा, यात्रा
कर्कः	जयः	स्वस्य वा परस्य जयाशा
सिंहः	हास्यम्	स्वजनोभ्यः प्रसन्नता, धनाकाङ्क्षा, स्त्रीगर्भः
कन्या	रतिः	स्त्री वा मित्रेभ्यः चिन्ता, यथावधि लाभालाभः
तुला	क्रीडा	सुतमित्रादीनां मङ्गलकर्माणि, चिन्तोत्साहः, सुखम्, लाभलाभचिन्ता
वृश्चिकः	सुप्तः	स्वस्य वा स्वजनानां स्त्री लाभाशा
धनुः	भुक्तः	पराणां समीपे गमनचिन्ता, लाभालाभौ, ततः शुभाशुभे
मकरः	ज्वरः	पुत्र, स्त्री, द्रव्याणां चिन्ता अथवा अन्यः
कुम्भः	प्रकम्पः	क्रूरकर्मणा तथैव शत्रुभयम्, दुःखचिन्ता
मीनः	स्थितः	सुत अथवा मित्र अथवा द्रव्यप्रापणे चिन्ता

यथावस्था विधौ राशौ तथा धिष्ण्यनवांशके।।

आद्यपंचनवेशानां द्रेष्काणो निजराशितः।।३३।।

येन प्रकारेण चन्द्रस्य अवस्था राशिषूक्ता तेनैव प्रकारेण नक्षत्रे, नवांशे तथा द्रेष्काणेऽपि ज्ञेया। स्वराशेः प्रथमपञ्चमनवमराशीनामधिपतिः ग्रहस्य

द्रेष्काणक्रमात् भवेद्यथा मेषराशेः प्रथमदशांशनं अधिपतिः कुजः, तस्मादग्रे दशांशानामधिपतिः सूर्यस्तथा तस्मादग्रे दशांशानामधिपतिः बृहस्पतिरेवं वृषादि राशिष्वपि ज्ञेयम्।

अवस्था द्वादशा प्रोक्ताः स्वनामफलदा विधोः।।

यथोत्तरबलावस्था राशिद्रेष्काणभागजाः।।३४।।

चन्द्रस्य द्वादशावस्था स्वनामानुसारेण फलदायका इत्युच्यते। तथैव राशिद्रेष्काणनवांशानां अवस्थायथोत्तरं बलावस्था एव अर्थात् राशेः अवस्थायाः द्रेष्काणावस्था बलावस्था तथैव द्रेष्काणावस्थायाः नवांशावस्था बलावस्था भवति।

गमागमकृता चिन्ता प्रवासी पृच्छकोऽथवा।।

धनोद्देशेन वा चिन्ता प्रवासस्येति लक्षणम्।।३५।।

गमनागमनचिन्ता, प्रवासीचिन्ता, पृच्छकचिन्ता, धनोद्देशचिन्ता एताः सर्वाः प्रवासावस्थायाः भवन्ति।

बंधनं भूपतो भीतिर्वैरिक्रोधो गतो हतम्।।

उद्वेगश्च तथा रौद्रं नाशफलमितीरितम्।।३६।।

बन्धन – राजभय – वैरिक्रोध – गत – हत – उद्वेग – भयानकफलानि एतानि नाशावस्थायाः लक्षणानि भवन्ति।

मारणं मरणं क्रूरकर्म यात्रा मृतौ फलम्।।

स्वस्य च स्वजनस्यापि जयस्याशा जयाफलम्।।३७।।

मारणं – मरणं – क्रूरकर्म – यात्रा एतानि मरणावस्थायाः फलानि भवन्ति तथैव स्वस्य वा पराजयस्य वा जयावस्थायाः फलमितिकथ्यते।

स्वेभ्यः प्रीतिर्धनाकांक्षा स्त्रीगर्भो हास्यतः फलम्।।

स्त्रिया वा मित्रतश्चिन्ता लाभालाभं यथाविधि।।३८।।

स्वजनाय प्रीतिः, धनस्य आकाङ्क्षा, स्त्रीगर्भमित्यादि हास्यावस्थायाः फलानि भवन्ति। स्त्रिया वा मित्रात् चिन्ता, लाभ, यथाविधि अलाभ।

परम्पराकुलत्वं च रताविति फलं वदेत्।।

सुतमित्रादिमांगल्यं चित्तोत्साहः सुखं तथा।।३९।।

परम्परायाः व्याकुलताकारणेन रत्नवस्थायां फलं वक्तव्यम्। सुतमित्रादीनां कुज, कर्म, चित्तोत्साह, सुख।

लाभालाभस्य चिन्ता स्यादिति क्रीडागते विधौ।।

स्वस्य च स्वजनस्यापि लाभशा सुप्तिते विधौ।।४०।।

लाभालाभचिन्ता क्रीडावस्थागतस्य चन्द्रस्य फलानि भवन्ति। स्वस्य वा स्वजनस्य लाभाशा वा सुप्तावस्थागतस्य चन्द्रस्य फलानि भवन्ति।

परोपसर्पणे चिंता लाभालाभौ ततः शुभम्।।

कष्टं वापि वदेद्भुक्तावस्थायां यदि चंद्रमाः।।४१।।

परोपसर्पणचिन्ता, लाभ – अलाभचिन्ता – शुभ – कष्ट एताः मुक्तावस्थागतस्य चन्द्रस्य फलदायकाः भवन्ति।

सुतस्त्रीद्रव्यतश्चिन्ता ज्ञेयश्चिन्ता ज्वराफलम्।।

क्रूरकर्मभयं शत्रोर्दुःखचिंता प्रकम्पिते।।

संगमे सुतमित्राणां द्रव्ये चिन्ताफलं स्थितौ।।४२।।

पुत्रचिन्ता, स्त्रीचिन्ता, द्रव्यचिन्ता, अन्यचिन्ताः ज्वरावस्थायाः फलमिति कथ्यते। क्रूरकर्म, शत्रुभयं, दुःखचिन्ताः प्रकम्पितावस्थायाः फलमिति कथ्यते। सुतमित्रसङ्गमे वा द्रव्यलाभचिन्ताः स्थित्यवस्थायाः फलमित्यभिधीयन्ते।

किं करोतीति प्रश्ने विचारः

मकरराशिः पुमान् तस्य ज्वरावस्था पूर्वास्ति तत्र

चंद्रस्तृतीयावस्थायां ततो ज्वरावस्थातः तृतीया-

स्थितिरतः स्थितः इति ज्ञेयम्।।

मकरराशिः पुमान्, तस्य प्रथमा ज्वरावस्था भवति। तस्मात् चन्द्रः तृतीयावस्थायां भवति। तृतीयावस्थायाः नाम स्थितिः भवति। एतस्मादेव स पुरुषः स्थित इति ज्ञेयम्।

चौर्याय यामीति प्रश्ने विचारः

पापेऽङ्गे सौम्यदृष्टिर्वा चौर्यवादाग्रहात्सुखम्।।

तदान्यथा भयं हानिर्बंधनं वा समादिशेत्।।१।।

लग्ने पापग्रहो वा शुभग्रहस्य दृष्टिरस्ति चेत् चौर्यवादाग्रहात् सुखं भवेत्। तथैव एतस्मादन्यथा भवेत्तर्हि भयं, हानिर्बन्धनञ्च भवेत्।

लग्नेशो वीक्षिते लग्नं पापयोगेक्षणं विना।।

तत्र चौर्यादिसंसिद्धिः परथा परथा भवेत्।।२।।

पापयोगेक्षणरहितलग्नं लग्नेशः पश्येत्तर्हि चौर्यादि संसिद्धिर्भवेत्। यदि एवं प्रकारेण न भवेत्तर्हि असिद्धिर्जायते।

धने रिपौ व्यये छिद्रे लग्नेशः सदृशा विना।।

हानिं भीतिं तथा बंधं मृतिं च क्रमतो वदेत्।।३।।

२/६/१२/८ एतेषु गृहेषु लग्नेशो शुभग्रहदृष्टिरहितश्चेत् क्रमेण हानिभयबन्धन-मृत्युश्च भवेत्।

किमाप्यमिति प्रश्ने विचारः

कुजार्कौ तनुगौ चौर्ये स्वर्णं रूप्यं सितोडुपौ।।

सरलं हेम सौम्येज्यौ लौहं च शनिदानवौ।।४।।

यदि सूर्यकुजौ लग्ने स्थितौ चेत् सुवर्णं शुक्रचन्द्रौ स्थितौ चेत् रूप्यं, बुधबृहस्पती स्थितौ चेत् रत्नसहितसुवर्णं, शनिराहू स्थितौ चेत् लौहं लभ्यतेति वक्तव्यम्।

उभौ तनौ तनौ सौख्यं चौर्ये न शुभयोगतः।।

चौर्यं स्यात्पापदृष्ट्या हि चौर्यसिद्धिर्न जायते।।५।।

यदि शनिशहुग्रहौ लग्ने स्थितौ चेत् चौर्यकार्ये शुभयोगः सिद्ध्येत्। तथैव लग्ने शुभग्रहस्य योगश्चेत् वा पापग्रहस्य दृष्टिश्चेत् चौर्यकार्ये सिद्धिः न भवेत्।

चौर्यधनचौरयोः स्थानादिलाभप्रश्ने विचारः

अष्टेश्वरे सप्तममृत्युयाते प्रष्टुर्न लाभो द्रविणस्य चौरात्।।

मृतीश्वरद्रव्यपतीत्तसाले नष्टं हृतं वस्तु हि लभ्यमेव।।१।।

अष्टमेश्वरग्रहः सप्तमे वा अष्टमे स्थितश्चेत् प्रष्टुः चोरात् धनलाभः न भवेत्। अष्टमेशस्तथा धनेशयोः इत्तसालयोगश्चेत् नष्टवस्तुनः, हृतवस्तुनश्च लाभो वदेत्।

वित्तलग्नेशयोः कर्माधीशयोश्च सुदृष्टितः।।

राजा गृण्हाति तद्द्रव्यं चौरं बध्वा बलेन हि।।२।।

धनेशाष्टमेशयोरुपरि दशमेशचतुर्थेशयोः शुभदृष्टिरस्ति चेत् राजा चोरं बध्वा बलेन धनं गृह्णीयात्।

धनेशे भानुलुप्तांशौ चौरो लभ्यो न तद्धनम्।।

किञ्चित्स मुदिते द्रव्यनाथे लभ्यधनं लघु।।३।।

धनेशः सूर्येण सह अस्ते स्थितश्चेत् चोरः लभ्यते। परन्तु धनं नैव प्राप्यते। यदि द्रव्येशः किञ्चित् उदिते सति किञ्चिद्धनं प्राप्यते।

कर्माष्टेशेत्तसालेन राजा चौरस्य पक्षकृत्।।

क्रूरेत्तसाले हिमगौ नूनं चौरो न चान्यथा।।४।।

दशमेशाष्टमेशयोः इत्तसालयोगश्चेत् राजा चोरस्य पक्षकृत् भवेत्। यदि चन्द्रः क्रूरग्रहेण सह इत्तसाले स्थितश्चेत् निश्चयेन चोरः भवेत् अन्यथा चेत् न भवेद्येव।

अलग्नेशदृष्टं धनं वोदयं चेत्खलाभेऽपि न स्यादवाप्तिः कदाचित्।।

तपोभ्रातृनाथेत्तसाले धनेशेऽन्यदेशे धनं चौरितं वा प्रनष्टम्।।५।।

द्वितीयगृहं वा लग्नो वा लग्नेशेन अदृष्टश्चेत् धनलाभादपि प्राप्तिः कदाचित् न स्यादेव। नवमेशेन वा तृतीयेशेन सह इत्तसालयोगे धनेशः भवेत्तर्हि चौर्यधनं वा प्रनष्टधनं वा विदेशं गतमिति वक्तव्यम्।

तपोभ्रातृसंस्थग्रहेणेत्तसाले धनेशेऽथवा धर्मदुश्चिक्यगते।।

विदेशे गतं तद्धनं वावलग्ने चरर्क्षे हिमांशौ तु यातोऽन्यदेशे।।६।।

नवमस्थ वा तृतीयस्थ ग्रहेण सह धनेशस्य इत्तसालं भवेत् वा धनेशो नवमे वा तृतीयगृहे स्थितश्चेत् तद्धनं विदेशं प्रति गतमिति वक्तव्यम्। अथवा लग्ने चरराशिगत चन्द्रः स्थितोऽपि अन्यदेशं गतमिति वक्तव्यम्।

वपुःसप्तनाथेत्तसाले तनौ चेद्गृहे स्यात्सचौरोऽथ केंद्रेऽस्तनाथे।।

पुरमिध्यगोऽथो तनौ चन्द्रभान्वोर्द्वयोर्वीक्षणात्तस्करः स्वीय एव।।७।।

लग्नेशसप्तमेशयोः इत्तसालं लग्ने भवेत्तर्हि चोरः गृहे एवास्ति। तथैव सप्तमेशः केन्द्रे स्थितश्चेत् पुरीमध्यभागे, लग्नौ सूर्यचन्द्रयोः दृष्टिरस्ति चेत् स्वजन एव चोर इति ज्ञेयम्।

तनौ चेद्रवेर्वा विधोर्वीक्षणेन बलिष्ठस्य चौरः समीपस्थितः स्यात्।।

यदा भानुपुत्रे स्मरेशे हिमांशोर्भवेद्वीक्षणं दम्भपाखण्डरूपी।।८।।

लग्नौ सूर्यस्य वा चन्द्रस्य दृष्टिरस्ति चेत् चोरः कस्यापि बलिष्ठपुरुषस्य समीपेऽस्तीति, यदि सप्तमेशशनैश्चरयोरुपरि चन्द्रस्य दृष्टिरस्ति चेत् स चोरः दम्भः पाखण्डरूपीति वक्तव्यम्।

नष्टं यस्य स मूर्तीशो नष्टात्मा चेन्दुभास्करौ।।

जायेशश्चौररूपः स्यादेभ्यः कुर्याद्विनिश्चयम्।।९।।

यस्य धनं प्रनष्टं जातं सो जनः लग्नेश इति, यद्वस्तु नष्टं जातं तौ सूर्यचन्द्राविति, स्पतमेशः चौररूपः इति निश्चयम् करणीयम्।

लग्नेशो मदने लग्ने वक्री जायेश्वरस्तदा।।

पुरस्थमपि यद्वस्तु हृतं नैवाप्यते कदा।।१०।।

लग्नेशः सप्तमगृहे तथा वक्री सप्तमेशो लग्ने स्थितश्चेत् हृतं वस्तु पुरस्थमपि केनापि प्रकारेणापि नैव लभ्येत।

लग्नेशः सखलः पश्येज्जायेशं धनपो बली।।

भानुचंद्रौ बलिष्ठौ चेत्तदा प्रत्यक्षचौरितम्।।११।।

यदि पापग्रहसहितो लग्नेशः सप्तमेशं पश्येत् तर्हि धनेशो सबलश्चेत्तथा सूर्यचन्द्रौ बलिष्ठौ चेत् तद्धनं प्रत्यक्षरूपेण चोरितमिति ज्ञेयम्।

सलग्ननाथः क्षीणेन्दुर्बली जायेश्वरोऽपि वा।।

लग्नेशादुर्बलश्चंद्रोऽज्ञेशयुक् स्वपुरो हृतम्।।१२।।

यदि क्षीणचन्द्रः लग्नेशेन युक्तश्चेत्, सप्तमेशः सबलश्चेत्, चन्द्रः लग्नेशाद्दुर्बलत्वं प्राप्य लग्नेशेन सह तिष्ठेत्तर्हि स्वपुरत एव धनं चोरितमिति विज्ञेयम्।

जायेशो भास्करान्मृत्यौ प्रत्यक्षं तद्धृतं धनम्।।

लग्नेशः सप्तमं नैव वीक्षते बलवान् विधुः।।१३।।

सप्तमेशः सूर्यदृष्टमे गृहे स्थितश्चेत् तद्धनं तत्पुरतः एव चोरितम् इति ज्ञेयम्। लग्नेशः सप्तमगृहं नैव वीक्षते तथा पापयुक्त चन्द्रः बलवान् चेत्।

सपापश्च तदा चौरैः प्रत्यक्षं चोरितं धनम्।।

सप्तेशेऽस्तं गते यद्वा केंद्रे चौरो मृतो भवेत्।।१४।।

चोरः तद्धनं प्रत्यक्षे चोरितमिति ज्ञेयम्। सप्तमेशः अस्तं गतश्चेत् तथा केन्द्रे स्थितश्चेत् चोरः मृत इति ज्ञेयम्।

चंद्रमेशो विधुं पश्यन्नष्टद्रव्याप्तिदो भवेत्।।

सप्तमे यदि पापः स्याद्वध्यश्चौरो नृपाज्ञया।।१५।।

चन्द्रस्य राशिपतिः चन्द्रं पश्येत्तर्हि नष्टद्रव्यस्य प्राप्तिर्भवेत्। यदि सप्तमगृहे पापग्रहः स्थितश्चेत् राजाज्ञया चोरः मृत इति ज्ञेयम्।

सप्तमे यदि शुभो न हृताप्तिश्चेद्बली हिमगुरुर्द्रुतमाप्तिः।।

चेत्कृशो द्रुतमवाप्तिकरश्चेदस्तगस्तनुपतिर्न हृताप्तिः।।१६।।

सप्तमगृहे यदि शुभग्रहः स्थितश्चेत् चौयर्धनं न प्राप्यते। यदि बलवान् चन्द्रश्चेत् शीघ्रमेव धनप्राप्तिः भवेत्। यदि चन्द्रः क्षीणश्चेदपि शीघ्रप्राप्तिरेव। यदि लग्नेशः सप्तमे स्थितश्चेत् हृतवस्तुनः प्राप्तिः न भवेद्येव।

लग्नेशो लग्नगो लग्नजायानायकयोर्युतिः।।

सूर्येन्दू स्वगृहांशे चेत्तदा चौरः स्वकेश्मनि।।१७।।

लग्नेशो लग्ने स्थितो वा लग्नेशसप्तमेशयोः योगश्चेत् तथा सूर्यचन्द्रौ स्वगृहस्य नवांशे स्थितौ चेत् चोरः स्वस्थाने स्यादिति ज्ञेयम्।

सप्तमेशो यदा तुंगे स्वामी चौरोऽथवाम्बिका।।

स्वांशत्रिंशांशकञ्यंशे स चेत्स्वीयो हरः स्मृतः।।१८।।

यदि सप्तमेशः उच्चस्याने स्थितश्चेत् स्वामी वा माता वा चोरस्स्यात्। यदि स एव सप्तमेशः स्वनवांशे वा त्रिंशांशे वा द्रेष्काणे स्थितश्चेत् स्वीय एव चोर इति विज्ञेयम्।

सप्तमेशोंऽगार्थरिः फेऽर्कः पिता दस्युः स चेद्विधुः।।

माता च भूमिजो भ्राता विच्चेन्मित्रं गुरुर्यदा।।१९।।

यदि सप्तमेशस्तथा सूर्यः लग्ने द्वितीये वा द्वादशगृहे स्थितौ चेत् पिता एव चोर इति, यदि सप्तमेशचन्द्रौ चेत् माता, कुजश्चेत् भ्राता, बुधश्चेत् मित्रम्, बृहस्पतिश्चेत्।

पुत्रो वा लौल्यतो वास्तुप्रधानो चौर्यकृद्यदा।।

भृगुश्चेत्स्त्री यदा मंदो दासी च स्वगृहे भवेत्।।२०।।

पुत्रो वा चाञ्चल्यवशाद् गृहस्वामी एव चोरः स्यात्। यदि शुक्रसप्तमेशौ चेत् स्त्री, शनैश्चरः चेत् स्वगृहदासी एव चौर्यं कृतवतीति विज्ञेयम्।

लग्नेन्दू चेच्छनिः पश्येच्चौरः पाखण्डरूपधृक्।।

गांधर्वस्तु भृगुश्चौरो विशेषोऽयमुदाहृतः।।२१।।

यदि लग्नचन्द्रौ शनैश्चरेण दृष्टौ चेत् पाखण्डरूपधारी चोर इति, शुक्रः पश्येत्तर्हि गायकः चोर इति ज्ञेयः।

तदा वध्वा हृतं द्रव्यं जायेशो यदि सप्तमे।।

स्मरे भानौ भृगौ वापि पिता चौरो गुरौ गृहेट्।।२२।।

यदि सप्तमेशः सप्तमे गृहे स्थितश्चेत् वध्वा धनमपहृतमिति विज्ञेयम्। सप्तमे सूर्यो वा शुक्रश्चेत् पिता चोर इति, बृहस्पतिश्चेत् गृहस्वामी चोर इति भाव्यम्।

मंदो दासी बुधे स्वीयः कुजो पुत्रोऽथवानुजः।।

सप्तमे न ग्रहश्चेत्स्यात्तनौ पूर्णविधौ परः।।२३।।

शनिश्चेत् दासी, बुधश्चेत् स्वयमेव, कुजश्चेत् पुत्रो वा कनिष्ठसोदरः इति ज्ञेयः। यदि सप्तमे गृहे कोऽपि ग्रहः न भवेत्तर्हि तथा लग्ने पूर्णचन्द्रः स्थितश्चेत् परपुरुषः चोर इति ज्ञेयम्।

मेषे तनौ द्विजश्चौरो वृषे क्षत्री नृयुग्मके।।

वैश्यः कर्के च शूद्रश्च सिंहे नीचः स्त्रियां वधूः।।२४।।

मेषलग्नश्चेत् ब्राह्मणः, वृषश्चेत् क्षत्रियः मिथुनञ्चेत् वैश्यः, कर्कश्चेत् शूद्रः, सिंहश्चेत् नीचः, कन्या चेत् वधू।

तुलायां पुत्रमित्रानुजाताश्चालौ हि सेवकः।।

चापे भ्रातास्त्रियो वापि मत्स्ये वारांगना घटे।।२५।।

तुला चेत् पुत्रो वा मित्रं वा कनिष्ठभ्राता इति, वृश्चिकश्चेत् सेवकः, धनुश्चेत् भ्राता, मकरश्चेत् स्त्री, कुम्भश्चेत् वराङ्गना।

मूषको मीनभे भूमिस्त्वङ्गे क्षीणोऽस्ति तल्लवे।।

चौरस्य कर्ममृतिपादाकारं स्मरपाद्वदेत्।।२६।।

मीनश्चेत् मूषकः इति विज्ञेयः। यदि लग्नस्तथा लग्नस्य नवांशः निर्बलौ चेत् भूमिचोरः इति ज्ञेयः। अष्टमेशात् चोरकर्म तथा सप्तमेशात् चोरस्य आकारः विज्ञायते।

एकद्वारं स्थिरे चंद्रे यत्र चौरोऽस्ति तद्दिशि।।

लग्नतश्चंद्रमा यत्र तत्र चौरगृहं वदेत्।।२७।।

यदि चन्द्रः स्थिरराशिगतश्चेत् चोरः यस्याम् दिशायां निवसेत् तस्यां दिशायां चोरगृहस्य एकद्वारमेव भवेत्। तथैव लग्नात् चन्द्रः यस्यां दिशायां भवेत् तत्रैव चोरगृहं वदेत्।

एकद्वारं स्थिरे चंद्रे द्यंगे द्वारद्वयं भवेत्।।

लग्नं प्राचीखभं याम्या सुखं सौम्यांऽगना परा।।२८।।

स्थिरराशिगत चन्द्रश्चेत् एकद्वारगृहं, द्विस्वभावशशिगतश्चेत् द्विद्वारगृहं चोरस्य भवेत् लग्नं पूर्वदिशा, दशमगृहं दक्षिणं, चतुर्थम् उत्तरं तथा सप्तमं पश्चिमदिशा भवेत्।

चरेऽम्बुनि चलं वस्तु स्थिरे भूमौ द्विदेहके।।

तिर्यक् मञ्चादिके वोच्चैः चंद्रे दृष्ट्यानुमानतः।।२९।।

यदि चरराशिगत चन्द्रश्चेत् जले चलवस्तुरिति, स्थिरराशिगतश्चेत् पृथिव्यां चलवस्तुरिति, द्विस्वभावराशिगतश्चेत् तिर्यग्स्थाने चलवस्तुरिति, उच्चस्थानगत चन्द्रश्चेत् उच्चमञ्चे स्यापितवस्तुरिति ज्ञेयम्। दृष्ट्यानुमानतः कथनावसरे पृच्छकः उपरिदृष्ट्या प्रश्नकरणात् उच्चस्थानमिति, नीचदृष्ट्या प्रश्नकरणात् नीचस्थानमिति समानदृष्ट्या प्रश्नकरणात् गृहमध्ये स्थापितमिति ज्ञेयम्।

यदा चौरग्रहो राशिं विहाय च परं व्रजेत्।।

तदैव स्वपुराद्याति मार्गं ब्रूयादिहांशकात्।।३०।।

चोरस्य ग्रहः राशिं परित्यज्य द्वितीयस्थाने यदा गच्छेत्, तदैव चोरः स्वपुरात् बहिर्गत इति तस्य मार्गः नवांशात् वक्तव्यः।

लग्नेशो वक्रगो भूत्वा यदा राशिं समुत्सृजेत्।।

तदा नूनं समायाति चौर्यकृत्स्वपुरं प्रति।।३१।।

लग्नेशः वक्री भूत्वा यस्मिन् समये राशिं त्यज्येत् तस्मिन्नेव समये चोरः स्वपुरं प्रत्यागच्छेत्।

मंदे सप्तमगे चौरो रुद्धो वा पीडितो भवेत्।।

स्थिरे तत्र चिरं रोगी तत्राष्टेशे मृतिर्भवेत्।।३२।।

यदि शनिग्रहः सप्तमे स्थितश्चेत् चोरः रुद्धो वा पीडित इति विज्ञेयः। सप्तमगृहे स्थिरराशिश्चेत् चोरः बहुकालात् रुग्ण इति, सप्तमगृहे अष्टमेशश्चेत् चोरः मृत इति विज्ञेयः।

यदा सप्तपतिः सिंहे चौर एको यदा झषे।।

मिथुने च तदा चौरा बहवोऽथ स्थिरर्क्षगे।।३३।।

यदि सप्तमेशः सिंहराशौ स्थितश्चेत् एकः, मीनो वा मिथुनराशौ स्थितश्चेत् चोराः अधिका इति विज्ञेयः। स्वल्पसन्तानस्थिरराशौ।

खल्पापत्ये भवेदेको द्यंशे चौरा बहुप्रजे।।

चरे ग्रामान्तरं यातः स्थिरे देशे द्विदेहभे।।३४।।

सप्तमेशश्चेत् चोरः एक इति, बहुसान्तानवती, द्विस्वभावराशौ स्थितश्चेत् चोराः असंख्याकाः इति विज्ञेयाः। यदि चरराशौ सप्तमेशः स्थितश्चेत् चोरः ग्रामान्तरं गतवानिति, स्थिरराशौ स्थितश्चेत् देशेऽस्तीति द्विस्वभावराशौ स्थितश्चेत्।

मार्गे चौरोऽथ सप्तेशे स्त्रीखेटे सप्तमस्थिते।।

स्त्रीग्रहैर्वीक्षिते स्त्री स्याद्बुधभृग्वोर्हि गुर्विणी।।३५।।

मार्गे चोरः इति ज्ञेयः। यदि सप्तमेशः स्त्रीग्रहस्य सप्तमगृहे स्थितश्चेत् तथा स्त्रीग्रहेण दृष्टश्चेत् स्त्रिया चौर्यं कृतमिति, बुधशुक्रौ चेत् गर्भवती स्त्री चौर्यं कृतवीति विज्ञेयम्।

यदि गुरुरधिपुत्री चेच्छनिर्वृद्धनारी यदि समुदितमंदोऽती व वृद्धा कुजश्चेत्।।
वयसि भवति मध्या चेद्विधुर्लग्नयातो न भवति हि विशेषोऽयं फलार्हः कदाचित्।।३६।।

बृहस्पतिरस्ति चेत् ज्येष्ठपुत्री, शनिश्चेत् वृद्धास्त्री इति, यदि शनिरुदितश्चेत् अतिवृद्धास्त्री, कुजश्चेत् मध्यमावस्था स्त्री इति कथ्यते। परन्तु यो चन्द्रः लग्ने स्थितश्चेत् विशेषरूपेण फलस्य योग्यं कदापि नैव स्यात्, अर्थात् अनेन कथनेन फलं नैव वक्तव्यम्।

अथ तनुनवभागान्मूकवद्वस्तुसंज्ञां तनुतनुपबलीयो वर्णतांगाधिनाथे अबलिनि
सुषिरत्वं सद्बलेऽन्तर्बलित्वं जितगतकरनीचेऽश्मानता वस्तुनः स्यात्।।३७।।

अधुना लग्नस्य नवांशात् मूकप्रश्नसदृशी वस्तुसंज्ञा वक्तव्या। तथैव लग्ने, लग्नेशे यो बलवान्, तस्मात् वस्तुनः वर्णं वक्तव्यम्। यदि लग्नेशो निर्बलश्चेत् वस्तुनः सुषिरता, लग्नेशः पूर्णबलवान् चेत् वस्तुनः सारावलीति, यदि लग्नेशः केनापि ग्रहेण पराजितो वा अस्तङ्गतो वा नीचश्चेत् वस्तुनः कठोरता वदेत्।

तनुनवांशभतो लघुमध्यदीर्घसदृशं च ततोंऽगलवेशिनः।।
नियमतोस्तमितिश्च तनोर्दृकाणत उ चौर्यकरोऽथ तनोर्भृतः।।
भवति चौरकदेशदिशोंगपाद्वरवयोमितिजातिगुणाः स्मृताः।।३८।।

लग्ननवांशस्य राशितः वस्तुनः लघु – मध्य – दीर्घ – सदृशं च वदेत्। तथैव लग्नस्य नवांशपतेः नियमात् वस्तुनः कोणसङ्ज्ञा तथा लग्नस्य द्रेष्काणात् चोरस्य लग्नस्य राशितः चोरस्य देशदिशा तथैव लग्नेशात् चोरस्य अवस्था, जाति, गुणञ्च उच्चते।

मेषस्य पूर्वत्रिलवेऽरुणाक्षो ना रौद्रशस्त्री द्वितये वधूश्च।।
कुम्भोदरी दीर्घमुखी च रक्तवस्त्रा तृतीये कपिलश्च दण्डी।।३९।।

मेषस्य प्रथमद्रेष्काणे भयानकशस्त्रधारी, रक्तवर्णयुक्तः पुरुषः, द्वितीयद्रेष्काणे अश्वसदृशोदरी, दीर्घमुखी, रक्तवर्णधारिणी, तृतीयद्रेष्काणे कपिलवर्णः, दण्डधारी।

रक्तांबरो नाऽथ वृषस्य पूर्वे वधूर्द्वितीये पशुवन्नरोऽन्त्ये।।
बृहत्तनुर्ना मिथुनस्य पूर्वे रजस्वला भूषणकार्यदक्षा।।४०।।

रक्तवर्णपुरुषः इति वक्तव्यः। वृषस्य प्रथमद्रेष्काणे स्त्री, द्वितीयद्रेष्काणे नरः, तृतीयद्रेष्काणे बृहच्छरीरी पुरुषः इति वक्तव्यः। मिथुनस्य प्रथमद्रेष्काणे रजस्वला, भूषणयुक्ता तथा कार्यकुशली।

अनुप्रजालज्जितरूपिणी च द्वितीय उद्यानगतो धनुष्मान्।।
नरस्तृतीये सुमतिः सुरङ्गी धन्वी नरो कर्कटकस्य पूर्वे।।४१।।

अनुप्रजा, लज्जावती, रूपिणी स्त्री इति, द्वितीयद्रेष्काणे उद्यानवनस्य धनुर्धारी पुरुषः, तृतीयद्रेष्काणे सुन्दरः, बुद्धिमान् पण्डितः, सुरत्नी, धनुर्धारीपुरुषः इति विज्ञेयः। कर्कस्य प्रथमद्रेष्काणे।

मातंगकायः पुरुषश्च कोलाननो द्वितीये रुदती हि नारी।।

सुकर्कशा वै त्रितये प्लवस्थः सपीवृतो ना चिपिटास्यभूषी।।४२।।

पुरुषस्य गजसदृशकायः सूकरसदृशमुखं, द्वितीयद्रेष्काणे रुदती, कर्कशानारी, तृतीयद्रेष्काणे प्लवस्थः, सर्पावृतः, आभूषणसहितः चिपिटास्यपुरुषः इति वक्तव्यः।

सिंहस्य पूर्वे हरिगृद्धपूर्वग्राही द्विके धन्विनताग्रनासः।।

तृतीयके त्वक्षमुखश्च दण्डी कूर्ची च वक्रांगरुहः कुमार्याः।।४३।।

सिंहस्य प्रथमद्रेष्काणे वानरगृधग्राहकपुरुषः द्वितीयद्रेष्काणे धनुर्धारीपुरुषः, नताग्रनासपुरुषः, तृतीयद्रेष्काणे त्वक्षसदृशमुखः, दण्डधारी, उच्चकूर्चीपुरुषः वक्रकेशी पुरुषो भवेत्। कन्यायाः

पुरान्त्ययोः स्त्री विवरे सरोमा श्यामो धनुष्मान् धृतलेखको ना।।

तुलस्य पूर्वे नव आपणस्थस्तुलाभृदन्तक्षुधितस्तृषार्त्तः।।४४।।

प्रथमे तृतीयद्रेष्काणे च स्त्री, द्वितीयद्रेष्काणे रोमयुक्तपुरुषः, धनुर्धारी, लेखको पुरुषः भवेत्। तुलायाः प्रथमद्रेष्काणे नवावस्थापुरुषः, आपणस्थपुरुषः, तुलाधारणपुरुष, क्षुत्पिपासापीडितपुरुष इति वक्तव्यः।

तृतीयके किन्नररवच्च रौद्रो वनेचरो ना युधभृत्सुरत्नः।।

अलौ पुरा भूषणवस्त्रहीना मनोरमा सर्पनिबद्धपादा।।४५।।

तृतीयद्रेष्काणे किन्नरसदृशशरीरधारी, भयानकः वनचरः, आयुधधरः, सुन्दररत्नालङ्कृतः पुरुषः इति वदेत्। वृश्चिकस्य प्रथमद्रेष्काणे भूषणवस्त्रहीना, सर्पनिबद्धपादा, सुन्दरस्त्री इति वदेत्।

द्वितीयके कच्छपकुम्भकाया सर्पावृता स्त्री त्रितये ह्रदार्थी।।

श्वकोलपादश्चिपिटाननोना हयस्य पूर्वे च धनुर्धरो ना।।४६।।

द्वितीयद्रेष्काणे कच्छपकुम्भसदृशपुरुषः, सर्पावृतास्त्री इति वदेत्। तृतीयद्रेष्काणे ह्रदार्थी, शुनकशूकरसदृश पादसहितः, चिपिटाननपुरुषः इति वदेत्। धनोः प्रथमद्रेष्काणे धनुर्धारीपुरुषः भवेत्।

द्वितीयके रत्नधरा मनोज्ञा हेमाभवर्णा त्रितये च कूर्ची।।

दण्डी च पट्टांबरचर्मधारी मत्स्यस्य पूर्वे मकराभदृष्टः।।४७।।

द्वितीयद्रेष्काणे स्वर्णसदृशवर्णा सुन्दरस्त्री, तृतीयद्रेष्काणे कूर्ची, दण्डी च उज्ज्वलवस्त्रधारी चर्मधारीपुरुषः भवति। मकरस्य प्रथमद्रेष्काणे मकराभ इव हश्यमानः।

रोमान्वितो रौद्रमुखो द्वितीये श्यामा सुरूपारुणवस्त्रभृत्स्त्री।।

तृतीयके कंबलतूणचापी दीर्घाननो ना कलशस्य पूर्वे।।४८।।

रोमयुक्तः भयानकमुखः पुरुषः भवति। द्वितीयद्रेष्काणे श्यामशरीरधारिणी, सुरूपा, रक्तवस्त्रधारिणी स्त्री भवति। तृतीयद्रेष्काणे कम्बलतूणचापी पुरुषः दीर्घाननः च भवति। कुम्भस्य प्रथमद्रेष्काणे।

गृद्धाननः कंबलभृद्वितीये स्त्री रक्तवस्त्रा त्रितयेऽतिकृष्णः।।

सरोमकर्णस्तु झषस्य पूर्वे नौस्थो नरो मौक्तिकशंखरत्नी।।

मध्येऽथ गौरा रमणी तृतीये नग्नोऽहिभृन्नेति दृकाणरूपम्।।४९।।

गृद्धास्यः कम्बलधारी पुरुषः भवति। द्वितीयद्रेष्काणे रक्तवर्णधारिणी स्त्री, तृतीयद्रेष्काणे अतिकृष्णवर्णी, सरोमकर्णी पुरुषः भवति। मीनस्य प्रथमद्रेष्काणे नौस्थः, मौक्तिकशङ्खरत्नभूषितपुरुषः, द्वितीयद्रेष्काणे गौरवर्णरमणी, तृतीयद्रेष्काणे नग्ना स्त्री, सर्पधारी पुरुषश्च भवतः। एतानि सर्वाणि द्रेष्काणस्य रूपाणीति कथ्यन्ते।

अजेऽजभूमौ गवि गोकुलादौ युग्मे श्मशाने इण्गीतभूम्योः।।

कर्केऽम्बुपार्श्वे च हरौ वने च स्त्रियांध्रुवे तौलिनि पण्यदेशे।।५०।।

मेषराशौ अजस्थापनप्रदेशः, वृषराशौ गवां प्रदेशः, मिथुनराशौ श्मशानभूमिः, मृगगीतभूमिश्च, कर्कराशौ जलसमीपप्रदेशः, सिंहराशौ वनभूमिः, कन्याराशौ नौकास्थानं तुलायां आपणप्रदेशः।

अलौ बिलान्तश्च हयेऽश्वगेहे मृगेऽम्बुभूधीवरपूर्वदेशे।।

घटे कुलालादिगृहे घटाम्बुपार्श्वे च मीनेऽम्बुजलाशयादौ।।५१।।

वृश्चिके बिलान्तभूमिः, धनुराशौ अखगेहम्, मकरराशौ जलसमीपप्रदेशो वा धीवराणां गृहं, कुम्भे कुलालगृहं, घटाम्बुसमीपप्रदेशः, मीनराशौ जलाशयादि प्रदेशः।

यद्वा स्त्रियां क्षेत्रभूमौ नृभे नानागृहे भुवि।।

चतुष्पदेऽश्वशालादौ जलर्क्षेऽभः स्थले भवेत्।।५२।।

अथवा स्त्रीसंज्ञकराशिषु क्षेत्रभूमिस्तथा पुरुषसंज्ञकराशिषु अनेकप्रकारक गृहाणि, भूमिः तथा चतुष्पादसंज्ञकराशिषु अश्वशालादि, जलचरराशिषु जल – स्थल – चोरादीनां स्थानं वदेत्।

रवौ सुखे स्वशय्यायां चंद्रेऽम्भसि च भूसुते।।

गोपुस्तयोः पदे सौम्ये चित्रशाल्यां गुरौ वने।।५३।।

यदि सूर्यः चतुर्थगृहे स्थितश्चेत् स्वशय्यायां, चन्द्रश्चेत् जले, कुजश्चेत् गोपुस्तयोः पदे, बुधश्चेत् चित्रशालायां, बृहस्पतिश्चेत् वने।

देवालये वा शुक्रे स्त्रीशय्यायां रविनंदने।।

प्रान्ते तमोमये स्थाने गेहे ज्ञाते वदेदिति।।५४।।

वा देवालये, शुक्रश्चेत् स्त्रीशय्यायां, शनिश्चेत् अन्धकारमयगृहमूले इति वक्तव्यम्। फलमेतद् गृहं सम्यक् विज्ञाय वक्तव्यम्।

प्रथमांशे विधौ मेषे घटितं स्वर्णरूप्यवत्।।

तत्रेज्यशुक्रदृष्टिश्चेद्रत्नमापणगं वदेत्।।५५।।

यदि मेषस्थ चन्द्रः मेषस्य प्रथमनवांशे स्थितश्चेत् स्वर्णरूप्यनिर्मितवस्तु तथा तस्मिन् चन्द्रे शुक्रबृहपतीनां दृष्टिरस्ति चेत् आपणरत्नमिति वक्तव्यम्।

वर्गोत्तमे वृषे चंद्रेऽलंकारं भौमवीक्षिते।।

अयोऽतीचाखदृष्टे जीर्णं मिथुनगे विधौ।।५६।।

वृषस्थ चन्द्रः वर्गोत्तमनवांशे स्थितश्चेत् अलङ्कारं, कुजः वीक्षिते चेत् अयः इति, अतीचारीग्रहेण दृष्टश्चेत् जीर्णवस्तुरिति, मिथुनस्थ चन्द्रः वर्गोत्तमनवांशे स्थितश्चेत्।

वर्गोत्तमेंऽबुजं वस्तु कर्के वर्गोत्तमे विधौ।।

सुवर्णमेवं सिंहेन्दौ रौप्यं स्वर्णं रवीक्षिते।।५७।।

जलोत्पन्न वस्तु, कर्कस्थ चन्द्रः वर्गोत्तमनवांशे स्थितश्चेत् स्वर्णस्तथा सिंहस्थ चन्द्रः वर्गोत्तमनवांशे स्थितश्चेत् रूप्यं, सूर्यः वीक्षिते चेत् सुवर्णं

कन्येन्दौ कांस्यलोहादि पाषाणं बुधवीक्षिते।।

केवलस्य भृगौर्दृष्ट्या वस्त्रं चंद्रे तुलास्थिते।।५८।।

कन्यागत चन्द्रश्चेत् कांस्यलोहादि, बुधः वीक्षिते चेत् पाषाणं, केवलः शुक्रः वीक्षिते चेत् वस्त्रं, तुलायाः चन्द्रश्चेत्।

तौल्यं वस्तु भृगोर्दृष्ट्या वदेद्वा गन्धवाससी।।

वृश्चिके कुजदृष्ट्या हि स्वर्णं रौप्यं धनुर्धरे।।५९।।

जीवेक्षिते भवेद्रत्नं मृगेन्दौ स्वल्पभास्करम्।

जीवेक्षिते सुवर्णाद्यं कुंभे मुद्रा रवीक्षिते।।६०।।

तौल्यं वस्तु, शुक्रः वीक्षिते चेत् गन्धं, वस्त्रं, वृश्चिकस्थ चन्द्रः स्थितस्तथा कुजो वीक्षिते चेत् सुवर्णरूप्यमिति वक्तव्यम्। धनस्य चन्द्रः बृहस्पतिना दृष्टश्चेत् रत्नं, मकरगतश्चेत् किञ्चित् प्रकाशमानं रत्नं तथा बृहस्पतिः वीक्षिते तर्हि सुवर्णादिकं, कुम्भगतः चन्द्रः सूर्येण दृष्टश्चेत् मुद्रा।

मीने काचादिवज्जीववीक्षिते मौक्तिकं हृतम्।।

लग्ने सूर्येक्षिते घस्रे चेन्दुदृष्टे हृतं निशि।।

द्वादशेन्दौ हृतं भुक्तं निर्बले शेषमल्पकम्।।६१।।

मीनगतश्चेत् काचादिवस्तु, बृहस्पतिः वीक्षिते तर्हि मौक्तिकं हृतमिति वक्तव्यम्। यदि लग्नः सूर्येण दृष्टश्चेत् दिने, चन्द्रेण दृष्टश्चेत् रात्रौ चौर्यं जातमिति वक्तव्यम्। द्वादशस्थाने चन्द्रश्चेत् चौर्यवस्तु भुक्तमिति तथैव निर्बलचन्द्रश्चेत् शेषमल्पकम् इति ज्ञेयम्।

अथ नामबन्धः

द्व्यक्षरं तनुगते चरभांशे त्र्यक्षरं स्थिरलवेऽस्ति च नाम।।

नामयुग्ममुभयाङ्गलवे पंचत्रिवर्णमु दलक्रमतो वा।।१।।

यदि लग्ने चरराशिस्थ नवांशोऽस्ति चेत् अक्षरद्वयं तथा स्थिरराशिस्थ नवांशोऽस्ति चेत् अक्षरत्रयं, द्विस्वभावराशिस्थ नवांशोऽस्ति चेत् नाम्नः युग्माक्षराणि, अथवा दलक्रमात् नाम्नः पञ्चवर्णाः तथा त्रिवर्णाः वक्तव्याः अर्थात् लग्नस्य पूर्वदलञ्चेत् पञ्चवर्णाः, परदलञ्चेत् त्रिवर्णाः ज्ञेयाः।

द्विस्वभावलवे शुभदृष्टे स्यादृकाणागत्तिरेव यदेष्टा।।

तां ब्रवीमि विशदां बुधतुष्ट्यै सज्जनाः शृणुत नामविधाने।।२।।

यदि द्विस्वभावराशिस्थ नवांशो शुभग्रहेण दृष्टस्तथा द्रेष्काणस्य गतिरिष्टा चेत् नामविधाने तस्य द्रेष्काणस्य विशदां पण्डिताः सन्तेषेण स्पष्टरूपेण एवं कथयन्ति – हे सज्जनपुरुषाः। श्रुण्वन्तु इति।

ओजर्क्षे तनुगे त्रिपंचकनगा वर्णा दृकाणक्रमात्।

युग्मे द्व्यब्धिरसाश्च तेऽपि बलिसदृष्टा व्रजेयुश्च यम्।।

तत्रोजे विषमाः समाश्च समभे यद्वा स्ववर्णान्विते।

लग्ने स्वेशदृशैकवर्ण इति नाम्नो मात्रिकान्यो भवेत्।।३।।

यदि विषमलग्नश्चेत् द्रेष्काणस्य क्रमात् त्रिपञ्चसप्तवर्णाः तथैव समलग्नश्चेत् द्रेष्काणक्रमात् २/४/६ वर्णाः नाम्नि ज्ञातव्याः। यदि उक्तः द्रेष्काणः सबलः शुभग्रहैः दृष्टश्चेत् उक्त वर्णाः बहुलतां प्राप्नुवन्ति। तत्र विषमराशिश्चेत् विषमः समराशिश्चेत् समवर्णाः अधिकाः भवेयुः। अथवा स्वस्य वर्गात् युक्तलग्ने लग्नेशस्य दृष्टिरस्ति चेत् मात्रा भवेत्। अन्ते यस्य नाम्नः एकाक्षरं भवेत्।

अवर्गेशो भानुः कुजभृगुबुधेज्यार्कतनयाः कचादीनामीशाः परलवमुखक्षान्तमु पतिः।।
विधुर्लग्नाम्बुस्त्रीदशनवलवाद्यक्षरयुतेः क्रमाद्वर्णानाम्नोऽक्षरबहुलतायां पुनरिति।।४।।

अवर्गस्य ईशः सूर्यस्तथा कवर्गस्य चवर्गादीनां स्वामिनः कुज – शुक्रः बुध – बृहस्पति – शनैश्चराः क्रमेणोच्यन्ते। तथैव यरलवात् आरभ्य क्षकारपर्यन्तं अर्थात् यरलवशषसहाक्षराणां पतिः चन्द्रो भवति। लग्नस्य चतुर्थ – सप्तम – दशमगृहाणां नवांशस्य आद्यक्षरं क्रमेण योजनेन नामवर्णाः भवन्ति। तथैव नाम्नः अधिकाक्षराणि भवन्ति चेत् तथापि नवांशानां वर्णः भवेत्।

नवांशवर्णाः

एतद्वर्णोपपत्तिः प्रस्तारतो वा रज्जुवेधतो द्रष्टव्या
नवांशाक्षराग्रेंऽकाः वर्गाक्षरसंख्यासूचकाः।।

एतेषां वर्णानामुपपत्तिः प्रस्तारतो वा रज्जुवेधतो वा द्रष्टव्या। तथैव निम्नलिखितचक्रे नवांशाक्षराणामग्रे योऽङ्कः अस्ति सो वर्गाक्षराणां संख्यासूचको भवति।

स्पष्टार्थचक्रम्

नवांशः	प्रथम नवांश अक्षराणि	द्वितीय नवांश अक्षराणि	तृतीय नवांश अक्षराणि	चतुर्थ नवांश अक्षराणि	पञ्चम नवांश अक्षराणि	षष्ठ नवांश अक्षराणि	सप्तम नवांश अक्षराणि	अष्टम नवांश अक्षराणि	नवम नवांश अक्षराणि
मेषः	क-१	च-१	ट-१	य-१	अ-१	ठ-२	छ-२	ख-२	त-१
वृषभः	प-१	फ-२	थ-२	ग-३	ज-१	ड-३	र-२	?-२	ढ-४
मिथुनः	झ-४	घ-४	द-३	ब-३	भ-१	ध-४	ङ-५	ञ-५	ण-५
कर्कः	ल-३	इ-३	ट-१	च-३	क-१	न-५	म-५	प-१	त-१
सिंहः	ख-२	छ-२	ठ-२	ब-३	ई-४	ड-३	ज-३	ग-३	थ-२

कन्या	फ-२	ब-३	द-३	घ-४	झ-४	ढ-४	श-१	उ-३	ण-५
तुला	ञ-५	ङ-५	ध-४	भ-४	म-५	न-५	क-१	च-१	ट-१
वृश्चकः	ष-२	उ-५	ठ-२	छ-२	ख-२	त-१	प-१	फ-२	थ-२
धनुः	ग-३	ज-३	ड-३	स-३	अ-६	ढ-४	झ-४	घ-४	द-३
मकरः	ब-३	भ-४	घ-४	इ-५	ञ-५	ण-५	ह-४	ए-७	ट-१
कुम्भः	च-१	क-१	न-५	म-५	प-१	त-१	ख-२	छ-२	ठ-२
मीनः	य-१	ऐ-८	ड-३	ज-३	ग-३	थ-२	फ-२	ब-३	द-३

नवांशवर्णाः

नामानि चाग्न्यम्बुकुमारविष्णुशक्रेन्द्रपत्नीचतुराननानाम्।।

तुल्यानि भानुक्रमतो विचिन्त्य द्वित्र्यादिवर्णैर्घटयेत्सुबुद्ध्या।।५।।

सूर्यस्य क्रमात् अग्नि – जल – कुमार – विष्णु – इन्द्र – इन्द्राणी – ब्रह्म एतेषां नाम विचिन्त्य द्वित्र्यादिवर्णैः सद्बुद्ध्या नाम घटयेत्।

अथ विशेषः

केद्रांशराशौ हि खलस्तदंशवर्णं हरेत्तत्र बली शुभश्चेत्।।

दृष्टः शुभैः स्वांशसमानवर्णं ददाति चेदक्षरदः स्वभोच्चैः।।

स्वभाक्षरं द्विः प्रकारोति चोज ओजाक्षरं तत्र समे समं च।।६।।

यदि केन्द्रस्य नवाशराशौ पापग्रहोऽस्ति चेत् तस्य नवांशस्य वर्णं हरेत्। तथैव केन्द्रांशराशौ यो शुभग्रहः शुभग्रहेण दृष्टश्चेत् स्वनवांशतुल्यवर्णं ददाति।

यदि अक्षरदः ग्रहः स्वोच्चराशिगतश्चेत् स्वराशिस्थाक्षरं द्वित्वं करोति। यदि विषमराशिगतश्चेत् विषमस्तथा समराशिश्चेत् समाक्षरं द्वित्वं कुर्यात्।

पश्यत्स्थितः केंद्रलवात्मजेषु स्वोच्चे स्वभे वाक्षरदो द्विरुक्तः।।

संयोगमादौ बहुलेषु विन्द्यात्कूटेषु संयोगपरं वदन्ति।।७।।

यदि अक्षरदाताग्रहः स्वोच्चराशौ वा स्वराशिगतः केन्द्रे पञ्चनवांशाभ्यां वीक्षते तर्हि अथवा तथोर्मध्ये स्थितश्चेत् अक्षरद्वयं ददाति। अधिकाक्षराणि भवन्ति चेत् आदौ संयोगः, अल्पाक्षराणि भवन्ति चेत् अन्ते संयोगः इति विज्ञेयः।

अथ मात्रानिश्चयः

केंद्रत्रिकोणेषु शुभो बलीयान् शीर्षोदये शीर्षगतास्ति मात्रा।।

पृष्ठोदये चेत्तलवर्त्तिनी स्यात्पार्श्वानुगा चोभयराशिभागे।।८।।

सबलः शुभग्रहः केन्द्रे वा त्रिकोणे पृष्ठोदयराशिगतश्चेत् अक्षेर शिरोमात्रा तथैव पृष्ठोदयराशिगतश्चेत् अधोमात्रा, उभयोदयराशिगतश्चेत् अक्षरस्य पार्खे मात्रा इति विज्ञेया।

शीर्षोदयमात्राः ए ओ अं पृष्ठोदयमात्राः उ ऊ

उभयोदयमात्राः अइ इमा लघवः एतत्सवर्णा दीर्घाः।।८।।

शीर्षोदयमात्राः ए, ओ, अम्, इति, पृष्ठोदयमात्राः उ, ऊ इति, उभयोदयमात्राः अ, इ इति वक्तव्याः। एतान्यक्षराणि सर्वाणि लघवः, सवर्णदीर्घाः इति विज्ञेयाः।

ओजे दृकाणे विषमाः समे च समाः स्युरिष्टो यद दीर्घराशौ।।

दीर्घाऽन्यथान्या च खलास्त्रिकोणे मात्राहरा भांशपतौ बलोने।।९।।

विषमद्रेष्काणे स्थितश्चेत् विषममात्राः, समद्रेष्काणे स्थितश्चेत् सममात्राः भवन्ति। यदि इष्टदीर्घराशिगतश्चेत् दीर्घमात्राः, ह्रस्वगतश्चेत् ह्रस्वमात्राः भवन्ति। यदि पापग्रहः त्रिकोणे स्थितश्चेत् मात्राहरा तथैव यो राशिनवांशेशः निर्बली इव नवांशे स्थितश्चेत्

अंशे हि मात्रा निधनं तु नो चेदृष्टः स्वभोच्चादि तदंशपेन।।

मात्राक्षरं नश्यति हीनवीर्यै क्षेत्रे च स्वस्यांशपतौ च सत्यम्।।१०।।

मात्रायाः नाशको भवेत्। यदि स्वोच्चादिपतिर्वा नवांशपतिग्रहेण दृष्टश्चेत् मात्रानाशको नैव भवेत् अन्यथा चेत् नाश एव। यदि नवांशपतिः हीनवीर्यस्सन् स्वक्षेत्रे स्थितश्चेत् अं।

अयंबुचारी सबलो दशस्थोऽनुस्वारदः सप्तमगो विसर्गम्।।
ददाति केचिद्बलिकेंद्रराशेर्मात्रा वदन्त्येव तदीशभाद्वा।।
मृगादयः षट् लघवः परे च दीर्घाः प्रयोज्याः किल नामबन्धौ।।११।।

तथा सबलः इव चतुर्थगृहे स्थितश्चेत् ए, दशमगृहे स्थितश्चेत् अनुस्वारः, सप्तमगृहे चेत् विसर्गः ददाति। यः कोऽपि ज्योतिर्विद् सबलः केन्द्रस्य राशितः वा तस्य स्वामिग्रहात् मात्रावर्णनं करोति। मकारात् षष्ठमराशिस्थ चेत् लघुं शेषात् दीर्घमात्रा नामबन्धे योजनीया।

चौरमोक्षप्रश्ने विचारः

स्थिरर्क्षेऽल्पभुक्तौ शनौ गुप्तिगः स्याच्चिरं तस्करोऽथाष्टमे भौमशन्योः।।
गृहे भौमयुक्तेक्षिते तस्य मृत्युः कुजार्कीत्तसाले स सन्ताड्यतेऽलम्।।१।।

यदि स्थिरराशिगतस्य शनैश्चरस्य केचिदंशाः निर्गताः चेत् चोरः चिरकालं गुप्त्यास्पदे द्वारपालकरूपेण कार्यं करोतीति ज्ञेयम्। यदि अष्टमगृहे कुजशनैश्चर्योः राशिः कुजेन दृष्टयुक्तश्चेत् चोरस्य मृत्युर्भवेत्। तथैव कुजशनैश्चर्योः इत्तसालयोगश्चेत् चोरः सन्ताड्यते।

मृतीशस्य दृष्ट्या स सन्ताड्यमानो मृतिं याति गुप्त्यास्पदे वस्तुचौरः।।
स्वभेत्तसाले स्वपतीत्तसाले मदे दशेशेन शुभैश्च दृष्टे।।
दशेशसूर्येण निरीक्षिते वा राजा स्वयं मुंचति तस्करं वै।।२।।

अष्टमेशस्य दृष्टिकारणात् ताड्यमानः चोरः गुप्त्यास्पदे मृतिं याति। सप्तमगृहे स्वराशिर्वा स्वस्वामिनः इत्तसालयोगः दशमेशेन वा शुभग्रहैः दृष्टो वा दशमेशः सूर्येण दृष्टश्चेत् राजा स्वयमेव तस्करं मुञ्चेत्।

विस्मृतिप्रश्ने विचारः

विस्मृतौ यत् तृतीयं भं वस्तुस्थानं सुखस्थितः।।
ग्राहकश्च तयोर्दाता शीघ्रं प्राग्वदतः फलम्।।१।।

विस्मृतौ तृतीयं यदस्ति तत् वस्तुस्थानमिति ज्ञेयम्। चतुर्थगृहस्थ ग्रहः ग्राहको भवति। वस्तुस्थानग्राहकयोः दाता यः कोऽपि वा भवेत् तस्मादेव शीघ्रं फलम् वदेत्।

वस्तु स्थानांशुतुल्यं स्याल्लाभस्थानं तथावता।।

विस्मृतेस्तावता लाभो दिनात्मसमयेन वै।।२।।

वस्तुस्थानस्य नवांशतुल्यस्थानं वस्तुलभ्यमानस्थलं तथैव विस्मृतवस्तुनः लाभोऽपि नवांशस्य तुल्यदिनेषु एव वक्तव्यम्।

अमुकं कार्यं कर्तुं यामि न वेति प्रश्ने विचारः

केन्द्रे शुभैर्लग्नपचंद्रसौम्येत्तसालतः सद्गमनं न चान्यथा।।१।।

केन्द्रे शुभग्रहैस्सह लग्नेशचन्द्रशुभग्रहयोः इत्तसालयोगकारणात् गमनम् उत्तममिति अन्यथा चेत् न गन्तव्यमिति ज्ञेयम्।

नष्टधनप्रश्ने विचारः

तनुपतौ स्मरगे स्मरपे तनौ गतधनं समुपैति च सप्तमे।।

मदनलग्नपयोरपि मुत्सिले गतधनाप्तिरथो तनुसप्तपौ।।१।।

लग्नेशः सप्तमे तथा सप्तमेशः लग्नेशे स्थितश्चेत् गतधनं लभ्यते। तथैव सप्तमगृहे सप्तमेशलग्नेशयोः इत्तसालयोगश्चेत् गतधनप्राप्तिः स्यात्। यदि लग्नेशसप्तमेशौ।

वपुषि मुत्तसिलं कुरुतो यदा धनहरः प्रददाति धनं स्वयम्।।

यदि तनौ तरणिर्मदने विधुर्न गतलब्धिरथांगदशेशयोः।।२।।

लग्ने इत्तसालयोगं कुरुतः चेत् धनहरः स्वयमेव धनं प्रददाति। यदि लग्ने सूर्यस्तथा सप्तमे चन्द्रश्चेत् गतधनं नैव प्राप्यते। लग्नेशद्वादशेशयोः।

मुत्तसिले धनहृद्विपलायतेऽथ मदपे यदि वा हिमदीधितौ।।

तरणिलुप्तकरे न लभेद्धनं यदि चतुष्टयगो रमणीपतिः।।३।।

इत्तसालयोगश्चेत् धनहरः पलायते। यदि स्पतमेशो वा चन्द्रः सूर्येण सह अन्तर्गतश्चेत् गतधनं नैव लभ्यते। यदि सप्तमेशः केन्द्रे स्थितश्चेत्।

तदु हरः पुर एव यदा स्मरेद्धृततपस्त्रितयेश्वरमुत्सिलः।।

क्व च गतो यदि वांगमदेशयोर्नच परस्परदृग्यदि लग्नपः।।४।।

धनहरः पुरे एव भवेत्। यदि अस्तङ्गतः तृतीयेश्वरेण सह इत्तसालं करोति चेत् धनहरः कुत्रचित् गतवानिति ज्ञेयम्। लग्नेशसप्तमेशयोः परस्परदृष्टिर्न भवति अथवा लग्नेशो।

गतबलो धनहद्भयविह्वलो नृपकुले प्रददाति धनं तदा।।

यदि वर्पुमदनेश्वरमुत्सिलं नृपकुलादुपलभ्यमितं धनम्।।५।।

बलहीनश्चेत् धनहरः भयेन व्याकुलो भूत्वा राजकुले धनं दास्यत्येव। यदि लग्नेशसप्तमेशयोः इत्तसालयोगश्चेत् राजकुलात् किञ्चिद्धनं लभ्यते।

त्रिखपसप्तममुत्तसिले धनं परपदे गमनादुपलभ्यते।।

यदि विधुः शुभमुत्तसिली तनौ दशमभेऽप्यथवा गतलाभदः।।६।।

तृतीयेशदशमेशयोः सप्तमगृहे इत्तसालयोगस्तर्हि परस्थानगमनेन धनं लभ्यते। यदि चन्द्रः शुभग्रहेण सह इत्तसालं कुर्वन् लग्ने वा दशमगृहे वा स्थितश्चेत् गतधनलाभो भवेत्।

चेद्वाङ्गराण्मुत्तसिलं तदाऽल्पा वाप्तिस्तथार्कादुदिते च चंद्रे।।

सद्योगदृग्भ्यां बुधचंद्रयोश्च मिथो गताप्तिः परथा नहि स्यात्।।७।।

लग्नेशेन सह चन्द्रस्य इत्तसालयोगश्चेत् अल्पधनप्राप्तिर्भवेत्। तथैव सूर्यादुदिते चन्द्रे शुभग्रहस्य योगो वा दृष्टिरस्ति चेत् तथा बुधचन्द्रयोः परस्परदृष्टिकारणात् गतधन-प्राप्तिर्भवेत्। अन्यथा चेत् नैव भवेत्।

सुस्नेहदृष्ट्या शुभभानुदृष्टे लग्ने हिमांशौ हि गतार्थलाभः।।

सूर्येत्तसाले हिमगौ तनुस्थे स्वस्थेऽथवा तूर्यदृशार्कदृष्टे।।८।।

यदि लग्नस्तथा चन्द्रः शुभग्रहेण तथा सूर्यस्य मित्रदृष्ट्या वीक्षते तर्हि गतधनलाभो भवेत्। यदि लग्नस्थ वा दशमस्थ चन्द्रः सूर्यस्य इत्तसाले भवेद्वा चतुर्थदृष्ट्या सूर्येण वीक्षिते चेत्।

चंद्रे न लाभस्तु भवेच्चिरेण स्वल्पार्थलाभो बहुकष्टतो वा।।

सौम्यैर्बलाढ्यैस्त्रिवपुःखधर्मपुत्राप्तिकोशेषु गतैः खलैश्च।।९।।

गतधनलाभः नैव भवेत्। यल्लब्धं तदपि बहुकष्टेन लभ्यते। बलवान् शुभग्रहः ३/१/१०/९/५/११/२ एतेषु गृहेषु स्थितस्तथैव पापग्रहः।

केन्द्रत्रिकोणाष्टमलाभवर्जं नष्टस्य लाभो नियतं प्रदिष्टः।।

केंद्रे त्रिकोणेषु शुभैः खलग्नमदेषु पापैर्हृतनष्टलाभः।।१०।।

१/४/७/१०/९/५/८/११ एतेषु गृहेषु विना अन्यगृहश्रितस्तर्हि नष्टधनं निश्चयेन लभ्यते। केन्द्रे तथा त्रिकोणे शुभ – दशम – लग्न – सप्तमस्थानेषु पापग्रहोऽस्ति चेत् नष्टधनस्य अर्धभागं लभ्यते।

अर्द्धस्ततः स्याद्यदि वित्तकेंद्रत्रिकोणपापाः खलवीक्षिताश्च।।

असौम्यदृष्टा गतवित्तनाशं कुर्वन्ति चान्यस्वविनाशनं च।।११।।

यदि २/१/४/७/१०/५/९ एतेषु गृहेषु पापग्रहः पापग्रहैः दृष्टस्तथा शुभग्रहैः अदृष्टश्चेत् गतधनस्य, अन्यधनस्य च विनाशो भवेत्।

शीर्षोदये सौम्ययुतेऽथ पूर्णे चंद्रे तनौ सौम्ययुतेक्षिते च।।

नष्टार्थलाभो द्रुतमेव वाच्यो यद्वा शुभे लाभगृहे बलाढ्ये।।१२।।

शुभग्रहयुक्तः पूर्णचन्द्रः शीर्षोदयराशौ स्थितस्तथा लग्नो शुभग्रहैः दृष्टयुक्तश्चेत् नष्टद्रव्यस्य लाभः शीघ्रमेव सम्पद्यते। अथवा एकादशगृहे शुभग्रहः सबलश्चेदपि नष्टद्रव्यस्य लाभो शीघ्रमेव स्यात्।

पतितधनप्रश्ने विचारः

धनाधिपश्चेत्तनुपेत्तसाली वेन्दित्तसाली पतितार्थलाभः।।

यद्वैकगा लग्नधनेशचंद्रा यद्वा तनुद्रव्यगतेत्तसाले।।१।।

यदि धनेशो वा लग्नेशः चन्द्रेण सह इत्तसालं कुरुतश्चेत् पतितधनस्य लाभो भवेत्। अथवा लग्नेशधनेशौ तथा चन्द्रश्च एकस्मिन् गृहे वा लग्ने वा स्थित्वा द्वितीयगृहे इत्तसालं कुर्वन्ति चेत्।

यद्वार्कचंद्रौ तनुमीक्षमाणौ गतार्थलाभो हितदृग्विशेषात्।।

तुर्यादधःस्ये तरणौ विधौ वा न लभ्यते संपतितं च नष्टम्।।२।।

अथवा सूर्यचन्द्रौ लग्नं वीक्षेते तर्हि गतधनस्य लाभो भवेत्। तथैव मित्रदृष्टिरस्ति चेत् विशेषरूपेण गतधनलाभो भवेत्। चतुर्थगृहात् नीचस्थाने सूर्यो वा चन्द्रः स्थितश्चेत् पतितधनं तथा नष्ट धनं नैव लभ्यते।

धनभ्रान्तिप्रश्ने विचारः

तुर्येशे यदि वा चंद्रे तुर्यस्थे वाम्बुवीक्षके।।

धनं तत्रैव वास्तेशे स्वे वा बन्धौ धनं बहु।।१।।

चतुर्थेशो वा चन्द्रश्च चतुर्थगृहे स्थित्वा दृष्टौ चेत् धनं यत्र स्थापितं तत्रैव भवेत्। अथवा सप्तमेशः द्वितीये वा चतुर्थगृहे स्थितश्चेत् भूरिधनं लभ्यते।

क्रूरेऽम्बुगे धनं तत्र स्थितमप्याप्यते नतु।।

भौमे सप्ताष्टमे यद्वा तनौ राहौ रवौ मृतौ।।२।।

यदि क्रूरग्रहः चतुर्थगृहे स्थितश्चेत् स्थापितं धनं नैव लभ्यते। कुजः सप्तमे अष्टमे वा राहुः लग्ने, सूर्यः अष्टमे स्थिताश्चेत्

न लभ्यते तदा वित्तं यदा सप्ताष्टदिक्स्वगौ।।

चंद्रजीवौ तदावाप्तिर्लग्नेशो द्यूनगस्तनौ।।

द्यूनेशश्च तदा भ्रान्तेर्धनलाभो भवेद्ध्रुवम्।।३।।

धनं नैव लभ्यते। ७/८/१०/२ एतेषु गृहेषु चन्द्रबृहस्पती भवतस्तर्हि धनं लभ्यते। लग्नेशः सप्तमे, सप्तमेशो लग्ने स्थितश्चेत् विस्मृतधनलाभो निश्चयेन भवेदिति वक्तव्यः।

नष्टभृत्यप्रश्ने विचारः

शुभेक्षितं लग्नमदेशमुत्सिलं गतस्य दासस्य तदाप्तिरीतिता।।

वपुःपतौ सप्तमगेंऽगवीक्षके विनष्टदासाप्तिरथास्तपे तनौ।।१।।

लग्नेशसप्तमेशयोः इत्तसालं शुभग्रहेण दृष्टश्चेत् गतस्य दासस्यागमनं भवेत्। सप्तमगृहस्थ लग्नेशो लग्नं पश्येत्तर्हि विनष्टदासः पुनरागच्छेत्।

स्वयं समायाति तनौ तु मुत्सिले स्मरांगपत्योरथवाङ्गपेन्दुतः।।

जनः प्रनष्टः स्वयमेति भूपतेर्भयादथार्कांशुगतेन सप्तपे।।२।।

यदि सप्तमेशो लग्नेऽस्ति चेत् दासः स्वयमेव आगच्छेत्। तथैव लग्ने सप्तमेशलग्नेशयोः इत्तसालयोगश्चेत् अथवा लग्नेशचन्द्रयोः इत्तसालयोगश्चेत् प्रनष्टजनः राजभयेन स्वयमेव आगच्छेत्। सप्तमेशः सूर्येण सह अस्तङ्गतश्चेत् नागच्छेत्।

क्रूरेक्षितेंऽगस्मरपेत्तसाले नेवैति सूर्येण च वक्रिणा वा।।
खलेन वा शीतगुमुत्तसीलं प्रलभ्यते नो स्थिरगैश्च सौम्यैः।।३।।

यदि लग्नेशसप्तमेशयोः इत्तसालं क्रूरग्रहेण दृष्टं चेत् दासः नागच्छेत्। अथवा सूर्येण वा वक्रीपापग्रहेण सह चन्द्रस्य इत्तसालयोगश्चेत् तथा शुभग्रहः स्थिरराशिगतश्चेदपि दासो नैवागच्छेत्।

विभागप्रश्ने विचारः

लग्नेन्दू चरभे न निर्वहति भागश्च स्थिरर्क्षे तयो-।
र्नूनं निर्वहति द्विदेहभगतौ विश्वासतो वाप्तितः।।
क्रूरे क्रूरनिरीक्षिते तनुगते श्रेष्ठो ह्यलीकांशद-।
श्चैवं लप्तगते परः परविभागार्थो यदेन्द्वम्बुपौ।।१।।

लग्नचन्द्रौ चरराशिगतौ तर्हि भागो न निर्वहति। स्थिरराशिगतौ चेत् निश्चयेन निर्वहति। तथैव द्विस्वभावराशिगतौ चेत् विश्वासप्राप्त्यनन्तरं निर्वहति। यदि लग्ने क्रूरग्रहः क्रूरग्रहेण दृष्टश्चेत् कपटपूर्वकभागं दद्यात् अर्थात् निजभागं नैव दास्यति। एवं प्रकारेण सप्तमगृहे क्रूरग्रहः क्रूरग्रहेण दृष्टश्चेत् परपुरुषस्य भागधनं लभ्यते। अथवा चन्द्रश्चतुर्थेशौ।

कृत्वा मुत्तसिलं शुभेन सततं निर्वाहदौ चेच्छुभः।
खस्थो भूरिधनायपापखचरोऽल्पप्राप्तये चेच्छुभाः।।
केद्रायार्थगता बलेन सहिता लाभार्थदाः पापिनः।
केन्द्रायाष्टधनेषु चेद्यवहृतौ कुर्वन्ति हानिं पराम्।।२।।

शुभग्रहेण सह इत्तसालं कुरुतश्चेत् निर्वहतीति, यदि शुभग्रहो दशमस्थ चेत् बहुधनं तथा पापग्रहश्चेत् किञ्चिद्धनं लभ्यते। यदि शुभग्रहः

१/४/७/१०/११/२ एतेषु गृहेषु सबली इव तिष्ठेत्तर्हि लाभदायको भवेत्। तथैव पापग्रहः १/४/७/१०/८/२ एतेषु गृहेषु स्थितश्चेत्। व्यवहारे परमहानिं करोत्येव।

कुत्र गत इति प्रश्ने विचारः

तनुराशिवशाद्वाच्या नष्टदिग्वा तनुस्थितात्।।३।।

लग्नस्य राशितः वा लग्नस्थ ग्रहात् नष्टवस्तुनः, नष्टभृत्यादीनां दिशा वक्तव्या।

क्रयविक्रयप्रश्ने विचारः

क्रेता लग्नपतिर्लाभपतिर्विक्रयकारकः।।

तनौ बलिनि संग्राह्यं विक्रेतव्यं तथा भवेत्।।१।।

लग्नेशः क्रेता, एकादशेशो विक्रयकारकश्च। लग्नः सबलश्चेत् क्रयविक्रयणं समुचितमेव।

यदि लग्नसप्तमपमुत्तसिलं स्वयमेव साटिस्थ मित्रदृशा।।

यदि लग्नसप्तपतिनक्रयुतिः परतो यदांगमदपौ हि हितौ।।२।।

यदि लग्नेशसप्तमेशयोः इत्तसालयोगश्चेत् स्वयमेव क्रयविक्रयकार्यकरणं समुचितमेव भवेत्। मित्रदृष्ट्या उभयोः इत्तसालं भवेत्तथा लग्नेशसप्तमेशौ मकरराशिगतौ चेत् अन्यपुरुषद्वारा क्रयविक्रयं शुभं भवेत्। यदि लग्नेशसप्तमेशयोः परस्परं मित्रदृष्टिरस्ति चेत्।

प्रियसाटिरेव यदि मित्रपतिस्तनुपश्च मित्रदृशि तौ यदि तौ।।

तदु विक्रियप्रियसुसाटितार्थदैवं सुखस्मरपती क्रयीष्टतः।।३।।

मित्रेण सह क्रयविक्रयणं शुभं भवेत्। यदि पञ्चमेशसप्तमेशौ मित्रदृष्ट्या युक्तौ चेत् विक्रयणे मित्रेण सह धनदायकं भवेत्। एवं प्रकारेण चतुर्थेशसप्तमेशौ मित्रदृष्टियुक्त्या भवतश्चेत् क्रयणे मित्रेण सह सुखदायकं भवेत्।

नियतं हि साटिरथ लग्नपतौ मदने क्रयी नियतवस्तुयाचकः।।

यदि सप्तपो वपुषि विक्रयी यदा तनुगः शुभः स्वमृतवाग्धि विक्रयी।।४।।

यदि लग्नेशः सप्तमे स्थितश्चेत् क्रयीपुरुषः नियतवस्तुमभ्यर्थेत्। तथैव सप्तमेशौ लग्ने स्थितश्चेत् विक्रयीपुरुषः नियतवस्तुयाचको भवेत्। लग्ने शुभग्रहः भवेत्तर्हि विक्रयीपुरुषः अमृतसदृशवचनानि वदेत्।

मदने शुभः स्वमृतवाक् क्रयी भवेद्यदि यत्र चंद्रखगयोश्च मुत्सिलम्।।
क्रयमाचरेत्खलु तदैव यदा मुत्सर्रिफं सदु तयोश्च विक्रयम्।।५।।

यदि सप्तमगृहे शुभग्रहः अस्ति चेत् विक्रयी मधुरस्वरयुक्तो भवेत्। यदा कदाचित् चन्द्रस्तथा ग्रहस्य इत्तसालं चेत् तस्मिन्नेव काले क्रयणं भवेत्। उभयोः इशराफयोगश्चेत् विक्रयणं भवेत्।

येनैवेन्दोः खेचरेणेशराफः स स्यात् खेटो भानुरश्मिप्रविष्टः।।
दत्त्वाऽन्यस्मै वस्तु हित्वापणं तद्विक्रेता वै याति दैवात्प्रणाशम्।।६।।

येन ग्रहेण सह चन्द्रस्य इशराफयोगश्चेत् सो ग्रहः सूर्येण सह अस्तङ्गतश्चेत् अन्यस्मै वस्तु हित्वा तद्वस्तुविक्रेता दैवात् नाशं प्राप्स्यति।

समर्घमहर्घप्रश्ने विचारः

यावद्भस्रं स्वोच्चमित्रर्क्षसंस्थः सौम्योऽङ्गे तावन्ममासाः समर्घम्।।
पापैश्चैवं स्यान्महर्घो ह्यथेशे लग्ने यद्वा विग्रहेंऽगाधिपस्य।।
वीर्यं पूर्णं चाऽन्यथा तत्स्थवीर्यं तस्माद्वीर्याच्चिन्तयोच्चिन्तनीयम्।।१।।

स्वोच्चमित्रराशिस्थ शुभग्रहः यावत् दिनानि लग्ने तिष्ठेत् तावन्मासाः समर्घं भवेत्। एवं प्रकारेण पापग्रहो भवेत्तर्हि महर्घं भवेत्। लग्ने वा लग्नेशे वा लग्नेशस्य गृहे पूर्णबलश्चेत् अथवा तस्य बलमन्यथा भवेत्तर्हि तेन बलेन विचारणीयवस्तुनः विचारः करणीयः।

पूर्णामेन्दुर्यत्र सदृष्टयुक्तस्तस्मिन्मासे नूनमुग्रं समर्घम्।।
पापैरेवं युक्तदृष्टो महर्घं मिश्रैर्मिश्रं स्यात्फलं तत्र मासे।।२।।

यस्य मासस्य पूर्णिमायाः अमावास्यायाः चन्द्रो शुभग्रहेण दृष्टयुक्तश्चेत् निश्चयेन तस्मिन्नेव मासे उग्रसमर्घं भवेत्। यो पापग्रहेण दृष्टयुक्तश्चेत् महर्षं तथा मिश्रग्रहैः दृष्टयुक्तश्चेत् तस्मिन् मासे मिश्रफलमिति वक्तव्यम्।

अथ बलवति लग्ने स्वेशसन्दृष्टयुक्तेऽपि च स शुभचतुःकेन्द्रेषु सर्वं समर्घम्।।

तदनु विबलल्लग्ने केंद्रपापैर्महर्घं सकलमथरिपुक्षेत्रे वपुष्युग्रदृष्टः।।

खलखचर उ यावद्वासरं स्याद्वदेत्तद्दिनपरिमितितस्तावंद्धि सर्वं महर्घम्।।३।।

यदि बलवति लग्ने स्वस्वामिना दृष्टयुक्तस्तथा चतुर्षु केन्द्रेषु शुभग्रहाः भवन्ति चेत् सर्ववस्तुसमर्घं भवेत्। तदनन्तरं लग्नो निर्बलश्चेत् केन्द्रे पापग्रहः स्थितश्चेत् वस्तुनः महर्घं भवेत्। तथैव पापग्रहः पापग्रहेण दृष्टः षष्ठमे वा लग्ने वा यावत् दिनानि भवन्ति तावत्दिनेषु वस्तुनः महर्षं भवेत्।

वर्षाप्रश्ने विचारः

नृयुग्मभानोः क्रमणे नृयुग्मकन्याश्वमीनेषु शुभैः सुवृष्टिः।।

किंवात्र गोकर्कगतौ सितज्ञौ चंद्रे झषे देवगुरौ स्त्रियां च।।१।।

मिथुनराशिस्थ सूर्यस्य संक्रान्तौ मिथुन – कन्या – धनु – मीनराशीनामुपरि शुभ्रग्रहः स्थितश्चेत् सुवृष्टिरिति ज्ञेया। अथवा अस्मिन्नेव संक्रान्तौ शुक्रबुधौ कर्कस्य, चन्द्रो मीनस्य, बृहस्पतिः कन्यायां स्थितश्चेत्।

विलोमतो वापि भवेत्सुवृष्टिर्यदात्र भौमार्कजसैंहिकेयाः।।

नृयुग्मकन्याझषचापसंस्थास्तदाल्पवृष्टिश्च भवेन्महर्घम्।।२।।

अथवा विलोमनतः भवेत्तर्हि अर्थात् कन्यायां शुक्रबुधौ, मीने चन्द्रः, बृहस्पति कर्के च स्थिताश्चेत् सुवृष्टिर्भवेत्। अथवा तस्मिन्नेव सङ्क्रान्तौ कुजशनिराहुग्रहाः मिथुनकन्यामीन-धनुराशिषु स्थिताश्चेत् अल्पवृष्टिः महर्घञ्च भवेत्।

यदात्र गोकर्कगतौ च भौममंदौ द्विदेहे दितिजोऽल्पवृष्टिः।।

अन्नं प्रियं वात्र सितेन्दुजातौ नृयुग्ममेषापगतौ धनस्थौ।।

शीतांशुजीवौ च खलास्तुलालिसिंहेषु वृष्टिश्च भवेत्समर्घम्।।३।।

यदि मिथुनसंक्रान्तौ वृषकर्कयोः कुजशनैश्चरौः, द्विस्वभावराशौ शुक्रः स्थितश्चेत् अल्पवृष्टिः अन्नप्रियञ्च भवेत्। यदि शुक्रबुधौ मिथुनमेषराशिषु स्थित्वा

चन्द्रबृहस्पती द्वितीयगृहे स्थितौ तथा पापग्रहः तुलावृश्चिकसिंहाराशिषु स्थितश्चेत् वृष्टिः, समर्घञ्च भवेत्।

पूर्णे हिमांशौ शुभदृष्टयुक्ते केंद्रे जलर्क्षे द्रुतमेव वृष्टिः।।४।।

पूर्णचन्द्रः शुभग्रहेण दृष्ययुक्तश्चेत् केन्द्रे जलराशिगतश्चेत् शीघ्रमेव वृष्टिः भवेत्।

तद्वद्भृगुश्चन्द्रमसस्त्रिकोणे तनोर्हि वा याति तदैव वर्षा।।

सौम्या जलर्क्षे धनके च संस्थाः पक्षे सिते चोदयगेऽम्बुभेन्दौ।।५।।

एवमेव प्रकारेण चन्द्रात् वा लग्नाद्वा त्रिकोणे यदा शुक्रो गच्छेत् तदा वृष्टिजार्यते। शुभग्रहः जलराशौ द्वितीयगृहे स्थितो, शुक्लपक्षे लग्नगतः जलराशिस्थ चन्द्रश्चेत् वृष्टिः भवेत्।

वृष्टिर्भवेद्वा रविशीतरश्मी स्मरे सुखे वापि मृतौ सितार्क्षौ।।

तथा तनोर्द्वित्रिगतौ प्रवृष्टिर्यद्वोदयास्ते सितजीवयोश्च।।६।।

अथवा सूर्यचन्द्रौ सप्तमे, चतुर्थे वा अष्टमे वा स्थित्वा शुक्रशनिग्रहौ लग्नात् द्वितीयतृतीयगृहे स्थितावपि प्रवृष्टिर्जायते। अथवा शुक्रबृहस्पतिग्रहयोः उदयः अस्तङ्गतश्चेत्

जलर्क्षगैः सर्वशुभैः प्रवृष्टिर्यदा चतुर्थे शुभगाः प्रवृष्टिः।।

खलाश्च दुर्भिक्षभयं यदारसूर्येन्दवोऽङ्गे विजले बलाढ्याः।।७।।

सर्वे शुभग्रहाः जलराशिगताश्चेत् सुवृष्टिर्जायते। यदि चतुर्थगृहे शुभग्रहः भवेत्तर्हि प्रवृष्टिः भवेत्। तथैव पापग्रहोऽस्ति चेत् दुर्भिक्षभयं जायते। यदि कुजसूर्यौ तथा चन्द्रश्च जलराशिवर्जितलग्ने सबलाः चेत्

दुर्भिक्षपीडे तु शनेर्नवाम्बुकोशे सुदृष्टो विधुरम्बुदः स्यात्।।

यदीन्द्रवाद्यादि परिस्पृशंस्तु जलेषु तिष्ठत् सलिलोद्यतश्च।।८।।

दुर्भिक्षं तथा पीडा च भवेत्। यदि शनितः नवमे, चतुर्थे तथा द्वितीयगृहे चन्द्रः शुभग्रहैः दृष्टश्चेत् जलदायको भवेत्। यदि इन्द्रवाद्यादीन् स्पृशन् जले स्थितश्चेत् जलदायको उद्यत इति विज्ञेयः।

जलस्य पृच्छा प्रवदेज्जलस्य प्रवर्षणं वा यदि शक्रचापम्।।

पीताभ्रसंध्याश्च नवाश्च मेघाः स्निग्धाम्बुवृष्टिः परिघस्तथैव।।९।।

पुरुषजलस्य प्रश्नकरणात् जलस्य वृष्टिः भवेत्। यदि इन्द्रधनुः पीतवर्णे, मेघावृताकाशः, सन्ध्या तथैव नवीनमेघास्सन्ति चेत् सुवृष्टिरेव। एवमेव प्रकारेण परिघ –

प्राचीप्रतीच्युत्तररुद्रकाष्ठाविद्युद्भृतं वर्षणदा नितान्तम्।।

सौदामिनी वायुभवा च वृष्ट्यै शेषोत्थविद्युद्यदि वृष्टिहर्त्री।।१०।।

पूर्व – पश्चिम – उत्तर – ईशानदिशासु विद्युत् भवेत्तर्हि शीघ्रमेव वृष्टिः सम्भवेत्। तथैव वायव्यादिदिशायाः विद्युत् अपि वृष्टिसूचका एव। शेषदिशासु विद्युत् वृष्टिहर्त्री भवेत्।

स्निग्धा घना जलधरा दिवि पौषशुक्लाद्यस्यां तिथौ निशि दिने प्रभवन्ति यावत्।।

तस्यां तिथौ भुवि भवेन्नभसः सिताद्वै वृष्टिः पयोदसमयेऽम्बुदवृन्दतुल्या।।११।।

पौषमासस्य शुक्लपक्षादारभ्य यस्मिन् तिथौ रात्रौ वा दिवसा वा घनमेघाः आकाशे स्थिताः, श्रावणमासस्य शुक्लपक्षादारभ्य तस्मिन् तिथौ वर्षतौ पौषानन्तरं अम्बुदवृन्दतुल्या वृष्टिः सम्भाव्यते।

कार्तिकैकादशी मेघवीक्षाषाढे हि वृष्टिदा।।

मार्गाष्टम्यां यदा विद्युद्वीक्षा श्रावणवृष्टिदा।।१२।।

यदि कार्तिकमासस्य एकादशीदिने मेघवीक्षणेन आषाढे वृष्टिः भवेत्। मार्गशीर्षस्य अष्टमीदिने यदा विद्युत् वीक्षते, श्रावणे वृष्टिर्भवेदिति ज्ञेया।

पौषकृष्णदशम्यां च वृष्टिर्भाद्रप्रवृष्टिदा।।

वृष्टिश्चेन्माघसप्तम्यां ज्येष्ठे मूले न वर्षति।।

नक्षत्रवारिवाहस्य तदान्नैः पूर्यते मही।।१३।।

पौषमासे कृष्णपक्षे दशम्यां वृष्टिरस्ति चेत् भाद्रपदमासेऽपि भवेत्। यदि माघमासस्य सप्तम्यां वृष्टिरस्ति चेत् ज्येष्ठमासस्य मूलानक्षत्रेऽपि न वर्षति चेत् नक्षत्रवारिवाहस्य तदान्नैः मही पूर्यते इत्यर्थः।

नभःप्राक्पक्षपञ्चम्यां वृष्टिर्बह्वन्नधान्यदा।।

आषाढपूर्णा पूर्वायुक्समर्घायोत्तरायुता।।१४।।

श्रावणमासस्य प्रथमपक्षपञ्चमीदिने वृष्टिर्भवेत्तर्हि बहु अन्नधान्यदा भवेत्। आषाढस्य पूर्णमासः पूर्वाषाढयुक्ता चेत् समर्घ, उत्तराषाढयुक्तश्चेत्

साश्वपीडाकरी रोगदैव सा यदि मूलयुक्।।

महादुर्भिक्षदा ज्येष्ठे कृष्णे प्रतिपदार्कयुक्।।१५।।

अश्वपीडा, रोगदायक, मूलयुक्तश्चेत् दुर्भिक्षदायको इति कथ्यते। ज्येष्ठस्य कृष्णप्रतिपदायां राविवासरश्चेत्

महावातस्तरुध्वंसी भौमयुक्तातिविग्रहः।।

सौम्यान्विता च दुर्भिक्षमुच्चैर्वृष्टिक्षयस्तथा।।१६।।

वृक्षाणां नाशकरणः महाप्रचण्डवायुर्भवेत्। कुजस्थ चेत् अतिविग्रहः, बुधस्थ चेत् महादुर्भिक्षं, वृष्टिक्षयश्च भवेत्।

शनियुग्दुर्लभं वारि शेषवारयुता शुभम्।।

धनधान्यसुतोत्पत्तिर्गेहे गेहे महोत्सवाः।।१७।।

शनिगतश्चेत् जलस्य दुर्लभता, शेषवारयुता चेत् शुभफलं, धनं, धान्यं, सन्तानोत्पत्तिस्तथा गृहे गृहे महोत्सवः भवेत्।

पौषसंक्रमणे वारो रवेश्चेद्धान्यमल्पकम्।।

द्विघ्नं भौमस्य तुर्यघ्नं शनेस्त्रिघ्नं ज्ञशुक्रयोः।।१८।।

पौषमासस्य सक्रान्तदिनम् रविवासरश्चेत् धान्यत्र मूल्यं द्विगुणं, कुजश्चेत् चतुर्गुणं, शनिश्चेत् त्रिगुणं तथा बुधो वा शुक्रश्चेत्

पादोनं शेषयोरर्द्धं वदेन्मीनार्कसंक्रमे।।

रवेर्वारस्तदा वातः कुजस्य पशुपीडनम्।।१९।।

पादोनं तथा शेषयोरर्धभागं मूल्यं भवेत्। मीनस्य सङ्क्रान्तदिवसः रविवासरश्चेत् पवनाधिक्यं, कुजश्चेत् पशुपीडा

शनेर्दुर्भिक्षता ज्ञस्य महामारीसमुद्भवः।।

संक्रमे शुभवारश्चेच्छुभदोऽन्यो हि कष्टदः।।२०।।

शनिश्चेत् दुर्भिक्षं, बुधश्चेत् महामारी, सङ्क्रान्तदिवसि शुभवारश्चेत् शुभफलं, अशुभवारं चेत् कष्टदायकं भवेत्।

शुभावंबरे सर्वदा वृष्टिदौ चेच्छुभानां त्रयं दीर्घवृष्ट्यै नितान्तम्।।

चरेऽङ्गे यदा सर्वखेटास्तदा सार्द्धघस्राज्जलं स्यादथो यत्र पापः।।२१।।

यदि चतुर्थगृहे द्वौ शुभग्रहौ भवतश्चेत् सर्वदा वृष्टिः, शुभग्रहं त्रयञ्चेत् दीर्घवृष्टिः भवेत्। यदि सर्वे ग्रहाः चरलग्ने स्थिताश्चेत् सार्द्धदिनपर्यन्तं जलवृष्टिर्भवेत्।

शनिप्रेक्षितस्तद्दिशः सस्यहर्ताऽथवा यत्र भूमीजसूर्यौ हि भे स्तः।।

भवेत्तद्दिशः सस्यसंपद्विनाशो शुभावेवमत्रेष्टदृष्टौ सुधान्यम्।।२२।।

यदि लग्ने पापग्रहो शनैश्चरेण दृष्टश्चेत् तस्याः दिशायाः सस्यहारको भवेत्। तत्र लग्ने कुजसूर्यौ स्थितौ चेत् दिशायाः सस्यसम्पदः नाशमेति। यदि लग्ने द्वौ शुभग्रहौ मित्रग्रहेण दृष्टौ चेत् सुधान्यवृद्धिर्भवेत्।

सौम्यस्वेशोज्झिते केन्द्रे चतुर्षु च खलेक्षणम्।।

गोमृगेन्द्रतुलालग्ने शलभाखुमुखैर्भयम्।।२३।।

केन्द्रे शुभग्रहस्तथा केन्द्रस्वामिरहित चेत् तत्र पापग्रहाणां दृष्टिश्चेत् वृषसिंहतुलादयः लग्ने स्थिताश्चेत् शालभमूषकादिभयं भयं भवेत्।

कुंभालिवृषमेषेषु वायुवह्नीतितो भयम्।।

कन्यानृयुग्मचापेषु शलभादिकृमेर्भयम्।।२४।।

कुम्भ – वृश्चिक – वृष – मेषाः लग्ने स्थिताश्चेत् वायुवह्नीतः भयं भवेत्। कन्यामिथुनधना लग्ने स्थिताश्चेत् शलभादिकृमिभिः भयं भवेत्।

कर्के भौमे जलं चंद्रदृष्टे रोगयुगं वदेत्।।

शालयोऽपि यवाश्चैव गोधूमा सतिलातसी।।२५।।

कर्कस्थ कुजश्चेत् जलं भवेत्तथैव चन्द्रेण दृष्टश्चेत् रोगसहितवृष्टिर्भवेत्। शाल – यवा – गोधूमा – अलसी समा, मद्ग – श्यामाक – कंगु – मसूर – क्रोद्रवाः एतैः अन्यलग्न क्रमात् द्वादशगृहाणां फलं वदेत्।

कलायमुद्गश्यामाकाः कंगुमासौ च कोद्रवः।।

मसूराः क्रमतो लग्नाद्वादशर्क्षफलं वदेत्।।२६।।

अथ सप्तनाडीचक्रम्

कृत्तिकादि लिखेद्भानि साभिजिन्ति क्रमेण च।।

सप्तनाडीव्यधस्तत्र कल्पनीयो द्विजिह्ववत्।।१।।

कृत्तिकादारभ्य अभिजित्सहितानि अष्टविंशति नक्षत्राणि क्रमपूर्वकं लेखनीयानि तदा सप्तनाडीव्यधस्तत्र द्विजिह्वत् कल्पनीयः।

चतुर्नक्षत्रवेधेन नाड्येका परिकीर्त्तिता।।

कृत्तिका च विशाखा चानुराधा भरणी तथा।।२।।

चतुर्नक्षत्रवेधेन एका नाडी वक्तव्या। यथा कृत्तिका – विशाखा – अनुराधा – भरणी

ऊर्द्धाख्या मंदनाडी सा चंडनाडी स्मृता बुधैः।।

रोहिणी स्वातिरिन्द्राश्वौ द्वितीया रविसंभवा।।३।।

इति चण्डनाडी शनैश्चरस्य उर्द्धाख्या इति पण्डितैः कथितमस्ति। रोहिणी – स्वाति – ज्येष्ठा – तथा अश्विनी सूर्यस्य

वायुनाडी ततः सौम्यं चित्रा मूलं च रेवती।।

तृतीया भौमनाडीति दहनाख्या ततः परा।।४।।

वायुनाडी भवति। एतस्यानन्तरं मृगशीर्ष – चित्रा – मूल – रेवती इति तृतीया भौमानाडी दहनाख्या भवति।

आर्द्रा करस्तथा पूर्वाषाढा चोत्तरभाद्रपात्।।

जीवनाडी चतुर्थेयं सौम्यनाडी ततोऽदितिः।।५।।

एतदनन्तरं आर्द्रा – हस्ता – पूर्वाषाढा – उत्तराभाद्रपदा इति चतुर्थेयं जीवनाडी बृहस्पतेः सौम्यनाडी भवति। एतदनन्तरं पुनर्वसु

उत्तराफाल्गुनी चोत्तराषाढा पूर्वभाद्रपात्।।

पंचमीयं नीरनाडी शुक्रोद्भूताऽथ पुष्यभम्।।६।।

उत्तराफाल्गुनी – उत्तराषाढा – पूर्वाभाद्रपदा इति पञ्चमीयं शुक्रस्य नीरनाडी भवति। एतदनन्तरं पुष्य।

पूर्वाफाल्गुनिका चैवाऽभिजिच्छतभिषा तथा।।

षष्ठी बुधोद्भवा नाडी जलनाडी ततः परम्।।७।।

पूर्वफाल्गुनी – अभिजित् – शतभिषा इति षष्ठी नाडी बुधस्य जलनाडी भवति। तत्पश्चात्।

आश्लेषा च मघा श्रोत्रधनिष्ठा सप्तमी विधोः।।

अमृताख्या शीतला च मध्यस्थातोऽग्रपृष्ठतः।।८।।

आश्लेषा – मघा – श्रवण – धनिष्ठा इति सप्तमी नाडी चन्द्रस्य अमृता इति शीतला नाम्ना मध्ये भवति। तत्पश्चात् पृष्ठतः।

त्रयं त्रयं नाडिकानां सौम्यं याम्यं प्रकीर्त्तितम्।।

खलायाम्यर्क्षगाः सौम्याः सौम्यर्क्षेषु च मध्यमाः।।९।।

नाडिकानां त्रयं त्रयं इति सौम्ययाम्यमिति कथितम्। अर्थात् अग्रे नाडीत्रयं सौम्या इति पृष्टभागे नाडीत्रयं याम्या इति कथिताः। पापग्रहो याम्यसंज्ञकनक्षत्रेषु तथैव शुभग्रहः सौम्यसंज्ञकनक्षत्रेषु तथा मध्यमग्रहः

मध्यनाडीगता नूनं निजरूपफलप्रदाः।।

क्रूरा वा शुभगा द्वाद्या एकनाड्यां फलप्रदाः।।१०।।

मध्यनाडीषु स्थिताश्चेत् निजरूपफलप्रदाः भवेयुः। द्वौ वा त्रयो वा शुभग्रहाः, एकः क्रूरग्रह वा नाड्यां तिष्ठेत्तर्हि फलप्रदा एव।

चंडनाड्यां महावातो वायुनाड्यां समीरणः।।

अग्निनाड्यां भवेदग्निः सौम्यनाड्यां च मध्यता।।११।।

यदि चण्डनाड्यां स्थितश्चेत् महाप्रचण्डपवनं, वायुनाड्यां स्थितश्चेत् पवनं, अग्निनाड्यां स्थितश्चेत् अग्निः सौम्यनाड्यां स्थितश्चेत् मध्यमफलं भवेत्।

चंद्रनाड्यां महावृष्टिर्भवेदेकोऽपि चेत्खगः।।

स्वनाड्यां फलदश्चारः सर्वत्र फलदायकः।।१२।।

चन्द्रनाड्यां स्थितश्चेत् महावृष्टिर्जायते। यदि एक एव ग्रहः स्वनाड्यां तिष्ठेत्तर्हि फलदायको भवेत्। तथैव ग्रहस्य चत्वारः सर्वनाडिषु फलदायका एव भवेयुः।

अथ वृष्टियोगः

दशार्द्रातस्त्रियस्तारा विशाखाद्या नपुंसकाः।।

तिस्रः शेषा नरा इन्द्रा यदा सूर्येन्दुतारयोः।।१।।

आर्द्रादारभ्य दशनक्षत्रपर्यन्तं स्त्रीसंज्ञकाः, विशाखादारभ्य त्रिनक्षत्रपर्यन्तं नपुंसकाः, शेषाः पुरुषसंज्ञकाः भवन्ति। यदा सूर्यस्य तथा चन्द्रस्य नक्षत्राणि।

पुंस्त्रीयोगे भवेद्दृष्टिः स्त्रीनपुंसकयोः क्वचित्।।

स्त्रियोर्योगे धनश्छाया खण्डयोर्न दिने लघु।।२।।

पुरुषस्तथा स्त्रीसंज्ञकयोगे स्थितानि चेत् वृष्टिर्जायते। स्त्रीनपुंसकयोः योगो भवेत्तर्हि वृष्टिः तत्र तत्र भविष्यति। स्त्री स्त्रीसंज्ञकयोगे स्थिता चेत् मेघानां छाया भवेत्। नपुंसकः नपुंसकस्य योगे भवेत्तर्हि दिने लघुवृष्टिरपि न सम्भाव्यते।

उदयास्तगतः शुक्रो बुधो वा जलदायकः।।

जलभेन्दुश्च पक्षान्ते संक्रमे वा ज्ञशुक्रयुक्।।३।।

शुक्रो वा बुधो उदयास्तगतौ चेत् जलस्य वृष्टिर्भवेत्। पूर्णिमायां, अमावास्यायां वा संक्रान्तिदेने जलराशिस्थ चन्द्रः बुधशुक्राभ्यां युक्तश्चेत्।

एकार्णवां महीं कुर्यात् तन्मध्येऽर्कश्च शोषयेत्।।

यद्दिने चंद्रमाः क्रूरसौम्यखेटैर्विमिश्रितः।।४।।

पृथिव्यां वृष्टिकारणात् समुद्रमिव जलप्रतीतिः भवेत्। यदि तन्मध्ये सूर्यः अस्ति चेत् जलस्य शोषणं भवेत्। यद्धिने चन्द्रः क्रूरसौम्यग्रहैः युक्तश्चेत्।

तद्दिने परमावृष्टिरवेमृक्षांशयोगतः।।

अतिवृष्टिर्यदा चंद्रः सौम्यैर्वोग्रैर्हि केवलैः।।५।।

तस्मिन् दिने अत्यधिकवृष्टिः जायते। एवं प्रकारेण यस्यां राशौ चन्द्रः भवेत् तस्याः राशेः नवांशकयोगः भवेत्तर्हि अतिवृष्टिः भवेत्। यदा चन्द्रः केवलं क्रूरग्रहैर्वा शुभग्रहैः।

विद्धो दुर्दिनकृत्तुच्छजलदश्च यदा विधुः।।

यस्य नाडीगतस्तेन युक्तदृष्टो जलप्रदः।।६।।

विद्धश्चेत् दुर्दिनदायको भवेत्। अर्थात् वृष्टिः स्वल्मेव स्यात्। चन्द्रः यदा यस्य नाडीगतस्तेन ग्रहेण युक्तदुष्टश्चेत् जलदायक एव।

चेत्कृशेन्दुर्भवेन्नैव यदेन्दुः सौम्यपापयुक्।।

चंद्रनाड्यां तदाम्भः स्याद्विचतुःपंचभिर्ग्रहैः।।७।।

क्षीणचन्द्रश्चेत् वृष्टिः नैव सम्पद्यते। यदा चन्द्रः शुभस्तथा पापग्रहैः युक्तः चन्द्रनाड्यां स्थितश्चेत् जलस्य वृष्टिः जायते। यदि द्विचतुः पञ्चभिः ग्रहैः।

क्रमात्तद्विचतुःपंचदिनकृत्केवलेन्दुना।।

सर्वैरेकत्र सप्ताहो यथासंख्यं ग्रहैरिति।।८।।

युक्तः चन्द्रश्चेत् क्रमेण द्विचतुः पञ्चदिनेषु वृष्टिः भवेत्। केवलं चन्द्रेण सह सर्वे ग्रहाः एकनाड्यां स्थिताश्चेत् सप्तदिनानि वृष्टिर्जायते। एवं प्रकारेण ग्रहाणां यथासंख्याकदिनेषु वृष्टिः वक्तव्या।

वर्षायां द्विगुणं तच्च कदाचिदपि जायते।।९।।

कदाचित् वृष्टिः द्विगुणमपि भवेत्।

जलनाडीस्थिते चंद्रे त्वंभः सौम्योग्रसंयुते।।

दिनार्द्धं दिवसं पंचदिनान्यंभः प्रजायते।।१०।।

जलनाड्यां स्थितः चन्द्रः जलदायको भवेत्तथैव पापग्रहैः युक्तश्चेत् दिनार्द्धं, दिनमेकं वा पञ्चदिनानि वृष्टिः सम्भवेत्।

एवं विधौ नीरनाड्यां तत्रस्थैर्मिश्रखेचरैः।।

आयामयामयुग्माहस्त्रयं पूर्वोदितक्रमात्।।११।।

एवं प्रकारेण चन्द्रो नीरनाड्यां भवेत्तर्हि शुभमिति, पापग्रहैः युक्तश्चेत् प्रहरमिति, द्विप्रहरामिति, एकदिनं, दिनत्रयं वा वृष्टिः पूर्वोक्तक्रमेण वक्तव्या।

चंद्रादिनाडीत्रितये सर्वे खेटाः प्रवर्षणम्।।

अष्टादशार्कषड्वारैः क्रमादथ यदा खगाः।।१२।।

चन्द्रादि नाडीत्रयेषु सर्वे ग्रहाः स्थिताश्चेत् अष्टादा – द्वादश – षट्दिनपर्यन्तं वृष्टिर्भवेत्।

सर्वेऽपि सौम्यनाडीस्थास्तदा वृष्टिर्दिनत्रयम्।।

शेषनाडीगता वातदुष्टवर्षणदा ग्रहाः।।१३।।

सर्वे ग्रहाः सौम्यनाड्यां स्थिताश्चेत् दिनत्रयं वृष्टिर्जायते। तथैव शेषनाडिषु सर्वे ग्रहाः भवन्ति चेत् दुष्टवृष्टिः, पवनप्रचण्डञ्च सम्भवेत्।

निर्जला जलदा नाडी भवेद्योगेऽधिसौम्यके।।

जलदाप्यधिपापाढ्या नाम्बुदा यदि पापिनः।।१४।।

अधिकशुभग्रहाणां योगश्चेत् निर्जलनाडी अपि जलदायिनी भवेत्। तथैव अधिकपापाग्रहाणां योगश्चेत् जलदायिनी नाडी अपि निर्जला भवेत्। यदि पापग्रहः।

याम्यनाड्यामनावृष्टिर्यदा चंद्रधरासुतौ।।

एकनाड्यां गुरुस्तत्र तदा जलमयी हि भूः।।१५।।

याम्यनाडिषु भवेत्तर्हि वृष्टिः न भवेत्। यदि चन्द्रः कुजः, बृहस्पतयः एकनाड्यां तिष्ठन्ति तर्हि पृथिवी सर्वं जलमयमेव।

बुधशुक्रौ यदैकत्र जीवयुक्तौ सशीतगू।।

तदैव परमा वृष्टिर्यदा चंद्रसितौ खलैः।।१६।।

बुध – शुक्र – बृहस्पति – चन्द्रग्रहाः एकनाड्यां तिष्ठन्ति चेत् परमवृष्टिर्भवेत्। यदि चन्द्रशुक्रौ पापग्रहैः।

युतदृष्टौ तदा मेघो लघुवृष्टिर्यदा ग्रहाः।।

उदयास्तमने मार्गे वक्रे खेटाश्च संक्रमे।।

जलनाडीसमारूढा महावृष्टिप्रदाः स्मृताः।।१७।।

युक्तदृष्टौ चेत् मेघाः किञ्चिदेव वृष्टिं ददति। सर्वे ग्रहाः उदयास्तमने वा वक्रमार्गे संक्रान्तौ प्राप्नुवन्तः जलनाड्यां समारूढाः तदा महावृष्टिदायकाः इति कथ्यन्ते।

अथ शुक्रोदयफलम्

चैत्राच्छुक्रोदयो भूयात् तरुसंपदु विग्रहः।

नृपाणां भूरिवृष्टिश्च जलदुर्लभता तथा।।१८।।

चैत्रमासादारभ्य शुक्रोदयः यस्मिन् मासे भूयादिति तस्य फलं एवं प्रकारक्रमात् वक्तव्यम् – वृक्षसम्पद – राजविग्रह – अतिवृष्टि – जलदुर्लभता।

पशुपीडा च सद्धान्यं सर्वसंपत्परं शुभम्।।

शुभं च राज्यभंगश्च राज्यभंगोऽर्घवृद्धिता।।१९।।

पशुपीडा – श्रेष्ठधान्य – अतिशुभ – शुभ – राज्यभंग – राजभंग – अर्थवृद्धिरित्यादि चैत्रमासात् क्रमेण ज्ञातव्याः।

हुताशनीफलम्

पूर्वेऽत्र वायौ होल्यां स्यात्प्रजाभूपसुखं तथा।।

दक्षे भंगश्च दुर्भिक्षं पश्चिमेऽतितृणोद्भवः।।

धान्यं सौम्ये शिखा खे चेद्वृष्टिर्भूयो गढाश्रया।।२०।।

होल्यां पूर्वे वातेन वीयते तर्हि राजप्रजानां सुखं, दक्षिणे चेत् राज्यभंगः, दुर्भिक्षं च, पश्चिमे चेत् अधिकतृणोत्पत्तिः, उत्तरे चेत् धान्योद्भवः भवेत्। यदि होल्याः शिखा आकाशं गच्छेत्तर्हि राजदुर्गस्योपरि अधिकवृष्टिः भवेत्।

भोजनप्रश्ने विचारः

अन्नदस्तनुपतिः खलु भोक्ता कर्मपो मदपतिश्च बुभुक्षा।।

तुर्यपोन्नमिह सद्युतिदृष्ट्या सत्फलं खलयुतीक्षणतोऽन्यत्।।१।।

लग्नेशोऽन्नदाता, दशमेशो भोक्ता, सप्तमेशो बुभुक्षा, चतुर्थेशः अन्नञ्चेति कथ्यते। अस्मिन् प्रश्ने शुभग्रहस्य योगस्तथा दृष्टिश्चेत् शुभफलं, तथा पापग्रहस्य योगस्तथा दृष्टिश्चेत् अशुभफलम् इति कथ्यते।

लग्ने चतुर्थे शुभदृष्टयुक्ते सुभोजनं लग्नगतेऽथ जीवे।।
सितेऽपि वा साध्वशनं कुकाले भवेदथो लग्नगते सुरारौ।।२।।

लग्नस्तथा चतुर्थगृहं शुभग्रहेण युक्तदृष्टश्चेत् सुभोजनं तथा लग्ने बृहस्पति र्वा शुक्रश्चेत् कुसमये साध्वशनं लभ्यते। लग्ने राहुश्चेत्।

मंदेऽपि वा भास्करदृष्टयुक्ते न भोजनं शस्त्रभयं क्वचिच्च।।
चेद्भानुना दृष्टयुतं न लग्नं तदोपवासो निशि वा कुभोज्यम्।।
चंद्रे खभे सूष्णमिलातनूजे खभे हि शीतं प्रवदेन्मनीषी।।३।।

अथवा सूर्येण दृष्टयुक्तश्शनैश्चरश्चेत् भोजनं कुत्रापि न लभ्यते किन्तु शस्त्रभयं भवेत्। यदि लग्नः सूर्येण दृष्टो वा न युक्तश्चेत् उपवासः भवेत्। रात्रौ कुभोजनं लभ्यते। यदि चन्द्रः दशमगृहे स्थितश्चेत् उष्णं तथा कुजः दशमगृहे स्थितश्चेत् शीतलभोजनं लभ्यतेति पण्डितैरुक्तम्।

लग्नं पश्यन्ति ये खेटा भोजने तद्रसाः स्मृताः।।
सुभर्क्षगानां सुरसाः परेषा नीरसाः स्मृताः।।४।।

ये ग्रहाः लग्नं पश्येत्तर्हि तेषां ग्रहाणां रसभोजनं कथ्यते। शुभराशिस्थ ग्रहाणां सुरसस्तथा अशुभराशिस्थ ग्रहाणां नीरसभोजनमिति कथ्यते।

वक्रिणः प्राप्य च रसान्न भुंक्तेऽथ तनौ न दृक्।।
तदा केंद्रस्थितरसो वाच्योऽयार्केऽत्र भोजनम्।।५।।

ग्रहाः वक्रिणश्चेत् रसानां प्राप्तेऽपि भोजनं नैव भवेत्। लग्ने कस्यापि ग्रहस्य दृष्टिः न चेत् केन्द्रस्थितग्रहस्य रसो कथ्यते।

गोधूमगुडभक्ताद्यमिन्दोश्च परमान्नकम्।।
सदध्याज्यसितान्नं च भौमे गुडहविष्यवत्।।६।।

यदि केन्द्रे सूर्यश्चेत् गोधूम – गुडा – भक्ताद्यं भोजनं, चन्द्रश्चेत् श्रेष्ठमन्नं – दधि – घृतं – श्वेतमन्नं तथा कुजश्चेत् गुडा – हविष्ययुक्तं।

रक्तान्नं च बुधे मुद्गदुग्धकर्पूरवद्गुरौ।।

निशाचणकदध्यादि शुक्रे मृद्वाज्यवत्कचित्।।७।।

तथा रक्तान्नं, बुधश्चेत् मद्गदुग्धान्नं – कर्पूरयुक्तान्नं, बृहस्पतिश्चेत् निशाचणदध्यादि अन्नं, शुक्रश्चेत् मृदु – कोमलघृतपूरितान्नं।

शनौ शिवीतैलतिलाद्यं राहौ पूतिसर्षपात्।।

समाषान् शिखिनि ब्रूयाद्भूरिद्रव्यसमुच्चयम्।।८।।

शनिश्चेत् आम्लतैलतिलादिकमन्नं, राहुश्चेत् दुर्गन्धयुक्तं – अपवित्रं, सुरसान्नं तथा उडदान्नं, केतुश्चेत् बहुपदार्थसहितं भोजनमुपलभ्यते।

अम्बुस्थखेटस्य वशाद्भोज्यान्नस्य रसं वदेत्।।

स्निग्धान्नं भास्करे तुर्ये शनौ तैलेन मिश्रितम्।।९।।

चतुर्थस्य ग्रहवाशात् भोज्यान्नस्य रसमिति वदेत्। यदि सूर्यः चतुर्थगृहे स्थितश्चेत् स्निग्धान्नं, शनिश्चेत् तैलमिश्रितान्नं लभ्यते।

नीचग्रहैर्गतरसं कदन्नं स्वल्पसंस्कृतम्।।

प्रबलार्कमुखैर्लग्ने भूपालादेर्गृहेऽशनम्।।१०।।

यदि चतुर्थगृहे नीचग्रहोऽस्ति चेत् नीरसं, अपक्वान्नं, तथा कदन्नं भवेत्। सूर्य इव समानबलवान् ग्रहः लग्ने स्थितश्चेत् राजादीनां गृहे भोजनं भवेत्।

सुखपतौ सबले च सुभोजनं चरगृहे त्वसकृत्स्थिरगे सकृत्।।

द्वितनुगे द्विरथो शुभदृग्युते सदशनं सुखतो न कदाऽन्यथा।।११।।

चतुर्थेशो बलवान् चेत् सुभोजनं लभ्यते। यदि चरराशिगतश्चेत् अनेकवारं, स्थिरराशिगतश्चेत् एकवारं द्विस्वभावराशिगतश्चेत् द्विवारं भोजनं लभ्यते। यदि चतुर्थेशो शुभग्रहेण दृष्टयुक्तश्चेत् सुभोजनं सुखेन भवेत्तथैव अन्यथा चेत् कदापि न स्यात्।

मूलत्रिकोणगः खेटो यद्गृहं च समाश्रितः।।

तद्गृहेशस्य गेहे स्याद्भोजनं बलिनोऽथवा।।१२।।

मूलत्रिकोणे प्राप्तग्रहः यस्मिन् गृहे तिष्ठेत् तस्य गृहस्वामिगृहे भोजनं भवेत्। अथवा अधिकबलवान् ग्रहस्य गृहे चेत् भोजनं लभ्यते।

ग्रहात्कुटुंवात्सहजात्पितृभ्यः पुत्राद्रिपोर्वध्वृणयाचितेभ्यः।।

नृपात्स्वमित्रात्क्रयतः क्रमेण भोज्याप्तिरंगादिषु वीर्यवत्सु।।१३।।

लग्नादि गृहं सबलञ्चेत् क्रमेण अग्रे लिखितमनुष्याणां भोजनप्राप्तिर्भवेत्। निजगृहात् – कुटुम्बात् – सोदरात् – पितामातृभ्यां, पुत्रात्, शत्रुतः, वधूतः, ऋणजनेभ्यः, याचकेभ्यः, राज्ञः, स्वमित्रात्, कृयणात् भोजनप्राप्तिः भवेत्।

तिलानि तण्डुलाश्चैव मसूरा चणकान्नकम्।।

समुद्गराजमाषश्च गोधूमा यवबाजरे।।

कुलत्थमाषकौ चैव तुषान्नं भास्करक्रमात्।।१४।।

सूर्यात् तिलानि, चन्दात् तण्डुलाः, कुजात् मसूराः चणकञ्च, बुधात् समुद्गराजमाषः बृहस्पतितः गोधूमा, शुक्रात् यवबाजरे, शनितः कुलत्थमाषकौ, शहुतः धासतृणादिभिः उत्पन्नमन्नं, एवमेतानि सूर्यक्रमात् विज्ञेयानि।

मूलं रवौ रात्रिपतौ च पुष्पं कुजे च पत्रं सितजीवविद्भिः।।

शाखाशनौ व्यंजनवच्च राहौ केतौ तथा मांसमवेः प्रवाच्यम्।।१५।।

अधुना अन्यप्राकरेणोच्यते। सूर्ये मूलं, चन्द्रे पुष्पं, कुजे पत्रं, शुक्रबृहस्पतिबुधेषु शाखाः, शनिग्रहे व्यञ्जनयुक्तं तथा राहुकेतुग्रहयोः अजमांसं भोजने कथितं वर्तते।

निशापतौ राशिपतिः प्रविष्टः सुखेन सद्भोजनमिष्टकाले।।

अतो विलोमे परथा कृशेन्दौ खलालवे वा समये न चान्नम्।।१६।।

यदि चन्द्रस्य राशिस्थ स्वामीगृहः चन्द्रेण सह भवेत्तर्हि इष्टसमये मित्रेण सह सुभोजनं प्राप्यते। विलोमश्चेत् अन्यफलमिति वक्तव्यम्। यदि क्षीणचन्द्रश्चेत् तथा चन्द्रराशिगत नवांशे पापग्रहः भवेत्तर्हि इष्टसमये अन्नप्राप्तिः नैव भवत्।

सूर्येण चेन्मुत्तसिलं हिमांशौ शुच्युष्णतीक्ष्णं गुरुणा समिष्टम्।।

सगौरवान्नं भृगुणा बुधेन महोत्सवे स्वादुरसं कुजेन।।१७।।

यदि सूर्येण सह चन्द्रस्य इत्तसालयोगश्चेत् निर्मल – पवित्र – तीक्ष्णभोजनम्, बृहस्पतिना सह इत्तसालयोगश्चेत् स्वादुभोजनं, शुक्रेण सह स्थितश्चेत् सगौरवान्नं, बुधेन सह स्थितश्चेत् महोत्सवे स्वादुरसान्नं, कुजेन सह स्थितश्चेत्।

कुस्थान उष्णं शनिनायुधानां कथान्वितं सत्खगमित्रदृष्ट्या।।

भुक्तं विवाहे शुभवैरिदृष्ट्या विवाहतश्चागतमत्र भुक्तम्।।१८।।

दुष्टस्थानेषु उष्णान्नं, तथा शनिग्रहेण सह स्थितश्चेत् शस्त्रस्थाने भोजनं लभ्यते। शुभग्रहस्य मित्रदृष्टिरस्ति चेत् विवाहे भोजनं लभ्यते। तथैव शुभग्रहस्य वैरिदृष्टिश्चेत् विवाहादागतान्नं लभ्यते।

भुक्तं भोक्तव्यं वेति प्रश्ने विचारः

सदित्तसाले च खलेशराफे चंद्रे प्रभुक्तं परथास्ति भोज्यम्।।१९।।

यदि चन्द्रः शुभग्रहेण सह इत्तसालयोगे तथा पापग्रहस्य इशराफयोगे चेत् भोजनं जातमिति, अन्यप्रकारेण चेत् भोजनं जायतेति विज्ञेयम्।

स्ववैरिणा निमन्त्रितोऽह शुभमशुभं वा भविष्यतीति प्रश्ने विचारः

वपुषि शनौ धनराहौ दिनकरदृष्टे निमन्त्रितो रिपुणा।।

लभते शस्त्रविद्यांतच्चाङ्गं शनिभौमयोस्तथैति दृशाम्।।१।।

लग्ने शनिः, द्वितीयगृहे राहुः सर्वैः दृष्टश्चेत् शत्रुणा निमन्त्रितपुरुषः शस्त्रविद्यायाः लाभमेति। यदि सो लग्नः शनिकुजयोः दृष्टिपापकश्चेत् अर्थात् लग्नं शनिकुजौ पश्येत्तर्हि पूर्वोक्तफलमेव वक्तव्यम्।

यदांगनाथेज्यसिता बलाढ्याश्चेन्द्विन्दुजौ केन्द्रगतौ ससौम्यौ।।

त्रिषष्ठलाभेषु खलास्तदा स्यात्सुभोजनं प्रीतिकरैर्नराणाम्।।२।।

यदा लग्नेशबृहस्पतिशुक्राः सबलाश्चेत् तथा शुभग्रहैः सह चन्द्रस्तथा बुधः केन्द्रे स्थितस्तथा ३/६/११ गृहेषु पापग्रहोऽस्ति चेत् प्रीतिकरपुरुषैः सुभोजनं लभ्यते।

स्वप्नप्रश्ने तथा सुरतप्रश्ने विचारः

लग्नेऽर्कोऽकांशगे वाऽप्यरुणपटरवीन्दूँश्च वन्हिं प्रपश्ये-।
श्चंद्रे श्वेताम्बरस्त्रङ्मणिमयमु कुजे रक्तवद्विद्रुमं ज्ञे।।
स्वर्लोकस्यापि वार्त्ता गमनमपि सुरेज्ये च विद्याप्रसंगात्।
शुक्रे क्रीडासवार्चा जलपथि तरणं चाक्षखेलां विलासम्।।१।।

लग्ने सूर्यो वा सूर्यस्य नवांशश्चेत् रक्तवस्त्र – सूर्य – चन्द्र – अग्निं स्वप्ने प्रपश्येत्। चन्द्रश्चेत् वस्त्र – माला – मणयः, कुजश्चेत् रक्तवर्णवस्तु माषादि, बुधश्चेत् स्वर्गलोकवार्ता तथा बृहस्पतिश्चेत् विद्याप्रसङ्गस्तथा आनन्दप्राप्तिः, शुक्रश्चेत् क्रीडाकरणं, सवार्चा, जलमार्गतरणं, चाक्षरवेलनं, विलसं च स्वप्ने प्रपश्येत्।

मंदे म्लेच्छारिभीतिं गतिमपि च वने पर्वते राहुकेत्वोः।
नीचैः संगं ततो धीरिपुमदनसहोत्थायगश्चेद्विमांशुः।।
भृग्वीज्यार्कप्रदृष्टः शुभफलखचरैः केंद्रधर्मेषु संस्थैः।
सद्भोगः कामिनीनां भवति हि नियतं सद्विलासं सहायः।।२।।

शनैश्चरश्चेत् शत्रुभयं तथा वनपर्वतगमनं, राहुकेतू भवतश्चेत् नीचसंसर्गः इत्यादयः स्वप्ने प्रपश्येयुः। एतदनन्तरं ५/६/७/३/११ गृहेषु चन्द्रशुक्रबृहस्पतयः सूर्येण दृष्टास्तथा शुभफलदायकग्रहः केन्द्रे तथा नवमगृहे स्थितश्चेत् कामिनीजनानां सद्भोगः सद्विलासेन सह प्राप्यते। अथवा स्वपत्न्या भोगप्राप्तिर्भवेत्।

स्त्रीभोगो वांगनाथे नरि मदनपतिस्त्रीखगेनेत्तसाले।।
भोगः स्यादेकपत्ये बहुलतरसुखं नैव भोगः कदाचित्।।३।।

पुरुषसंज्ञकराशिस्थ लग्नेशसप्तमेशयोः स्त्रीसंज्ञकग्रहेण सह इत्तसालं भवेत्तर्हि स्त्रीभोगप्राप्तिः भवेत्। तथैव सप्तमेशलग्नेशौ एकस्वामिगतौ चेत् सुखमधिकं भवेत्। परन्तु भोगः नैव लभ्यते।

केंद्रे सौम्येत्तसालेन्दुः स्त्रीसंगोऽधिमुखं स्मरे।।

क्रूरदृष्टे सरोषोऽस्ते सक्रूरे कलहोऽथवा।।४।।

यदि केन्द्रे शुभग्रहेण सह इत्तसालं कुर्वन् चन्द्रः स्थितश्चेत् अधिमुखस्त्रीसङ्गो भवेत्। सप्तमगृहं क्रूरग्रहैः दृष्टश्चेत् क्रोधेन सह स्त्रीसङ्गो भवेत्। तथैव क्रूरग्रहयुक्तश्चेत् कलहो वा

पीडा भवेद्यथास्तर्क्षं रतिकृच्च तथा रतिः।।

जीवे तनौ भृगावस्ते सुखे चंद्रे विलासकृत्।।५।।

पीडा वा भवेत्। यथा सप्तमगृहे स्थितश्चेत् तादृशी रतिः स्यात्। तथैव रतिः सम्भाव्यते। बृहस्पतिः लग्ने, शुक्रः सप्तमे, चन्द्रः चतुर्थे स्थिताः चेत् विलासकृत्

सुरूपवेषालावण्ययुक्तरुण्याः सुगन्धिवत्।।

रतं स्यात्केंद्रराज्येन्दुः शुक्रमुत्तसिले तथा।।६।।

सुन्दरवेषः, रूपं तथा लावण्ययुक्ततरुण्या सुगन्धियुक्ता रतिः भवेत्। दशमकेन्द्रगतः चन्द्रः शुक्रेण सह इत्तसालयोगे स्थितः चेदपि सुन्दरस्त्रिया रतिप्राप्तिरेव।

स्थिरर्क्षे द्विदेहेऽथवा स्वीयनारी चरर्क्षे हि मन्देऽथ केंद्रे परस्त्री।।

महादुर्भगा भूसुते रोषपूर्णाऽथ पापे चतुर्थे धृता सप्तमे च।।७।।

यदि स्थिरो वा द्विस्वभावराशिगतः शनैश्चरः केन्द्रे स्थितश्चेत् स्वस्त्री वा चरराशिगतः शनिः केन्द्रे स्थितश्चेत् अन्यस्त्री महादुर्भगा, कुजश्चेत् क्रोधपूर्णा, चतुर्थगृहे पापग्रहः स्थितश्चेत् धृता, सप्तमगृहे पापग्रहोऽस्ति चेत्

स्मृतोद्वाहिता स्त्री प्रभुक्ता स्थिरर्क्षे तनौ वारमेकं द्विदेहे द्विवारम्।।

चरर्क्षे त्रिवारं च केंद्रे दिनर्क्षे दिवा खेचरे वासरे स्त्री प्रभुक्ता।।८।।

निशान्ते निशाखेचरे स्यान्निशायां द्वियोगेऽत्र सन्ध्यासु भुक्ताऽस्ति पूष्णा।।

स्वभस्थैः स्वगेहेशुभैरन्यभेऽन्यस्य गेहेऽरिभेऽरेर्हितर्क्षे हितास्य।।९।।

स्मृता, विवाहितास्त्री भोगी भवेत्। स्थिरलग्नः चेत् एकवारं, द्विस्वभावश्चेत् द्विवारं, चरराशिगतश्चेत् त्रिवारं भोगं भवेत्। यदि उक्त सप्तमस्थाने रात्रिसंज्ञकः एकः ग्रहः भवेत्तर्हि निशान्ते, रात्रिसंज्ञकौ द्विग्रहौ भवेत्तर्हि रात्रौ तथा सूर्यस्थितसमये सन्ध्यायां च भोगं भवेत्। यदि स्वराशिगतः ग्रहश्चेत् स्वगृहे, पापग्रहस्तथा अन्यग्रस्य राशिगतश्चेत् अन्यगृहे, मित्रराशिगतश्चेत् मित्रस्य, शत्रुराशिगतश्चेत् शत्रुगृहे भोगं भवेत्।

इति रुद्रमणिप्रकल्पितो जगदम्बापादयोः समर्पितः।।

भवताच्छुभदः सुकर्मिणां पठतां प्रश्नशिरोमणिर्नृणाम्।।१०।।

इति श्रीवाल्मीकवंशावतंसश्रीमत्त्रिपाठिरुद्रमणिप्रकल्पिते प्रश्नशिरोमणौ विशेषाध्यायः समाप्तः।

श्रीयुतपण्डितरुद्रमणिविरचितः जगदम्बापार्वत्याः चरणयोरर्पितः प्रश्नशिरोमणि-नामक ग्रन्थः पठितृणां सुकर्मिणां शुभफलदायको भूयात्। इति श्रीवाल्मीक-वंशावतंसश्रीमत्त्रिपाठिपण्डितरुद्रमणिविरचिते प्रश्नशिरोमणिनामकग्रन्थे ढाडौलिग्राम-वास्तव्यपण्डित रामदयालुविरचितभावार्थबोधिनी नाम भाषा टीका समाप्ता।

सम्पूर्णोऽयं प्रश्नशिरोमणिः